यत्नेन शंकरप्रीत्या निर्मितं विश्वकर्म्मणा ।।६३
पञ्चाशद्योजनोर्ध्वञ्च चतुर्योजनविस्तृतम् ।
रतितल्पसमायुक्तैः शोभितं शतमन्दिरैः ।।६४

इस बीच से देवों ने एक उत्तम रथ को देखा था। जो सुवर्ण के सार से वना हुआ था और अनेक प्रकार के रत्नों के परिच्छेद से युक्त था।५८। यह रथ उत्तम मणियों से युक्त था और वह्नि के समान शुद्ध वस्त्र से अन्वित था। यह रथ श्वेत चमरों से भूषित और सहस्रों दर्पणों से समलंकृत था।५६। इस सुन्दर रथ में सद्रत्नों के कलशों के समूह लगे हुए थे और पारिजात के पुष्पों की वनी हुई मालाओं के समूह से यह रथ सुशोभित हो रहा था।६०। यह रथ सहस्र चक्रों से युक्त था इसकी गति का वेग मन के तुल्य शीघ्रगामी था। यह बहुत ही मनोरम था। इस रथ की प्रभा जो थी वह ग्रीष्म काल में मध्याह्न काल के सूर्य की प्रभा को भी पराजित कर देने वाली थी।६१। यह रथ मुक्त-माणिक्य और वज्रों (हीरों) के समूह से बहुत ही समुज्ज्वल था। इसमें चित्रकारी बहुत सुन्दर हो रही थी जिसमें पुतली-पुण्य-सर और कानन चित्रित हो रहे थे।६२। हे मुने ! यह रथ देवों-दैत्यों और दानवों के सम्पूर्ण रथों में श्रेष्ठ रथ था जिसको शंकर की प्रीति से विश्वकर्मा ने बड़े ही यत्न के साथ निर्मित किया था।६३। यह रथ पचास योजन ऊँचा और चार योजन विस्तार वाला था। इसमें रति की शय्या थी और सैकड़ों मन्दिरों से भी शोभा वाला था।६४।

तत्रस्थां ददृशुर्देवीं रत्नालंकारभूषिताम्।
प्रदग्धस्वर्णसाराणां प्रभामोषकरद्युतिम्।
तेजःस्वरूपामतुलां मूलप्रकृतिमीश्वरम् ॥६५
सहस्रभुजसंयुक्तां नानायुधसमन्विताम्।
ईषद्धास्यप्रसन्नास्यां भक्तानुग्रहकातराम् ॥६६
गण्डस्थलकपोलाभ्यां सद्रत्नकुण्डलोज्ज्वलाम्।
रत्नेन्द्रसाररचितक्वणन्मञ्जीररञ्जिताम् ॥६७
वह्निशुद्धांशुकानातिज्वलितेन समुज्ज्वलाम्।
सिंहपृष्ठसमारूढां सुताभ्यां सहितां मुदा ॥६८
वरुह्य रथात्तूर्णं श्रीकृष्णं प्रणनाम च।
सुताभ्यां सह सा देवी समुवास वरासनैं ॥६९

गणेशः कार्त्तिकेयश्च नत्वा कृष्णं परात्परम् ।
नमाम शंकरं धर्म्ममनन्तं कमलोद्भवम् ॥७०
उत्तस्थरारात्ते देवा दृष्ट्वा तौ त्रिदशेश्वरौ ।
आशिषञ्च ददुर्देवा वाशयामासुः सन्निधौ ।
ताभ्यां सह सदालापं चक्रुर्देवा मुदान्विताः ॥७१

उस परम दिव्य एवं अत्यन्त सुरम्य रथ में विराजमान देवी को सब ने देखा था जो देवी रत्नों के अलंकारों से विभूषित थी। उसकी द्युति तपे हुए उत्तम सुवर्ण की प्रभा को भी पराजित करने वाली थी। यह देवी तेज के स्वरूप वाली:अनुपम-मूल प्रकृति ईश्वरी थी।६५। यह अनेक प्रकार के उत्तम आयुधों से युक्त सहस्र भुजाओं वाली थी। इसका मुख कमल मन्द हास्य से परम प्रसन्नता से पूर्ण था और यह भक्तों पर अनुकम्पा करने के लिए अत्यन्त कातर हो रही थी। इसके गण्ड स्थल एवं कपोल भाग अच्छे रत्नों से निर्मित कुण्डलों से उज्ज्वल हो रहे थे। यह देवी श्रेष्ठ रत्नों के द्वारा विरचित मञ्जीरों की ध्वनिसे रंजित हो रही थी।६६-६७। अग्नि के समान परम शुद्ध एवं दीप्यमान वस्त्र से समुज्ज्वल-सिंह के पृष्ठ पर संस्थित तथा दोनों अपने पुत्रों के सहित यह देवी रथ से शीघ्र उतर कर श्रीकृष्ण के समीप गई और उनको प्रणाम कर अपने पुत्रों के सहित वहाँ एक श्रेष्ठ आसन पर संस्थित होगई थी।६८-६९। इसके अनन्तर स्वामि कार्तिकेय और गणनाथ गणेश ने परात्पर श्रीकृष्ण को प्रणाम किया था और शंकर-धर्म-अनन्त और ब्रह्माजी को भी प्रणाम किया था।७०। उस समय समीप में स्थित सब देवता उठकर खड़े हो गये थे और उस दोनों देवों को आशीर्वाद देकर अपने समीप में उन्हें बिठा लिया था। फिर उन दोनों के साथ हे नारद देवों ने प्रसन्नता से पूर्ण होकर सदालाप करना आरम्भ कर दिया था।७१।

तस्थुर्देवाः सभामध्ये देवी च पुरतो हरेः ।
गोपगोप्यश्च बहुशो बभूवुर्विस्मयाकुलाः ॥७२

उवाच कमलां कृष्णःस्मेराननसरोरहः ।
त्वं गच्छ भीष्मकगृहं नानारत्नसमन्वितम् ।।७३
वेदर्ध्या उदरे जन्म लभ देवि सनातनि ।
तव पाणि ग्रहीष्यामि गत्वाहं कुण्डिनं सति ।।७४
ता देव्यः पार्वतीं दृष्ट्वासमुत्थाप्यत्वरान्विताः ।
रत्नसिंहासने रम्ये वासयामासुरीश्वरीम् ।।७५
विप्रेन्द्र पार्बती लक्ष्मीर्वाधिष्ठातृदेवताः ।
तस्थुरेकासने तत्र सम्भाष्य च यथोचितम् ।।७६
ताश्च सम्भाषयामासुः सम्प्रीत्या गोपकन्यकाः ।
ऊषुर्गोपालिकाः कश्चिन्मुद्रा तासाञ्च सन्निधौ ।।७७

इसके उपरान्त सभा के मध्य में हरि के सामने समस्त देवता और यह देवी संस्थित हो गये थे । उस समय अधिकतर गोंपी और सब विस्मय से आकुल हो गये थे ।७२। मन्दस्मित से युक्त मुख कमल से बोले—हे देवि ! तुम भीष्मक के गृह में जाओ जो नाना रत्नों से समन्वित है ।७३। हे देवि ! वहाँ तू वैदभी के उदर में जन्म ग्रहणकर । हे सनातनि ! हे सति मैं कुण्डिन पुर में जाकर तेरा पाणिग्रहण करूँगा ।७४। उन देवियों ने पार्वती को देखकर शीघ्रता से युक्त होकर उनको उठाकर रम्य रत्नों के सिंहासन पर ईश्वरी को विराजमान कराया था ।७५। हे विप्रेन्द्र ! वहाँ एक ही आसन पर यथोचित सम्भाषण करके पार्वती-लक्ष्मी और वाणी की अधिष्ठात्री देवता सरस्वती ने अपनी स्थिति की थी ।७६। उनसे गोपों की कन्याओं ने बड़ी प्रीति से सम्भाषण किया था । उन में कुछ गोपालिका उनकी सन्नधि में आनन्द पूर्वक बैठ गई थीं ।७७।

श्रीकृष्णः पार्वतीं तत्र समुवाच जगत्पतिः ।
देवि त्वमंशरूपेण ब्रज नन्दव्रजं शुभे ।।७८
उदरे च यशोदायाः कल्याणि नन्दरेतसा ।
लभ जन्म महामाये सृष्टिसंहारकारिणि ।।७९

ग्रामे ग्रामे च पुजां ते कारयिग्यामि भूतले ।
कृत्स्ने महीतले भक्त्या नगरेषु वनेषु च ॥८०
तत्राधिष्ठातृदेवीं त्वां पूजयिष्यन्ति मानवाः ।
द्रव्यैर्नानाविधैर्दिव्यैर्बलिभिश्च मुदान्विताः ॥८१
तव भूस्पर्शमात्रेण सूतिकामन्दिरेशिवे ।
पिता मां तत्र संस्थाप्य त्वामादाय गमिष्यति ॥८२
कंसदर्शनमात्रेणागमिष्यसि शिवान्तिकम् ।
भारावतारणं कृत्वा गमिष्यामि स्वभाश्रमम् ॥८३

जगत् के स्वामी श्रीकृष्ण वहाँ पर पार्वती से बोले—हे देवि ! हे शुभे ! आप भी अंश रूप से नन्दव्रज में जाओ ।७८। हे कल्याणि आप नन्द के वीर्य से यशोदा के उदर में हे महामाये ! हे सृष्टि के संहार के करने वाली ! जन्म ग्रहण करो ।७९। मैं आपकी पूजा प्रत्येक ग्राम में करा दूंगा । बड़ी भक्ति के साथ सम्पूर्ण भूतल में नगरों में और वनों में सर्वत्र आपकी पूजा होगी ।८०। वहां पर मनुष्य अधिष्ठात्री देवी आपको अनेक प्रकार के द्रव्यों से और वलियों के द्वारा प्रसन्नता के साथ पूजेंगे ।८१। हे शिवे ! आपके भूमि के स्पर्श मात्र से सूतिका मन्दिर में पिता मुझको वहां संस्थापित कर तुमको लेकर आयेंगे ।८२। फिर कंस का दर्शन भर करके आह शिव के समींप में आजायेंगी । मैं भी भूमि के भार को उतार कर अपने आश्रम को चला जाऊंगा ।८३।

इत्युक्त्वा श्रीहरिस्तूर्णमुवाच च षडाननम् ।
अंशरूपेण वत्स त्वं गमिष्यासि महीतलम् ॥८४
जाम्बवत्याश्च गर्भे च लभ जन्म सुरेश्वर ।
अंशेन देवताः सर्वा गच्छन्तु धरणींतलम् ॥८५
भारहारं करिष्यामि वसुधायाश्च निश्चितम् ॥८६
इत्युक्त्वा राधिकानाथस्तथौ सिंहासने वरे ।
तस्थुर्देवाश्च देव्यश्च गोपागोप्यश्चनारद ॥८७
एतस्मिन्नन्तरे ब्रह्मा समुत्तस्थौ हरेः पुरः ।
पुटाञ्जलिर्जगन्नाथमुवाच विनयान्वितः ॥८८

अवधानं कुरु विभो किंकरस्य निवेदने ।
आज्ञां कुरु महाभाग कस्य कुत्र स्थलं भुवि ॥८९
भर्ता पातोद्धारकर्ता सेवाकानां प्रभुः सदा ।
स भृत्यः सर्वदा भक्त ईश्वराज्ञां करोति यः ॥९०
के देवाः केन रूपेण देवश्च कलया कया ।
कुत्र कस्याभिधेयश्च विषयश्च महीतले ॥९१
ब्रह्मणो वचनं श्रुत्वा प्रत्युवाच जगत्पतिः ।
यस्य यत्रावकाशश्च कथयामि विधानतः ॥९२

यह कहकर श्री हरि शीघ्र ही षडानन से बोले—हे वत्स ! तुम महीतल में अंश रूप से जाओगे ।८४। वहाँ हे सुरेश्वर ! तुम जाम्ब-वती के गर्भ में जन्म प्राप्त करो । समस्त देवगण भी अपने अपने अंश से धरणी तल में जावें ।८५। मैं निश्चय ही अब पृथिवी के भार का हरण करूँगा ।८६। इतना कहकर राधिका के नाथ श्रेष्ठ सिंहासन पर स्थित हो गये थे । हे नारद ! देवगण-देवियां:गोप और गोपियां भी सब बैठ गये थे ।८७। इसी अन्तर में ब्रह्मा हरि के आगे उठकर खड़े हुए थे और हाथ जोड़कर विनय से युक्त होकर बोले ।८८। ब्रह्माजी ने कहा—हे विभो ! इस सेवक के निवेदन पर ध्यान देने की कृपा करें । हे महाभाग ! भूमि में किस को किस स्थल में रहना होगा ? आप तो प्रभु हैं और सदा भरण करने वाले और सेवकों के उद्धार करने वाले हैं और वह भक्त सर्वदा आप का भृत्य है जो ईश्वर की आज्ञा का पूर्ण पालन किया करता है ।८९-९०। कौन से देवता किस रूप से और देवियां किस कला से कहाँ पर महीतल में किस नाम वाला विषय (देश) इन का होगा ।९१। ब्रह्मा के इस वचन को सुनकर जगत्पति ने उत्तर दिया था कि जिसका जहां पर अवकाश है उसे मैं विधान के साथ बताता हूँ ।९२।

कामदेवो रौक्मिणेयो रती मायावतीसतीसती ।
शम्बरस्यगृहे या च छात्रारूपेण संस्थिता ॥९३

त्वं तस्य पुत्रो भविता नाम्नानिरुद्ध एव च।
भारती शोणितपुरे बाणपुत्री भविष्यति ॥९४
अनन्तो देवकीगर्भाद्रोहिणेयो जगत्पतिः।
मायया गर्भसंकर्षान्नाम्ना संकर्षणः स्मृतः ॥९५
कालिन्दी सूर्य्यतनया गङ्गांशेन महीतले।
अर्द्धांशेनैव तुलसी लक्ष्मणा राजकन्यका ॥९६
सावित्री वेदमाता च नाम्ना नाग्नजिती सती।
वसुन्धरा सत्यभामा शैव्या देवी सरस्वती ॥९७
रोहिणी मित्रविन्दा च भविताराजकन्यका।
सूर्य्यपत्नीरत्नमालाकलया च जगद्गुरोः ॥९८

श्रीकृष्ण ने कहा—कामदेब रौक्मणेय है और रती मायावती सती है जो छाया रूप से शम्बर के घर में संस्थित है ।९३। तुम उसके पुत्र होओगे जिसका नाम अनिरुद्ध होगा। शोणित पुर में बाण की पुत्री भारती होगी ।९४। अनन्त देवकी के गर्भ से रोहिणेय अर्थात् रोहिणीके पुत्र होंगे वे माया द्वारा गर्भसे संकर्षित होनेके कारण संकर्षण इस नाम से कहे गये हैं ।९५। सूर्य की तनया कालिन्दी गङ्गा के अंश से महीतल में होगी और आधे अंश से तुलसी राजकन्या लक्ष्मणा होगी ।९६। सावित्री वेदों की माता नाग्नजिती के नाम वाली सती होगी-वसुन्धरा सत्यभामा होगी और सरस्वती देवी शैव्या होंगी ।९७। रोहिणी और मित्रविन्दा जगत् के गुरुकीं कलासे सूर्य पत्नी रत्न माला राज कन्याऐं होवेंगी ।९८।

स्वाहांशेन सुशीला च रुक्मिण्याद्याः स्त्रियो नव।
दुर्गार्द्धांशा जाम्बवती महिषीणां दश स्मृताः ॥९९
अर्द्धांशेन शैलपुत्री यातु जाम्बवतो गृहम्।
कैलासे शंकराज्ञा च वभूव पार्वतीं प्रति ॥१००
कैलाशगामिनं त्रिष्णुं श्वेतद्वीपनिवासिनम्।
आलिङ्गनं देहि कान्ते नास्ति दोषो ममाज्ञया ॥१०१

कथं शिवाज्ञा तां देवीं बभूव राधिकापते ।
विष्णोःसम्भाषणे पूर्वं श्वेतद्वीपनिवासिनः ॥१०२
पुरा गणेशं द्रष्टुं च प्रजग्मुः सर्वदेवताः ।
श्वेतद्वीपात् स्वयं विष्णुर्जगाम शंकरस्तवात् ॥१०३
दृष्ट्वा गणेशं मुदितः समुवास सुखासने ।
सुखेन ददृशुः सर्वे त्रैलोक्यमोहनं वपुः ॥१०४
किरीटिनं कुण्डलिनं पीताम्बरधरं वरम् ।
सुन्दरं श्यामरूपञ्च नवयौवनसंयुतम् ॥१०५
चन्दनागुरुकस्तूरीकुङ्कुमद्रवसंयुतम् ।
रत्नालंकारशोभाढ्यं स्मेराननसरोरुहम् ॥१०६
रत्नसिंहासनस्थञ्च पार्षदैः परिवेष्टितम् ।
वन्दितञ्च सुरैः सर्वैः शिवेन पूजितं स्तुतम् ॥१०७

स्वाहा के अंश से सुशील रुक्मिणी आदि जो स्त्रियां होगी तथा दुर्गा के अर्द्ध अंश से जाम्बवती होगी इस तरह दश महिषी कही गई है ।९९। शैल पुत्री आधे अंश से जाम्बवान् के घर में जावें । कैलास में पार्वती को शंकर की आज्ञा होगई थी ।१००। कैलास के गामी श्वेत द्वीप निवासी विष्णु को हे देवि ! अपना आलिंगन दो । हे कान्ते ! मेरी आज्ञा से इसमें कोई भी दोष नहीं है—यह शिव की आज्ञा हुई थी ।१०१। ब्रह्मा ने कहा—हे राधिकापते ! उस देवी को यह शिव की आज्ञा कैसे हुई थी, पहिले जब तक श्वेत द्वीप निवासी विष्णु का कोई सम्भाषण ही नहीं हुआ था ? ।१०२। श्रीकृष्ण ने कहा—पहिले गणेश का दर्शन करने के लिए सभी देवता वहाँ गये थे । श्वेत द्वीप से शङ्कर के स्तवन से स्वयं विष्णु भी गये थे ।१०३। गणेश को देखकर परम हर्षित होकर सुखासनसे स्थित हो गये थे । वहाँ सब ने सुख पूर्वक त्रैलोक्य के मोहन कर देने वाले शरीर को देखा था ।१०४। श्रीकृष्ण कुण्डलों को धारण करने वाले तथा किरीट मस्तक पर पहिने हुए थे । पीताम्बर इनका परिधान था । परम श्रेष्ठ एवं सुन्दरतम श्याम स्वरूप था और नवीन यौवन से समन्वित थे ।१०५। इनके शरीर में

चन्दन अगुरु कस्तूरी कुंकुम का द्रव लगा हुआ था। श्रीकृष्ण उस समय में रत्नों के आभूषणों से समलंकृत और मन्द मुसकान से युक्त आपका मुख कमल था। वहाँ रत्नों के सिंहासन पर जब ये विराजमान थे तो पार्षदों के द्वारा सेवित हो रहे थे। समस्त देवागण द्वारा वन्दित एवं शिव के द्वारा स्तुत थे ।१०६-१०७।

तं दृष्ट्वा पार्वती विष्णुं प्रसन्नवदनेक्षणा।
मुखमाच्छादयामास वाससा व्रीडया सती ॥१०८
अतीवसुन्दरं रूपं दर्शं दर्शं पुनः पुनः।
ददर्श मुखमाच्छाद्य निमेषरहिता सती ॥१०९
परमाद्भुतवेशञ्च सस्मिता वक्रचक्षुषा।
सुखरागरसंमग्ना बभूव पुलकांचिता ॥११०
क्षणं ददर्श पंचास्यं शुभ्रवर्णं त्रिलोचनम्।
त्रिशूलपरिघधरं कन्दर्पकोटिसुन्दरम् ॥११
क्षण ददर्श श्यामं तमेकास्यञ्च द्विलोचनम्।
चतुर्भुजं पीतवस्त्रं वनमालाविभूषितम् ॥११२

उस समय प्रसन्न वदन और नेत्रों वाली पार्वती ने उनका दर्शन किया तो सती को लज्जा उत्पन्न हो गई थी और उस ने वस्त्र से अपने मुख को ढक लिया था ।१०८। सतीने निमेष रहित होकर श्याम सुन्दर के अत्यन्त सुन्दर रूप को बार-बार मुख ढांककर देखा था-।१०९। श्याम सुन्दर के परम अद्भुत वेष को मन्द मुस्कान वाली सती वक्र नेत्र से देखकर रोमाञ्चित होकर सुख के समुद्र में निमग्न होगई थी ।११०। फिर एक क्षण के लिए शुभ्र वर्ण वाले तथा पाँच मुखों से युक्त-तीन नेत्र धारी-त्रिशूल और पट्टिश आयुधों वाले करोड़ों कामदेवों के समान सुन्दर को देखा था और पुनः एक क्षण में उन एक मुख वाले द्विलोचन-चतुर्भुज-पीतवस्त्रधारी-वन माला से भूषित श्याम सुन्दर को देखा था ।१११-११२।

एकं ब्रह्ममूर्त्तिभेदमभेदं वा निरूपितम्।
दृष्ट्वा बभूव सा माया सकामा विष्णु मायया ॥११३

मदंशाश्च त्रयो देवा ब्रह्माविष्णु महेश्वराः ।
ताभ्या-मुत्कर्षपाताच्च श्रेष्ठःसत्वगुणात्मकः ।११४
दृष्ट्वा तं पार्वती भक्त्या पुलकांचितविग्रहा ।
मनसा पूजयामास परमात्मानभीश्वरम् ।।११५
दुर्गान्तराभिप्रायञ्च बुबुधे शंकरः स्वयम् ।
सर्वान्तरात्मा भगवानन्तर्यामी जगत्पतिः ।।११६
दुर्गाञ्च निर्जनो भूय तामुवाच हरः स्वयम् ।
बोधयामास विविधं हितं तथ्यमखण्डितम् ।।११७
निवेदनं मदीयञ्च निबोध शैलकन्यके ।
श्रृङ्गारं देहि भद्रं ते हरये परमात्मने ।।११८
अहं ब्रह्मा च विष्णुश्च ब्रह्मैकञ्च सनातनम्
देवको भेदरहितो विषयान्मूर्तिभेदकः ।।११९
सर्वेषां प्रकृतिर्ह्येका माता त्वं सर्वरूपिणी ।
स्वयम्भुवश्च वाणीत्वं लक्ष्मीर्नारायणोरसि ।।१२०
मम वक्षसि दुर्गात्वं निबोधाध्यात्मिकं सति ।
शिवस्य वचनं श्रुत्वा तमुवाच सुरेश्वरी ।।१२१

उस सती ने उन दोनों को एक ही ब्रह्मा की मूर्ति बिना भेद वाली तथा भिन्न रूप में स्थित निरूपित किया था और वह देखकर माया से सकाम होगई थी ।११३। ये तीनों देव मेरे ही अंश हैं और ब्रह्मा-विष्णु तथा महेश्वर इन नामों वाले हुएहैं । उन दोनोंमें उत्कर्ष के पात से सत्व गुणात्मक परम श्रेष्ठ हैं।११४। पार्वतीने उन परमात्मा को देखकर भक्ति से पुलकित होकर मन से पूजा की थी ।११५। शंकर ने स्वयं दुर्गाके अन्तराभिप्राय को समझ लिया था क्योंकि वे तो सभीके अन्तर्यामी सब की अन्तरात्मा जगत् के स्वामी थे ।११६। फिर दुर्गा से एकान्त में ले जाकर हर ने स्वयं कहा था और अनेक प्रकार का अखण्डित हित और तथ्य जो था उसे समझा दिया था ।११७। शङ्कर ने कहा—हे शैलकन्या ! मेरे इस निवेदन को समझलो । तुम परमात्मा हरि के लिये अपना भद्र श्रृङ्गार देदो । मैं ब्रह्मा और विष्णु एक ही

सनातन ब्रह्म हैं। ये तीनों देव भेद से रहित हैं केवल विभिन्न विषय होने के कारण ही मूर्ति का भेद है।११८-११६। इन सब की माता प्रकृति आप ही हैं जो कि सर्व रूप वाली हैं। स्वयम्भू की वाणी (सरस्वती) आप ही हैं और नारायण के उर में स्थित लक्ष्मी भी आप हैं। हे सति! मेरे वक्षःस्थल में आप ही दुर्गा के रूप में हैं। आप अपने आध्यात्मिक स्वरूप को समझ लो। शिव के इस वचन को सुनकर सुरश्वरी उनसे बोली—।१२०-१२१।

दीनबन्धो कृपासिन्धो तव मामकृपा कथम्।
सुचिरंतपसा लब्धो नाथस्त्वं जगतां मया ॥१२२
माहशीं किंकरींनाथ न परित्यक्तुमर्हसि।
अयोग्यमीदृशं वाक्य मां मा वद महेश्वर ॥१२३
तव वाक्यं महादेव पालयिष्यामि सर्वथा।
देहान्तर जन्म लब्ध्वा भजिष्यामि हरि हर ॥१२४
इत्येवं वचनं श्रुत्वा विरराम महेश्वरः।
उच्चैर्जहासाभयदः पार्वत्यै चाभयं ददो ॥१२५
तत्प्रतिज्ञापालनाय पार्वती जाम्बवद्गृहे।
लभिष्यति जनुर्धात्तर्नाम्ना जाम्बवती सती ॥१२६
शृणुनाथ प्रवक्ष्यामि किंकरीवचनं प्रभो।
प्राणा दहन्ति सततमान्दोलयति मे मनः ॥१२७
चक्षुर्निमीलनंकर्त्तुमशक्ता तव दर्शने।
त्वया विना कथं नाथ यास्यामि धरणीतलम् ॥१२८
कतिकालान्तरं बन्धो मेलनं मे त्वया सह।
प्राणेश्वर ब्रूहि सत्यं भविष्यत्येव गोकुले ॥१२९
तवदेहार्द्ध भागेन केन वाहं विनिर्मिता।
अयमेवावयोर्भेदो नास्त्यतस्त्वयि मे मनः ॥१३०
ममात्मानसःप्राणांस्त्वयिसंस्थाप्य केनवा।
तवात्ममानसःप्राणामयिवासंस्थिता अपि ॥१३१

इत्येवमुक्त्वा सा देवी तत्रैव सुरसंसदि ।
भूयोभूयो रुरोदोच्चैर्धृत्वा त्वा तच्चरणाम्बुजे ॥१३२

श्री पार्वती ने कहा—हे दीनों के बन्धो ! हे कृपा के सागर ! आप की मेरे ऊपर यह अकृपा क्यों हुई है ? मैंने तो बहुत काल तक तपस्या करके आपको प्राप्त कियाहै । हे नाथ! मुझ जैसी सेविका का आप अब त्याग करने के योग्य नहीं होते हैं । हे महेश्वर ! आप इस अयोग्य वचन को मुझसे मत कहो ।१२२-१२३। हे महादेव ! मैं आपके आज्ञा वचन को सर्व प्रकार से पालन करूँगी । हे हर ! मैं दूसरे देह में जन्म ग्रहण करके हरि का सेवन कर लूंगी ।१२४। इस पार्वती के वचन का श्रवण कर महेश्वर ने फिर कुछ भी नहीं कहा और वह अभय देने वाले बहुत जोर से हंस पड़े थे तथा पार्वतीको अभयका दान दिया था ।१२५। उस प्रतिज्ञा के पालन करने के लिए ही पार्वती फिर जाम्बवान् के घर में जन्म ग्रहण करेंगी तथा सती जाम्ववती नाम वाली होंगी ।१२६। राधिका ने कहा—हे प्रभो ! हे नाथ ! किंकरी वचन को कहती है । मेरे प्राण निरन्तर दाह करते हैं और मेरा मन निरन्तर आन्दोलित है । मैं तो आपके दर्शन में चक्षुओं का निमीलन करने में असमर्थ रहा करती हूँ ।१२७। हे नाथ मैं आपके बिना धरणी तल में कैसे जाऊंगी ? ।१२८। हे बन्धो ! कितने काल के पश्चात् मेरा आपके साथ वहाँ मिलना होगा ? हे प्राणों के ईश्वर ! आप गोकुल में कब आयेंगे—यह मुझे सत्य २ बता देने की कृपा करें ।१२९। आपके देह के किस अर्ध भाग से मैं विनिर्मित हुई हूँ । इसलिये हम दोनों का कोई भेद नहीं है । अतएव मेरा मन आप में ही संलग्न रहता है ।१३०। मेरे आत्मा-मन और प्राण किस ने आप में संस्थापित किये हैं और आपके आत्मा-मन मुझमें किसने संस्थापित कियेहैं ? ।१३१। इतना कहकर वह देवी वहां पर ही देवों की सभामें ऊँचे स्वर से फूट-फूट कर रोई । इसने अपने आपको उनकेचरण कमलोंमें रखकर बार-बार रुदन किया था ।१३२।

आध्यात्मिकंपरंयोगं शोकच्छेदनकर्त्तनम् ।
शृणुदेविप्रयक्ष्यामि योगीन्द्राणाञ्च दुर्लभम् ।१३३
आधाराधेययोः सर्वं ब्रह्माण्डं पश्य सुन्दरि ।
आधारव्यतिरेकेण नास्त्याधेयस्य सम्भवः ।१३४
फलाधारश्च पुष्पञ्च पुष्पाधारश्चपल्लवम् ।
स्कन्धश्च पल्लवाधारः स्कन्धाधारस्तरुःस्वयम् ।१३५
वृक्षाधारोऽप्यङ्कुरश्च बीजशक्तिसमन्वितः ।
अष्टिरेवाङ्कुराधाराश्चाष्ट्याधारो वसुन्धरा ।१३६
शेषोवसुन्धराधारः शेषाधारो हि कच्छपः ।
वायुश्च कच्छपाधारो वाय्वाधारोऽहमेवच ।१३७
ममाधारस्वरूपा त्वं त्वयि तिष्ठामि शाश्वतम् ।
त्वञ्च शक्तिसमूहा च मूलप्रकृतिरीश्वरी ।१३८
त्वं शरीरस्वरूपासि त्रिगुणाधाररूपिणी ।
तवात्माहं निरीहश्च चेष्टावांश्च त्वया सह ।१३९
पुरुषाद्वीर्य्यमुत्पन्नं वीर्य्यात् सन्ततिरेव च ।
तयोराधाररूपा च कामिनी प्रकृतेः कला ।१४०

श्रीकृष्ण ने कहा—हे देवि ! योगीन्द्रों का आध्यात्मिक पर योग शोक के छेदन और कीर्तन करने वाला अति दुर्लभ होता है। उसे आप श्रवण करो, मैं बतलाताहूँ ।१३३। हे सुन्दरि ! यह संपूर्ण ब्रह्मांड आधार और आधेय वाला है—ऐसा ही आप इसे देखिए। आधार के विना कभी भी आधेय सम्भव नहीं हुआ करता है ।१३४। फलों का आधार पुष्प होते हैं और पुष्पों के आधार पल्लव हैं, स्कन्ध का आधार तरु स्वयं ही होता है ।१३५। वृक्ष का आधार अंकुर है जो कि बीज की शक्ति से समन्वित होता है। यह सम्पूर्ण सृष्टि ही अंकुरके आधार वाली है और इसका आधार यह वसुन्धरा है ।१३६। शेष इस भूमि का आधार होता है तथा शेष का आधार कच्छप है। वायु कूर्म का आधार है, और उस वायु का आधार मैं स्वयं हूँ ।१३७। अब मेरे

आधार के स्वरूप वाली हे राधे ! आप शक्ति के समुदाय स्वरूप वाली मूल प्रकृति ईश्वरी हैं ।१३८। आप त्रिगुणाधार रूप वाली शरीर स्वरूपा हैं । मैं निरीह आपकी आत्मा हूँ और आपके साथ होकर मैं चेष्टा वाला होता हूँ अन्यथा निश्चेष्ट हूं ।१३९। पुरुष से वीर्य उत्पन्न होता है और उस वीर्य से संतति होती है । उन दोनों की आधार रूप वाली प्रकृति की कला कामिनी ही हुआ करती है ।१४०।

विना देहेन कुत्रात्मा क्व शरीरंविनात्मना ।
प्राधान्यञ्च द्वयोर्देवि विना द्वाभ्यां कुतोभवः ।१४१
न कुत्राप्यावयोर्भेदो राधे संसारजीवयोः ।
यत्रात्मा तत्र देहश्च न भेदो विनयेन किम् ।१४२
यथा क्षीरे च धावल्यं दाहिका च हुताशने ।
भूमौ गन्धो जले शत्यं तथा त्वयि मम स्थितिः ।१४३
त्यजाश्रुमोक्षणं राधे भ्रान्तिञ्च निष्फलां सति ।
विहाय शंकां निःशंकं वृषभानुगृहं व्रज ।१४४
कलावत्याश्च जठरे मासान् नव सुन्दरी ।
वायुना पूरयित्वा च गर्भं रोधय मायया ।१४५
दशमे समनुप्राप्ते त्वमाविर्भव भूतले ।
आत्मरूपं परित्यज्य शिशुरूपं विधाय च ।१४६
वायुनिःसरणे काले कलावत्या समीपतः ।
भूमौ विवसनीभूय पतित्वा रोदिषि ध्रुवम् ।१४७
अयोनिसम्भवा त्वञ्च भविता गोकुले सति ।
अयोनिसम्भवोऽहञ्च नावयोर्गर्भसंस्थितिः ।१४८

विना इस शरीर के आत्मा कहाँ स्थित रहेगी और आत्माके बिना यह शरीरभी स्थिर नहीं रह सकता है । हे देवि! दोनोंकी ही प्रधानता होती है । बिना इन दोनों के जन्म ही कैसे हो सकता है ।१४१। हे राधे ! संसार और जीव का हम दोनो का कहीं भी कोई भेद नही है फिर विनय से क्या है ? ।१४२। जिस तरह दूध में धवलता है और

अग्नि में दाह की शक्ति है, भूमि में गन्ध, जल में शीतलता है, वैसे ही तुम में मेरी स्थिति है ।१४३। हे राधे ! इन अश्रुओं के पात करने का आप त्याग कर देवे । हे सति ! आपकी यह भ्रान्ति बिल्कुल ही निष्फल हैं । अब आप शङ्का का त्याग कर वृषभानु के घर में जाकर जन्म ग्रहण करे ।१४४। हे सुन्दरि ! कलावती के उदर में नौ मास तक माया के द्वारा उसको पूरित करके गर्भ का रोधन करदो ।१४५। जब दशम मास हो जावे तब भूतल में आप आविर्भूत हो जाना । वहां इस अपने आत्म स्वरूप का त्याग करके एक छोटासा शिशु का स्वरूप धारण कर लेना ।१४६। गर्भ में स्थित जो वायु है उसके निकलने के समय में आप वहीं पर कलावती के समीप में भूमि में वस्त्र रहित होकर अपना पतन कर निश्चित छोटे शिशु की भाँति रुदन करने लग जाना ।१४७। आप तो अयोनि सम्भव हैं । हे सति ! और मैं भी किसी की योनिके द्वारा जन्म ग्रहण करने वाला नहीं हूँ-मैं वहां गोकुल में जाऊँगा । हम और आप दोनों ही की गर्भ में संस्थिति नहीं होती है ।१४८।

भूमिष्ठमात्रां तातो मां गोकुलं प्रापयिष्यति ।
तव हेतोर्गमिष्यामि कृत्वाकंसभयच्छलम् ।१४९
यशोदामन्दिरे माञ्च सानन्दं नन्दनन्दनम् ।
नित्यंद्रक्ष्यसिकल्याणि समाश्लेषणपूर्वकम् ।१५०
स्मृतिस्ते भविता काले मम राधिके ।
स्वच्छन्दं विहररिष्यामि नित्यं वृन्दावने वने ।१५१
त्रिःसप्तशतकोटिभिर्गोपिभिर्गोकुलं व्रज ।
त्रयस्त्रिणद्वयस्याभिः सुशीलादिभिरेव च ।१५२
संस्थाप्य संख्यारहिता गोपीर्गोलोक एव च ।
समाश्वास्य प्रबोधैश्च मितया च सुधागिरा ।१५३
अहमसंख्यान् गोपालान् संस्थाप्यात्रैव राधिके ।
वसुदेवाश्रयं पश्चाद् यास्यामि मथुरां पुनीम् ।१५४

केवल भूमि में स्थित होते ही मुझे पिता गोकुल में पहुँचा देगें। मैं वहाँ तुम्हारे ही लिए कंस के भय का छल करके जाऊँगा ।१४६। हे कल्याणि ! वहाँ यशोदा के मन्दिर में नन्द के नन्दन मुझको नित्य ही आनन्द पूर्वक आप देखा करोगी और समाश्लेषण का सुख प्राप्त करती रहोगी ।१५०। हे राधिके ! मेरे वरदान से उस समय में भी आपको पूर्ण स्मृति बनी रहेगी । मैं वहाँ वृन्दावन के वनमें स्वच्छन्दता पूर्वक नित्य विहार करूँगा ।१५१। आप तीन सौ करोड़ गोपियों के साथ गोकुल में जाओ और तैंतीस परम सुशील समवयस्क सहेलियाँ के साथ वहाँ जन्म ग्रहण करो । ।१५२। गोलोक में संख्या रहित गोपियों को संस्थापित करके अमृत तुल्य मित वाणी के द्वारा और प्रबोधो के द्वारा उन सब को समाश्वासन करके ब्रज में जाना ।१५३। हे राधिके ! मैं असंख्य गोपों को यहां संस्थापित करके पीछें मथुरापुरी में वसुदेव के घर में जाऊँगा ।१५४।

वर्षाणां शतकं पूर्णं त्वद्विच्छेदो मया सह ।
श्रीदामशापजन्येन कर्मभोगेने सुन्दरि ।१५५
भविष्यत्येव मम च मथुरागमनं ततः ।१५६
तत्र भारावतरण पित्रोर्बन्धनमोक्षणम् ।
मालाकारतन्तुवायकुब्जिकानाञ्च मोक्षणम् ।१५७
घातयित्वा च यवनं मुचकुन्दस्य मोक्षणम् ।
द्वारकायाश्च निर्माणं राजसूयस्य दर्शनम् ।१५८
उद्वाहः राजकन्यानां सहस्राणाञ्च षोडश ।
दशाधिकशतस्यापि शत्रूणां दमनन्तथा ।१५९
मित्रोपकरणञ्चैव वाराणस्याश्च दाहनम् ।
हरस्य जृम्भणं तत्र वाणस्य भुजकर्त्तनम् ।१६०
पाणिजातस्य हरणं यद् यत् कर्मान्यदेव च ।
गमनं तीर्थयात्रायां मुनिसंघप्रदर्शनम् ।१६१
सम्भाषनञ्च बन्धूनां यज्ञसम्पादनं पितुः ।
शुभक्षणे पुनस्तत्र त्वया सार्द्धं प्रदर्शनम् ।१६२

करिष्यामि च तत्रैव गोपिकानाञ्च दर्शदम् ।
तुभ्यमाध्यात्मिकं दत्वा पुनः सत्यं त्वया सह ।१६३
दिवानिशमविच्छेदो मया सार्द्धं मतः परम् ।
भविष्यति त्वया सार्द्धं पुनरापुगमनं व्रजे ।१६४
कान्ते विच्छेदसमये वर्षाणां शतके सति ।
नित्यं संमीलनं स्वप्ने भविष्यति त्वया सह ।१६५
गतस्य द्वारकां त्वत्तो मम नारायणस्य च ।
शतवर्षान्तरे साध्यान्येतान्येव सुनिनिश्चतम् ।१६६

हे सुन्दरी ! मेरे साथ आपका यह विरह सौ वर्ष तक पूर्ण होगा यह वियोग श्रीदामा के शाप से उत्पन्न होगा जोकि कर्मो का ही एक भोग के कारण से होने वाला है ।१५५। मेरा वहाँ से मथुरा को गमन होगा और ब्रज का त्याग करके मथुरा मुझे अपने जन्म के उद्‌देश्य की पूर्ति के लिए मथुरा जाना ही होगा ।१५६। वहाँ पर भूमि के भार का अतरण और माता-पिता को बन्धन से मोक्ष करना होगा । माली तन्तुवाय और कुब्जा आदि का मोक्ष करना होगा ।१५७। यवन को मार कर मुचकुन्द का मोक्ष-द्वारकापुरी निर्माण-राजसूय यज्ञ का दर्शन वहाँ जाकर करूँगा ।१५८। सोलह सहस्र राज कन्याओंके साथ विवाह एक सौ दश शत्रुओं का दमन करूँगा ।१५९। मित्रों का उपकरण (भलाई करना), वाराणसी का दाहन, हर का जृम्भण और वाण की भुजाओं का कर्त्तन करूँगा ।१६०। परिजात बृक्ष का हरण, तीर्थ यात्रा में गमन-मुनि समूह का दर्शन तथा अन्य जो-जो भी कर्म हैं उन सबको भूतल में करूँगा ।१६१। बन्धुगण के साथ सम्भाषण, पिता के यज्ञ का सम्पादन और फिर तुम्हारे साथ वहाँ पर प्रदर्शन तथा गोपिकाओंका दर्शन और तुल्य आध्यात्मिक ज्ञान देकर फिर तेरे साथमें रहूँगा ।१६२-१६३। इससें आगे तेरे साथ अहर्निश अविच्छेद होगा और तेरे साथ फिर व्रज में आगमन होगा ।१६४। हे कान्ते ! सौ वर्षों के विच्छेद का समय होनेपर फिर तुम्हारे साथ नित्यही स्वप्न में संमिलन

होगा।१६५। तुझसे द्वारका को गए हुए मेरे नारायण के अंश का सौ वर्षों के अनन्तर में गे ही सुनिश्चित साध्य हैं।१६६।

भविष्यति पुनस्तत्र वने वासस्त्वया सह ।
पुना पित्रोश्च गोपीनां शोकसम्मार्जनंपरम् ।१६७
कृत्वा भारावतरणं पुनरागमनं मम ।
त्वया सहापि गोलोकं गोपैर्गोपीभिरेव च।१६८
मम नारायणांशस्य वाण्या च पद्मया सह ।
वैकुण्ठगमनं राधे नित्यस्य परमात्मनः ।१६९
श्वेतद्वीपे धर्म्मगेहमंशानाञ्च भविष्यति ।
देवानाञ्चैव देवीनामंशा यास्यन्ति चाक्षयम् ।
पुनः संस्थितिरत्रैव गोलोके मे त्वया सह ।१७०

इसके अनन्तर पुनः तुम्हारे साथ वहाँ वन में वास होगा और फिर माता-पिता का तथा गोपियों का शोक समार्जन होगा। इस तरह से भार का अपहरण करके फिर तुम्हारे साथ और गोप-गोपियों के साथ इसी गोलोक में मेरा आगमत होगा।१६७-१६८। नारायण के अंश मेरा वाणी और पद्मा के साथ हे राधे! नित्य परमात्मा का वैकुण्ठ में गमन होगा।१६९। श्वेत द्वीप में धर्म के गृह में अंशोंका गमन होगा देवों के अंश और देवियों के अंश अक्षय हो जायेंगे।। इसके पश्चात् तुम्हारे साथ मेरी संस्थिति इसी गोलोक मे होगी।१७०।

६२—श्रीकृष्णजन्मपूर्वोपक्रमवर्णनम्

तस्यातिरिक्तं कृष्णस्य महत्पुण्यकरं परम् ।
वद जन्म महाभाग जन्ममृत्युजरापहम् ।१
वसुदेवः कस्य पुत्रः कस्य कन्या च देवकी ।
कोवा वसुदेवकी वा विवाहञ्च तयोर्वद ।२
कथं जघान कंसस्तत्पुत्रषट्कं सुदारुणः ।
कस्मिन् दिने हरेर्जन्म श्रोतुमिच्छामि तद्वद ।३

कश्यपो वसुदेवश्च देवमाता च देवकी ।
पूर्वपुण्यभलेनैव प्रापतुः श्रीहरिं सुतम् ।४
देवमीढान्मारिषायां वसुदेवो महानभूत ।
यस्योद्भवे देवसंघा वादयामास दुन्दुभिम् ।।५
आनकश्च महाहृष्टो श्रीहरेर्जनकञ्च तम् ।
सन्तः पुरातनास्तेन वदन्त्यानकदुन्दुभिम् ।।६
आहुकस्य सुतः श्रीमान् यदुवंशसमुद्भवः ।
देवको ज्ञानसिन्धुश्च तस्य कन्या च देवकी ।।७

नारद ने कहा—हे महाभाग ! उन श्री कृष्ण के महान् पुण्य के करने वाले तथा जन्म मृत्यु और जरा के हरण करने वाले परम जन्म के विषय में वर्णन कीजिए ।१। वसुदेव किसका पुत्र था और देवकी किसकी कन्या थी ? उन दोनों वसुदेव और देवकी का विवाह कैसे हुआ था—इसे बताने की कृपा करें ।२। कंस ने उनके छ पुत्रों को क्यों मार दिया था क्योंकि वह कंस राजा परम कठोर एवं दारुण था ! किस दिन हरि का जन्म हुआ था—यह मेरे श्रवण करने की अत्यन्त उत्कट लालसा है । आप इसे बताइए ।३। नारायण ने कहा-वसुदेव कश्यप ऋषि थे और देवकी देवों की जननी थी । इन दोनों ने अपने पूर्व पुण्यों के प्रभाव से ही श्री हरि को अपना पुत्र प्राप्त किया था ।४। देवमीढ से मारिषा में महान् वसुदेव ने जन्म ग्रहण किया था जिसके जन्म के समय में देवों के समूह ने दुन्दुभि बजाई थी ।५। उस समय में आनक महान् प्रसन्न हुआ था । इसीलिए श्री हरि के पिता को पुराने सन्त पुरुष आनक दुन्दुभि कहते हैं ।६। यदु के वंश में होने वाला आहुक का पुत्र श्रीमान् देवक था जो बहुत गड़ा ज्ञान का सागर था उसकी कन्या देवकी हुई थी ।७।

गर्गो यदुकुलाचार्य्यः सम्बन्धं वसुना सह ।
देवक्याः कारयामास विधिवच्च यथोचितम् ।।८

महासम्भृतसम्भारौ वसुदेवाय सक्षणे ।
उद्वाहे देवकीं तस्मै देवकः प्रददौ किल ॥९
अश्वानाञ्च सहस्राणि स्वर्णपात्राणि नारद ।
सालंकृतानां दासीनां शतानि सुन्दराणि च ॥१०
नानाविधानि द्रव्याणि रत्नानि विविधानि च ।
मणिश्रेष्ठाणि वज्राणि रत्नपात्राणि नारद ॥११
सद्रत्नभूषितां कन्यां शतचान्द्रसमप्रभाम् ।
त्रैलोक्यमोहिनी धन्यां मान्यां श्रेष्ठाञ्च योषिताम् ॥१२
तां गृहीत्वा रथे कृत्वा प्रस्थानमकरोत्तदा ॥१३
कंसो हृष्टः सहचारो भगिन्युद्वाहकर्म्मणि ।
तस्या रथसमीपे चागच्छत्कंसोऽपि तत्क्षणात् ॥१४

यदुकुल के आचार्य गर्ग ने देवकी का वसुदेव के साथ सम्बन्ध विधि के साथ यथोचित रीति से कराया था ।८। अच्छी शुभ लग्न में महान् सम्भारों से संयुत होकर देवन ने वसुदेव के लिए अपनी पुत्री देवकी को दिया ।९। हे नारद ! हजारों घोड़े और सुवर्ण से पात्र तथा अच्छी तरह से अलंकृत एवं सुन्दर सैकड़ों दासियाँ भी थी ।१०। हे नारद ! अनेक तरह के द्रव्य-विविध रत्न-भणियों में श्रेष्ठ हीरे और रत्नों के पात्र दिये थे ।११। वह देवकी अच्छे रत्नों के आभूषणों से भूषित थी—वह सौ चन्द्रों की प्रभा के समान प्रभावाली थी—त्रैलोक्य को अपने रूप लावण्य से मोहित करने वाली-धन्या-मान्या और स्त्रियों में परम श्रेष्ठ थी ।१२। ऐसी उस देवकी को ग्रहण करके रथ में बिठाकर वसुदेव ने प्रस्थान किया था ।१३। उस समय सहचर कंस अपनी बहिन के काम में परम हर्षित हो रहा था । वह कंस उस समय में वहां उसके रथ के ही समीप में आ गया था ।१४।

कंसं संबोध्य गगने वाग् बभूवाशरीरिणी ।
कथं हृष्टोऽसिराजेन्द्र शृणु सत्यवचोहितम् ।
देवक्या अष्टमो गर्भो मृत्युहेतुस्तवैव हि ॥१५

श्रुत्वैवं देवकींकंसः खड्गहस्तो महाबलः ।
दैववाक्याद्भयात् कोपात् पापिष्ठो हन्तुमुद्यतः ॥१६

तां हन्तमुद्यतं दृष्ट्वा वसुदेवः सुपण्डितः ।
बोधयामास नीतिज्ञो नीतिशास्त्रविशारदः ॥१७

राजनींतिं न जानासि शृणु मे वचनं हितम् ।
यशस्करञ्च दोषघ्नं शास्त्रोक्तं समयोचितम् ॥१८

अस्या एवाष्टमात् गर्भात् मृत्युश्चेद् तव भूमिप ।
इमां हत्वा हि दुष्कीर्त्ति करोषि नरकं च किम् ॥१९

वधे च क्षुद्रजन्तूनां हिंसकानाञ्च पण्डितः ।
कार्षापणं समुत्सृज्य मृत्युकाले प्रमुच्यते ॥२०

अहिंसकानां क्षुद्राणांवधे शतगुणं ध्रुवम् ।
प्रायश्चितं मृत्युकाले कथितं पद्मयोनिना ॥२१

उसी समय में कंस को सम्बोधित करके आकाश वाणी ने कहा था—हे राजेन्द्र ! तू इस समय में क्यों प्रसन्न हो रहा है ? अपने हितके सत्य वचन श्रवण कर—देवकी का आठवाँ गर्भ तेरी ही मृत्यु का हेतु होगा ।१५। इस प्रकार से आकाश वाणी के वचनों के द्वारा देवकी को सुनकर महान् वलवान् कंस ने हाथ में खड्ग ले लिया था । वह देवों के वचन से क्रोध से उसे मारने को तैयार हो गया था ।१६। उसे देवकी को मार देने के लिए उद्यत देखकर महान् पण्डित वसुदेव ने जो कि नीति शास्त्र के महान् पण्डित और नीति के ज्ञाता थे उसे समझाया था ।१७। वसुदेव ने कहा—राजेन्द्र आप राजनीति को नहीं जानते हैं इसलिए मेरे हितप्रद वचनों को श्रवण करो । ये वचन आपके यश के करने वाले—दोषों के नाशक-शास्त्रोक्त और समयोचित हैं ।१८। हे राजन् ! इस देवकी के आठवें गर्भ से ही यदि आपकी मृत्यु निश्चित है तो इस विचारी को मार कर क्यों अपनी अपकीर्ति और नरक कर रहे हैं ।१९। क्षुद्र जन्तुओं के और हिंसकों के वध में पण्डित कार्षापण का दान देकर मृत्युकाल में प्रमुक्त हो जाते हैं

।२०। जो अहिंसक क्षुद्र जीव हैं उनके वध करने पर सौ गुना दान करने से उस पाप का प्रायश्चित पद्मयोनि ने बताया है जो कि मृत्यु-काल में कर देना चाहिए ।२१।

वधे विशिष्टजन्तूनां पश्वादीनांच कामतः ।
ततः शतगुणं पापे निश्चितं मनुरब्रवीत् ।
नराणां म्लेच्छजातीनां वधे शतगुण ततः ।।२२
म्लेच्छानांच शतानांच यत् पापै लभते वधे ।
सच्छूद्रैकस्य च वधे तत् पापंलभेतेपुमान् ।।२३
सच्छूद्राणां षतानांच यत् पाप लभते वधे ।
ततूपाप लभते नूनं गोबधेनैव निश्चितम् ।।२४
गवां दशगुणंपापं ब्राह्मणस्य वधे भवेत् ।
विप्रहत्यासमं पापं स्त्रीवधे लेभते नरः ।।२५
विशेषतो हि भगिनी पोष्या या शरणागता ।
स्त्रीहत्याशतपापञ्च भवेत् तस्या वधेनृप ।।२६
तपोजपंच दानंच पूजनं तीर्थदर्शनम् ।
विप्राणा भोजनं होमं स्वर्गार्थं कुरुते नरः ।।२७
जलबुद्बुदवत् सर्वं स्वप्नवद्‌ भवदं भवम् ।
पश्यन्ति सततं सन्तो धर्म्मं कुर्बन्ति यत्नतः ।।२८

जो विशिष्ट जन्तु पशु आदि हैं उनका वध करने पर सौ गुना पाप होता है—ऐसा महर्षि मनु ने कहा है। मनुष्यों का जो म्लेच्छ जाति वाले हैं उनका पाप उससे सौ गुना अधिक होता है ।२२। सौ म्लेच्छों के मारने में जो पाप होता है वह अच्छे किसी शूद्र के वध से पाप मनुष्य प्राप्त करता है ।२३। सौ अच्छे शूद्रों के वध करने में जो पाप होता है वही पाप एक गायका वध कर देनेमें होता है ।२४। गाय से दश गुना पाप एक ब्राह्मण के वध में तथा उसके समान ही स्त्री वध का पाप होता है ।२५। विशेष करके स्त्री अपनी भगिनी हो जो पोषण करने के योग्य और शरण में आई हुई हो उसके वध में हे नृप !

सौ स्त्रियों के मार देने के समान पाप मनुष्यों को हुआ करता है।२६। मनुष्य स्वर्ग की प्राप्ति के लिए जप, तप, दान, पूजन, तीर्थाटन, विप्रों का भोजन होम ये सब किया करते हैं।२७। यह समस्त सांसारिक वैभव जल के बुद्बुदे के समान हैं—स्वप्न की भाँति है और भय देने वाला है। सन्त पुरुष प्रयत्न पूर्वक सदा धर्म किया करते हैं।२८।

भगिनीं च त्यज धर्मिष्ठ स्ववंशपद्मभास्कर।
बुधाः कतिविधाः सन्ति सभायां पृच्छ तान् नृप ॥२९
अस्याश्चैवाष्टमे गर्भे यदपत्यं भवेन्मम ।
बन्धो तुभ्यं प्रदास्यामि तेन मे किं प्रयोजनम्।।३०
अथवा यान्यपत्यानि भवन्ति ज्ञानिनांवर।
तानिसर्वाणिदास्यामि त्वत्तोनैकोवरं प्रियः ॥३१
भगनीं त्यज राजेन्द्र कन्यातुल्यां प्रियां तव।
मिष्टान्नपानदानेन वर्द्धितामनुजां सदा ॥३२
वसुदेववचः श्रुत्वा तत्याज भगिनीं नृपः।
वसुदेवः प्रिवां नीत्वा जगाम निजमन्दिरम् ॥३३
क्रमादपत्यषट्कञ्च यद् यद्भूतञ्छ नारद।
ददौ तस्मै वसुः सत्यात् स जघान क्रमेण तान् ॥३४
देवक्याः सप्तमे गर्भे कंसो रक्षांददौ भिया ।
रोहिणीजठरे माया तमाकृष्य ररक्ष च ॥३५

हे धर्मिष्ठ ! आप तो अपने वंश रूपी पद्म के विकसित करने में दिवाकरके समान है। आप इस समय अपनी भगिनीको छोड़ दीजिए। हे नृप ! आपको सभा में तो कितने ही प्रकार के महान् मनीषी हैं उनसे जाकर तो एक बार आप पूछ लीजिए कि क्या कर्त्तव्य है।२९। इसके आठवे गर्भ में जो भी मेरा बालक होगा हे बन्धो ! मैं उसे आपके दे दूँगा। उससे मेरा कुछ भी प्रयोजन नहीं होगा।३०। हे ज्ञानियों में श्रेष्ठ ! अथवा इससे जितनी भी मेरी सन्ततियाँ होगी उन सबको मैं आपको दे दूँगा। तुमसे अधिक मेरा कोई भी श्रेष्ठप्रिय नहीं

है।३१। हे राजेन्द्र ! आप अपनी भगिनी को छोड़ दीजिए। यह तो आपकी कन्या के समान है। इस छोटी बहिन को तो आपने सदा मिष्टान्नपान देकर इतनी बड़ी किया है।३२। इस तरह के वसुदेव के वचनों को सुनकर राजा कंस ने अपनी भगिनी को छोड़ दिया था। वसुदेव फिर अपनी प्रिया देवकी को ले जाकर अपने मन्दिर में चले गये थे।३३। इसके अनन्तर हे नारद ! क्रम से उसके छह पुत्र हुए थे और वसुदेव ने सत्य का पालन करते हुए वे सब कंस को दे दिये थे और उसने उन सबका क्रम से हनन कर दिया था।३४। देवकी के सातवें गर्भ में कंस ने भय से रक्षा दें दी थी। माया ने उस गर्भ को आकृष्ट करके रोहिणी के जठर में उसकी रक्षा की थी।३५।

रक्षकाः कथयामासुर्गर्भस्रावो बभूव ह।
तस्माद् बभूव भगवन्नाम्ना संकर्षणः प्रभुः ॥३६
तस्या एवाष्टमो गर्भो वायुपूर्णो बभूव ह ॥३७
गते च नवमे मासि दशमे समुपस्थिते।
दृष्टिं ददौ च गर्भे स भगवान् सर्वदर्शनः ॥३८
स्वयं रूपवती देवी सर्वासां योषितां वरा।
बभूव दर्शनात् सद्यः सुन्दरी सा चतुर्गुणा।३९
ददर्श देवकी कंसः प्रफुल्लवदनेक्षणाम्।
तेजसा प्रज्वलन्तीञ्च मायामिव दिशोदश।४०
ज्योतिषां संहतिचैव यथा मूर्त्तिमतीमिव।
दृष्ट्वा तामसुरेन्द्रश्च विस्मयं परमं ययौ।४१
अस्माद्गर्भादपत्यंच मृत्युबीजं ममैव च।
इत्येवमुक्त्वा कंसश्च चक्रे रक्षां प्रयत्नतः।
देवकी वसुदेवंच सप्तद्वारे ररक्ष च।४२

जो रक्षक वहाँ नियुक्य थे उन्होंने कंस से आकर कह दिया था कि गर्भ का स्राव हो गया है। इसी कारण से यह भगवान् संकर्षण इस शुभ नाम से प्रभु प्रसिद्ध हुए थे।३६। इसके पश्चात् उस देवकी के आठवाँ गर्भ वायु से पूर्ण हुआ था।३७। नौ मास बीत जाने पर

जब दशम मास उपस्थित हुआ तो सर्व दर्शन भगवान् ने उस गर्भ में अपनी दृष्टि डाली थी ।३८। उस समय में स्वयं पहिले ही से रूप वाली वह देवी थी और समस्त स्त्रियोंमें परम श्रेष्ठ थी फिर भगवान् की दृष्टि के पात से वह चौगुनी परम सुन्दरी हो गई थी ।३९। कंस ने देवकी को देखा था कि वह प्रफुल्ल मुख और लोचनों वाली थी। वह अपने तेज से जाज्वल्यमान हो रही थी और दशों दिशाओं को माया की भाँति जला सी रही थी ।४०। कंस ने उसे देखा, वह मानो ज्योतियों का समूह जैसी थी जो कि एक मूर्त्तिमती वहाँ स्थित हो रही थी । इस प्रकार की उस देवकी को देखकर असुरों के राजा कंस को बड़ा भारी विस्मय हुआ था। उसने उस समय मन में सोचा कि इस गर्भ से जो बच्चा होगा वह निश्चय ही मेरी मृत्यु का बीज है। ऐसा कहकर उस कंस ने प्रयत्नपूर्वक उसकी रक्षा की व्यवस्था करदी थी। देवकी और वसुदेव दोनों को उसने सात द्वारों में बन्द कर सुरक्षित कर दिया था ।४१-४२।

पूर्णे च दशमे मासि गर्भः पूर्णो बभूवह ।
बभूव सा चलस्पन्दा जड़रूपा च नारद ।४३
गर्भे च वायुना पूर्णे निर्लिप्तो भगवान् स्वयम् ।
हृत्पद्मदेशे देवक्या ह्यधिष्ठानं चकारह ।४४
सा विश्वम्भरगर्भा च मन्दिराभ्यन्तरे सती ।
उवास जडरूपा च क्लेशयुक्ता बभूव ह ।४५
उवास च क्षणं देवी क्षणमुत्थाय तिष्ठिति ।
क्षणं व्रजति पादकं क्षणं स्वपिति तत्रवै ।४६
दृष्ट्वा च देवकीं शीघ्रं वसुदेवो महामनाः ।
प्रसूतिसमयं दृष्ट्वा सस्मार हरिमीश्वरन् ।४७
रत्नप्रदीपसंक्तमन्दिरे सुमनोहरे ।
स्थापयामास खड्गं च लौह तोयं हुताशनम् ।४८
मन्त्रज्ञं च नरं चैव बन्धुपत्नीर्भयाकुलः ।
विद्वांस ब्राह्मणंचैव ततोबन्धूंश्च सादरम् ।४९

जब दशवाँ मास समाप्त हो गया तो वह उसका गर्भ पूर्ण होगया था। हे नारद ! वह उस समय चल स्पन्दा और जड़ रूप वाली हो गई थी।४३। यायु से पूर्ण गर्भ में भगवान् स्वयं निर्लिप्त थे। उन्होंने देवकी के हृदय रूपी कमल के भाग में अपना अधिष्ठान किया था।४४। वह विश्वम्भर को गर्भ में रखने वाली सती उस मन्दिरके अन्दर जड़ रूप वाली रहती थी और क्लेश से युक्त थी।४५। वह देवी एक क्षथ में बैठ जाती थी फिर एक क्षण में उठकर खड़ी होती थीं—क्षण भर में जानती थी और क्षण में ही सो जाया करता थी।४६। महान् मन वाले वसुदेव ने ऐसी स्थिति में रहने वाली देवकी को देखकर यह समझ लिया था कि अब शीघ्र ही प्रसव का समय उपस्थित होने वाला है। उस समय वसुदेव ने श्री हरि का स्मरण किया था।४७। रत्नों के प्रदीप से संयुक्त सुमनोहर मन्दिर में खड्ग, लौह, जल और अग्नि की स्थापना की थी।४८। भयाकुल होते हुए वसुदेव ने मन्त्रज्ञ, नर-बन्धु की पत्नियाँ और विद्वान् ब्राह्मण तथा बन्धुओं को आदर के सहित वहाँ संस्थित किया था।४६।

एतस्मिन्नन्तरे तस्यां रात्रौ द्विप्रहरेगते।
व्याप्तंच गगन मेघैः क्षणद्युतिसमन्वितैः।५०
ववुश्च वायवश्चेष्टा ययुर्निद्रांच रक्षकाः।
अचेष्टिताश्च शयने मृता इव विचेतनाः।५१
एतस्मिन्नन्तरे तत्र वाजग्मुस्त्रिदशेश्वराः।
तुष्टुवुर्धम्र्मंब्रह्मेशा गर्भस्थं परमेश्वरम्।।५२
जगद्योनिरयोनिस्त्वमनन्तोऽव्यय एव च।
ज्योतिः स्वरूपो ह्यनघः सगुणोनिर्गुणोमहान्।।५३
भक्तानुरोधात् साकारो निराकारो निरंकुशः।
स्वेच्छामयश्च सर्वेश सर्व सर्वगुणाश्रयः।।५४
सुखदो दुःखदो दुर्गो दुर्जनान्तक एव च।
निर्व्यूहो निखिलाधारो निःशंको निरुपद्रवः।।५५

निरुपाधिश्च निर्लिप्तोनिरीहो निधनान्तकः ।
स्वात्मारामः पूर्णकामोनिर्दोषो नित्यएवच ॥५६
सुभगो दुर्भगो वाग्मी दुराराध्यो दुरत्ययः ।
वेदहेतुश्च वेदश्च वेदाङ्गो वेदविद्विभुः ॥५७
इत्येवमुक्त्वा देवाश्च प्रणेमुश्च मुहुर्मुहुः ।
हर्षाश्रुलोचनाः सर्वे ववर्षुः कुसुमानि च ॥५८
द्विचत्वारिंशन्नामानि प्रातरुत्थाय यः पठेत् ।
दृढां भक्तिं हरेदास्यं लभते वांछितं फलम् ॥५९

इसी बीच में उस रात्रि में दो पहर व्यतीत हो जाने पर समस्त आकाश मण्डल विद्युत् से युक्त मेघों से व्याप्त हो गया था ।५०। श्रेष्ठ बायु बहने लगी थी और जो वहाँ रक्षकथे वे सब निद्रा को प्राप्त हो गये थे ।५१। इसी अन्तर में वहाँ पर देवगण आ गये थे । धर्म, ब्रह्मा और ईश आदि सब ने गर्भ में स्थित परमेश्वर की स्तुति की थी ।५२। देवों ने कहा—हे भगवन् ! आप इस जगत् के जन्म देने वाले हैं और स्वयं अयोनि हैं । आप अनन्त, अव्यय, ज्योति-स्वरूप, अनघ,सगुण,निर्गुण और महान् हैं । आप निराकर और निरंकुश होते हुए भी भक्तों के अनुरोध से आकार वाले हुआ करते हैं । आप स्वेच्छा से परिपूर्ण, सबके ईश, सर्व ओर समस्म गुणों के आश्रय हैं ।५३-५४। आप सुख-दुःख के देने वाले, दुर्ग और दुर्जनों का अन्त कर देने वाले हैं । आप निर्व्यूह, सबके आधार-निःशक एवं निरुपद्रव हैं ।५५। आप बिना उपाधि वाले, निर्लिप्त, निरीह, निध्रन के भी अन्स कर देने वाले हैं । आप स्वात्मा में ही रमण करने वाले, पूर्ण काम, दोषों से रहित और नित्य है ।५६। आप सुभग, दुर्भग, वाग्मी, पुराराध्य, दुरत्यय,वेदों के हेतु, वेद, वेदों के अङ्ग, वेदों के ज्ञाता और विभु हैं।५७। इतना कह कर देवों ने बार-बार प्रणाम किया था । सबने हर्षातिरेक युक्त नेत्रों से अश्रुपात करते हुत आकाश मण्डल से पुष्पों की वृष्टि की थी ।५८। भगवान् के इन बयालीस शुभ नामों को जो देवों ने स्तवन में

कहे थे जो कोई प्रातःकाल मे उठकर पाठ करता है वह दृढ़ भक्ति, हरि का दास्य और वाञ्छित फल प्राप्त किया करता है ।५६।

इत्येवं स्तवनं कृत्वा देवास्ते स्वालयं ययुः ।
बभूव जलवृष्टिश्च निश्चेष्टा मथुरा पुरी ।
घोरान्धकारनिविडा बभूव यामिनी मुने ॥६०
गते सप्तमुहूर्ते तु चाष्टमे समुपस्थिते ॥६१
वेदातिरिक्ते दुर्ज्ञेये सर्वोत्कृष्टे शुभेक्षणे ।
शुभग्रहैर्दृष्टलग्नेऽप्यदृष्टे चाशुभग्रहैः ॥६२
अर्द्धरात्रे समुत्पन्ने रोहिण्यामष्टमीतिथौ ।
जयन्तीयोगयुक्ते च चार्द्धचन्द्रोदये मुने ॥६३
दृष्ट्वा दृष्ट्वा क्षणं लग्नं भीताः सूर्य्यादयस्तथा ।
गमने क्रममुल्लङ्घ्य जग्मुर्मीनं शुभाशुभाः ॥६४
सुप्रसन्ना ग्रहाः सर्वं बभूवुस्तत्र संस्थिताः ।
एकादशस्थास्ते प्रीत्या मुहूर्तं धातुराज्ञया ॥६५

नारायण ने कहा— इस तरह से भगवान् का स्तवन करके वे सब देवता अपने निवास स्थान को चले गये थे । फिर घोर जल की वृष्टि हुई थी जिससे सम्पूर्ण मथुरापुरी चेष्टा हीन हो गई थी । हे मुने ! वह रात्रि घोर अन्धकार से एक दम निविड़ हो गई ।६०। सात मुहूर्त्त के व्यतीत हो जाने पर और अष्टम मुहूर्त्त के सम्प्राप्त होने पर वेदातिरिक्त-दुर्ज्ञेय-सबसे उत्कृष्ट शुभ क्षण के आजाने पर जो कि शुभ ग्रहों के द्वारा लग्न दृष्ट था और अशुभ ग्रहों से अदृष्ट था, आधी रात में-रोहिणी नक्षत्र में अष्टमी तिथि में जयन्ती के योग से युक्त अर्घ चन्द्र के उदय होने का समय उपस्थित हो गया था ।६१-६३। उस समय लग्न को देख-देखकर सूर्य आदि ग्रह सब बड़े भयभीत हो रहे थे । वे सब गमन में क्रम का उल्लंघन करके शुभाशुभ मीन में चले गये थे ।६४। वहाँ पर स्थित होकर सभी ग्रह सुप्रसन्न थे और वहाँ संस्थित हो गये थे । धाता की आज्ञा से मुहूर्त्त भर प्रीति से एकादश भाव में स्थित हो गये थे ।६५।

ववर्षुश्च जलधरा बबुर्वाताः सुशीतलाः ।
सुप्रसन्ना च पृथिवी प्रसन्नाश्च दिशो दश ।६६
ऋषयो मनवश्चैव यक्षगन्धर्वकिन्नराः ।
देवा देव्यश्च मुदिता ननृतुश्चाप्सरोगणाः ।६७
जगुर्गन्धर्वपतयो विद्याधर्य्यश्च नारद ।
सुखेन शुस्र ुवुर्नद्यो जज्वलुश्चाग्नयो मुदा ।६८
नेदुर्दुन्दुभयःस्वर्गे चानकाश्च मनोरमाः ।
प्रफुल्लपारिजातानां पुष्पवृष्टिर्बभूव ह ।६९
जगाम सूतिकागेहं नारीरूप विधाय भूः ।
जयशब्दः शङ्खशब्दो हरिशब्दो बभूव ह ।।७०
एतस्मिन्नन्तरे तत्र पपात देवकी सती ।
निःससार च वायुश्च देवकीजठरात्ततः ।।७१
तत्रैव भगवान् कृष्णो दिव्यरूपं विधाय च ।
हृत्पद्मकोषाद् देवक्या हरिराविर्बभूव ह ।।७२

उस सुसमय में मेघ वर्षा कर रहे थे वायु सुशीतल वहन कर रहा था पृथिवी बहुत ही प्रसन्न हो रही थी और दशों दिशाऐं प्रसन्न थीं ।६६। ऋषि-मुनि-मनु-यक्ष-गन्धर्व-किन्नर-देव और देवियाँ सभी आनन्दित हो रहे थे और अप्सराएं नृत्य कर रही थीं ।६७। गन्धर्व पति गान कर रहे थे । हे नारद ! विद्याधरी गायन कर रहीं थी और नदियां सुख से वह रहीं थीं तथा अग्नि आनन्द से ज्वलित हो रही थी ।६८। स्वर्ग में दुन्दुभियाँ बजाई जा रही थीं । विकसति पारिजातों के पुष्पों की वृष्टि हो रही थी ।६९। उस समय भूमि नारी का स्वरूप धारण करके सूतिका गृह में गई थी । उस शुभ समय में सर्वत्र जय शब्द शंख ध्वनि और हरि शब्द का उच्चारण हो रहा था ।७०। इसी समय वहाँ पर सती देवकी लेट गई थी और देवकी के उदर से वायु निकल पड़ी थी ।७१। वहाँ ही भगवान् कृष्ण दिव्य रूप धारण करके देवकी के हृत्पद्म कोष से आविर्भूत हो गये थे ।७२।

अतीवकमनीयञ्च शरीरं सुमनोहरम् ।
द्विभुजं मुरलीहस्तं स्फुरन्मकरकुण्डलम् ॥७३
ईषद्धास्य प्रसन्नास्यं भक्तानुग्रहकातरम् ।
मणिरत्नेन्द्रसाराणां भूषणैश्च विभूषितम् ॥७४
नवीननीरदश्यामं शोभितं पीतवाससः ।
चन्दनागुरुकस्तूरीकुङ्कुमद्रवचर्चितम् ॥७५
शरत्पार्वणचन्द्रास्यं विम्बाधरमनोहरम् ।
मयूरपुच्छचूडञ्च सद्रत्नमुकुटोज्ज्वलम् ॥७६
त्रिभङ्गवक्रमध्यञ्च वनमालाविभूषितम् ।
श्रीवत्सवक्षसं चारुकौस्तुभेन विराजितम् ।
किशोरवयसं शान्तं कान्तं ब्रह्मेशयोः परम् ॥७७
ददर्श वसुदेवश्च देवकीपुरतो मुने ।
तुष्टाव परमा भक्तया विस्मयं परमं ययौ ॥७८
पुटाञ्जलियुतो भूत्वा भक्तिनम्रास्यकन्धरः ।
अश्रुपूर्णः सपुलको देवक्या च स्त्रिया सह ॥७९

उस समय उस दिव्य शिशु रूपधारी भगवान् श्री हरि का स्वरूप अत्यन्त ही सुन्दर था-सर्वाङ्ग परम मनोहर था। उनके दो भुजाऐं थीं मुरली हाथ में थी मकर की आकृति वाले कुण्डल देदीप्यमान हो रहे थे ।७३। मन्द हास्य से युक्त प्रसन्न उनका मुख था तथा भक्तों पर अनुकम्पा करने के लिए अतीव आतुर थे। श्रीकृष्ण का वपु श्रेष्ठ मणि और रत्नों से बने भूषणों से समलंकृत था ।७४-७५। शरत्पूर्णिमा के चन्द्र के समान मुख था। विम्बफल के तुल्य श्री कृष्ण के मनोहर अधर थे। मोर की पंख जूड़ा में सलग्न थी और उत्तम रत्नों से निर्मित मुकुट की प्रभा से समुज्ज्वल मस्तकथा ।७६। त्रिभग वक्र मध्य भागवाले थे तथा वनमाला से विभूषित थे। उनके वक्षस्थल में श्रीवत्स का चिन्ह था तथा सुन्दर कौस्तुभ मणि से शोभायमान थे। किशोर अवस्था वाले

परम शान्त और ब्रह्मा तथा ईश के परम कान्त थे ।७७। हे मुने ! ऐसे श्रीहरि को वसुदेव ने देवकीके सामने देखाथा और फिर अत्यन्त भक्ति के भाव से उनका वसुदेव ने स्तवन किया था । ऐसे परम अद्भुत का दर्शन करके वसुदेव को अत्यधिक आश्चर्य हुआथा ।७८। इसके अनन्तर वसुदेव अपनी अञ्जलिपुट को बाँधकर अर्थात् हाथ जोड़ भक्ति की भावना से नीचे की ओर कन्धरा वाले हो गये थे । उनके नेत्रोंसे प्रेमाश्रुओं की झड़ी लग रही थी तथा समस्त शरीर रोमांचित हो गया था । वे अपनी पत्नी देवकी को साथ में लेकर श्रीहरि से प्रार्थना करने लगे थे ।७९।

श्रीमन्तमिन्द्रियातीतमक्षरं निर्गुण विभुम् ।
ध्यानासाध्यञ्च सर्वेषां परमात्मानमीश्वरम् ॥८०
स्वेच्छामयं सर्वरूपं स्वेच्छारूपधरं परम् ।
निर्लिप्तं परमं ब्रह्म बीजरूपं सनातनम् ॥८१
स्थूलात् स्थूलतरं व्याप्तमतिसूक्ष्मदर्शनम् ।
स्थितं सर्वशरीरेषु साक्षिरूपमदृश्यकम् ॥८२
शरीरवन्तं सगुणमशरीरं गुणोत्करम् ।
प्रकृतिं प्रकृतीशञ्च प्राकृतं प्रकृतेः परम् ॥८३
सर्वेशं सर्वरूपञ्च सर्वान्तकरमव्ययम् ।
सर्वाधारं निराधारं निर्व्यूहं स्तौमि किं विभो ॥८४

वसुदेव ने कहा—हे भगवन् ! आपकी मैं क्या स्तुति करू आप तो श्रीमान्-इन्द्रियों की पहुँच से भी परे हैं । आपका स्वरूप अक्षर-निर्गुण-विभु-ध्यान से न साधना के योग्यहै आप सबके परत्मात्मा और ईश्वर हैं ।८०। आप स्वेच्छामय-सबके रूप-वाले-अपनी ही इच्छासे रूप धारण करने वाले-पर-निर्लिप्त-परमब्रह्म-बीज रूप वाले तथा सनातन हैं ।८१। हे भगवन् ! आप स्थूल से भी स्थूल और सूक्ष्म-अदर्शन एवं व्याप्त हैं । आप सबके शरीरों में संस्थित-सबके साक्षी रूप वाले और स्वयं अदृश्य हैं ।८२। आप शरीर धारी-सगुण तथा बिना शरीर वाले गुणों के भण्डार हैं । आप स्वयं प्रकृति के रूप वाले और प्रकृति के ईश

है । आपका स्वरूप प्राकृत है और आप प्रकृति से भी परे हैं ।८३। हे भगवन् ! आप सबके स्वामी और सबके स्वरूप वाले हैं-सबके अन्त करने वाले तथा अव्यय हैं आप सबके आधार और स्वयं विना आधार वाले हैं ? आप निर्व्यूह है ।८४।

अनन्तः स्तवनेऽशक्ता देवी सरस्वती ।
यं स्तोतुमसमर्थश्चपञ्चवक्त्रःषडाननः ॥८५
चतुर्मुखो वेदकर्त्ता यं स्तोतुमक्षमः सदा ।
गणेशो न समर्थश्च योगीन्द्राणां गुरोर्गुरुः ॥८६
ऋषयो देवताश्चैव मुनीन्द्रमनुमानवाः ।
स्वप्ने तेषामदृश्यञ्च त्वामेवं किं स्तुवन्ति ते ॥८७
श्रुतयः स्तवनेऽशक्ताः किं स्तुवन्ति विपश्चितः ।
विहायैवं शरीरञ्च बालो भवितुमर्हसि ॥८८
वसुदेवकृतं स्तोत्रं त्रिसन्ध्यं यः पठेन्नरः ।
भक्तिदास्यमवाप्नोति श्रीकृष्णचरणाम्बुजे ॥८९
विशिष्टपुत्रं लभते हरिदासं गुणान्वितम् ।
संकटं निस्तरेत् तूर्णं शत्रुभीत्या प्रमुच्यते ॥९०

आपकी स्तुति करने में शेष अशक्त है और साक्षात् वागधिष्ठात्री देवी सरस्वती भी असमर्थ हैं । और ऐसे हैं कि जिनका स्तवन करने में पञ्च वक्त्र शिव और षडानन स्वामी कार्तिकेय भी असमर्थ हैं ।८५। चार मुखों वाले वेदों के निर्माता ब्रह्मा भी सदा आपकी स्तुति करने में अशक्त होते हैं । योगीन्द्रों के गुरु गणेश भी आपका स्तवन करने में कभी समर्थ नहीं होते हैं । अन्य ऋषिगण-देव वर्ग—मुनीन्द्र मनुगण और मानव जो हैं उनको तो आप स्वप्न में भी संशय नही हुआ करते हैं वे आपकी क्या स्तुति कर सकतेहैं ।८६-८७।श्रुतियाँ जब आपकी स्तुति करने में क्षमता नहीं रखती है तो विचारे बिद्वान क्या स्तवन कर सकते हैं । आप अब इस दिव्य शरीर का त्याग करके बाल स्वरूप वाले होने के योग्य हैं ।८८। इस वसुदेव के द्वारा किए हुए

स्तोत्र को जो तीनों समयों में पढ़ता है वह भक्ति और दास्य श्री कृष्ण चरण कमल में अवश्य ही प्राप्त करता है।८९। इस स्तोत्र का पाठ करने वाला पुरुष श्रीहरि के दास पुत्र की प्राप्ति करता है जो सभी सद्गुणों से समन्वित होता है। इस स्तोत्र के पढ़ने वाला संकटोंसे निस्तार पा जाता है।९०।

वसुदेववचः श्रुत्वा तमुवाच हरिः स्वयम्।
प्रसन्नवदनः श्रीमान् भक्तानुग्रहकातरः ॥९१
तपसाञ्च फलेनैव पुत्रोऽहं तव साम्प्रतम्।
वरं वृणुष्व भद्रन्ते भविष्यति न संशयः ॥९२
पुरा तपस्विनां श्रेष्ठः सुतपास्त्वं प्रजापतिः।
पत्न्यासहतपस्विन्यातपसाराधितस्त्वया ॥९३
पुत्रोमत्सदृशस्तत्र दृष्ट्वा माञ्च वृतो वरः।
मयादत्तो वरस्तुभ्यं मत्समो भविता सुतः ॥९४
दत्वा तुभ्यं वरं तात मनसालोच्य चिन्तितम्।
मत्समो नास्ति भुवने पुत्रोऽहं तेन हेतुना ॥९५
तपसां च प्रभावेण त्वमेव कश्यपः स्वयम्।
सुतपा देवमातेयमदितिश्च पतिव्रता ॥९६
अधुना कश्यपांशस्त्वं वसुदेवः पिता मम।
देवकी देवमातेयमदितेरंशसम्भवा ॥९७
त्वत्तोऽदित्यां वामनोऽहं पुत्रस्तेंऽशेन सम्भवः।
अधुना परिपूर्णोऽहं पुत्रस्ते तपसः फलात् ॥९८

नारायण ने कहा—वसुदेव के इस वचन को सुन कर श्रीहरि स्वयं उससे बोले जिनका मुख एक प्रसन्न था और शोभा से सम्पन्न तथा भक्तों पर अनुग्रह करने में आतुर थे-श्रीकृष्ण ने कहा—आपकी तपस्याओं के फल से ही मैं पुत्र रूप में अब प्राप्त हुआ हूँ। तुम जो भी चाहो मुझसे वरदान मांग लो। आपका कल्याण होगा—इसमें तो कुछ भी संशय नहीं है। ।९१-९२। पहिले तपस्वियों में परम श्रेष्ठ सुन्दर

तप करने वालेमें परम श्रेष्ठ सुन्दर तप करने वाले आप प्रजापति थे। आपने अपनी तपस्विनी पत्नी के सहित तपस्या के द्वारा मेरी आराधना की थी।९३। वहाँ पर मेरा दर्शन करके आपने मेरा जैसा ही पुत्र माँगा था। मैंने वरदान तुमको दे दिया था कि मेरा जैसा ही पुत्र होगा।९४। वरदान मैं दे चुका था किन्तु हे तात! फिर मैंने मन में विचार किया था और सोचा तो कि मेरा जैसा भुवन में अन्य कोई नहीं है।९५। तपों के प्रभाव से तुम स्वयं कश्यप सुतपा और देवमाता पतिव्रता है। इस समय कश्यप का अंश मेरे पिता आप वसुदेव हुए हैं और अदिति में मैं वामन पुत्र अंश से जन्मा था। किन्तु इस समय तो तप के फल से मैं पूर्ण ही आपका पुत्र हो गया हूँ।९८।

मांवात्वं पुत्रभावेन ब्रह्मभावेन वा पुनः।
मां प्राप्तोऽसि महाप्राज्ञजीवन्मुक्तोभविष्यसि ॥९९
यशोदाभवनं शीघ्रं मां गृहीत्वा व्रजं व्रज।
संस्थाप्यतत्रमांतात मायामादाय स्थापय ॥१००
इत्युक्त्वा श्रीहरिस्तत्र बालरूपो बभूव ह।
नग्नं भूमौ शयानञ्च ददर्श श्यामलं सुतम् ॥१०१
दृष्ट्वा स बालकं तत्र मोहितो विष्णुमायया।
किंवा कूटञ्च तन्द्रायामपूर्वं सूतिकागृहे ॥१०२
इत्युक्त्वा वसुदेवश्च समालोच्य स्त्रिया सह॥
गृहीत्वा बालकं क्रोडे जगाम नन्दगोकुलम् ॥१०३
गत्वा नन्दव्रजं शीघ्रं विवेश सूतिकागृहम्।
ददर्श शयने न्यस्तां यशोदां निद्रयान्वितम्।
निन्द्रान्वितञ्च नन्दञ्च सर्वं तत्र गृहे स्थितम् ॥१०४

अब तुम मुझको चाहे पुत्र भावसे अथवा ब्रह्म भाव से समझो किन्तु हे महाप्राज्ञ! अब आप मुझको प्राप्त हो गए हो और जीवन्मुक्त हो जाओगे।९९। इस समय तुम मुझको अति शीघ्र व्रज में यशोदा के

घर में ले चलो। वहां मुझको संस्थापित कर। हे तात! माया को लाकर यहाँ स्थापित कर दो।१००। इतना वसुदेव से कहकर श्रीहरि उसी समय बाल रूह वाले हो गये थे। फिर वसुदेव ने नग्न भूमि में लेटे हुए स्यामल सुत को देखा था।१०१। उस बालक को वहाँ देख कर वह विष्णु की माया से मोहित हो गए थे। सूतिका गृह में तन्द्रा में वह कूटोक्ति (गूढ़ वचन) थी, यह कहकर वसुदेव ने अपनी पत्नी के साथ विचार किया और गोदमें उस बालकको लेकर नन्द के गोकुल को चले गए थे।१०२-१०३। नन्द व्रज में जाकर वसुदेव ने सूतिका गृह में शीघ्र प्रवेश किया था और नन्द भी निद्रा से युक्त थे और सभी जो वहाँ घर में थे निद्रित हो रहे थे।१०४।

ददर्श बालिकां नग्नां तप्तकाञ्चनसन्निभाम्।
ईषद्धास्यप्रसन्नास्यां पश्यन्तीं गृहशेखरम्॥१०५
तां दृष्ट्वा वसुदेवश्च विस्मयं परमं ययौ॥१०६
संस्थाप्य तत्र पुत्रञ्च कन्यामादाया सत्वरम्।
जगाम मथुरां त्रस्तः स्वकान्तासूतिकागृहम्॥१०७
स्थापयामास तत्रैव महामायाञ्चबालिकाम्।
रोरुद्यमानां तामेव दृष्ट्वा त्रस्ता च देवकी॥१०८
रोदनेनैव सा बाला बोधयामास रक्षकान्।
उत्थाय रक्षकाः शीघ्रं जगृहुर्बालिकां तदा॥१०९
गृहीत्वा बालिकां ते च प्रजग्मुः कंससन्निधिम्।
जगाम देवकी पश्चात् वसुदेवश्च शोकतः॥११०
दृष्ट्वा बालिकां कंसो नातिहृष्टो महामुने।
रोरुद्यमानां कल्याणीं तद्दया न बभूव ह॥१११
तां गृहीत्वा च पाषाणे हन्तुं यान्तं सुदारुणम्।
ऊचतुर्वसुदेवश्च देवकी परमादरम्॥११२
भो भो कंस नृपश्रेष्ठ नीतिशास्त्रविशारद।
निबोध वाक्यं सत्यञ्च नीतियुक्तं मनोहरम्॥११३

हत्वावयोः पुत्रषट्कं दया ते नास्ति बान्धव ।
अधुना चाष्टमे गर्भे बालिकामबलां मम ॥११४
हत्वा किं ते महैश्वर्य्यं भविष्यति महीतले ।
स्त्रीमेव हन्तुमबलां किं क्षमा रणमूर्द्धनि ॥११५
इत्येवमुक्त्वा तं वसुदेवकी च सभातले ।
रुरोद पुरतस्तत्र कंसस्य च दुरात्मनः ॥११६
कंसस्तयोर्वचः श्रुत्वा तामुवाच सुदारुणः ।
शृणु वाक्यं मदीयञ्चनिबोध बोधयामि ते ॥११७

वसुदेव ने उसे देखकर आश्चर्य किया था कि वहाँ उसने एक नग्न बालिका को देखा था जो तपे हुए स्वर्ण के समान कान्ति वाली थी तथा वह गृहशेखर को देख रही थी ।१०५-१०६। वसुदेव ने पुत्र को वहाँ रखकर और कन्या को लेकर शीघ्र ही मथुरा को प्रस्थान किया था और डरते हुए अपनी कान्या के सूतिका गृह में आ गये थे ।१०७। वहाँ आकर महामाया बालिका को स्थापित कर दिया उसे बार-बार रुदन करती हुई को देखकर देवकी बहुत त्रस्त हुई थी ।१०८। अपने रोदन के द्वारा ही उस बालिका ने रक्षकों को जगा दिया था । रक्षक शीघ्र ही उठे और उन्होंने उसी समय उस बालिका को ले लिया था ।१०९। वे उस बालिका को ग्रहण करके कंस के समीप में पहुँच गए थे । उनके पीछे देवकी और वसुदेव भी शोक विवश होकर वहाँ गए थे ।११०। हे महामुने ? उस बालिका को देख कर कंस अति प्रसन्न नहीं हुआ था । वह उस समय रो रही थी किन्तु उस कल्याणी के प्रति उसको दया नहीं हुई थी । उस कन्या को लेकर पाषाण पर मारने के लिए जाते हुए कंस से अत्यन्त दारुण कंठ से वसुदेव और देवकी आदर के साथ बोले—।१११-११२। हे कंस ! हे नीति शास्त्र के महापण्डित ! सत्य और नीति से युक्त वाक्य को जो अति सुन्दर हैं समझलो ।११३। हे बान्धव ! आपने हमारे छह पुत्रों को मार दिया है अभी भी आपको दया नहीं होती है । अब तो आठवें

नारायण ने कहा—अध्यात्मिक एक महान् योग है जिसे योगिगण भी नहीं जाना करते हैं। वह महायोग अनेक प्रकारों वाला होता है जिन्हें स्वयं हरि ही जानते है।२८। हे महामुने ! राधिकेश्वर ने जो लोक में कुछ थोड़ा-सा वह आध्यात्मिक योग अत्यन्त प्रसन्न होते हुए त्रिपुरारि शिव से कहा था।२९। वह शिव एक सहस्र इन्द्र अपने समय का उपभोग कर-करके जब उनका निपात हो जावे—इतने लम्बे समय तक तपस्या करते रहे थे—ऐसे ईश्वर वैष्णवों में सबसे बड़े और तपस्वियों में सबसे श्रेष्ठ थे। पुष्करमें दुष्कर तप करके पाद्ममें पाद्मको पद्मज ने देखा था। उस समय में उनको आदर करके उसने कुछ कहा था।३०-३१। इसी प्रकार से शत इन्द्रों के पात तक कठोर तप से कृश उदर वाले—चेष्टा से रहित—अस्थियाँ मात्र शेष रह जाने वाले—धर्मियों में श्रेष्ठ धर्म से सिंह क्षेत्र में कृपा करके कृपा के निधि ने कुछ थोड़ा सा आध्यात्मिक महायोग बताया था। चौदह इन्द्रोंके पात पर्यन्त तपस्या करनेसे अत्यन्त कृश उदर वालेसे कृपा के सागरने कुछ आध्यात्मिक महायोग कृपा करके पढ़ा था। इसी प्रकारसे शतेन्द्रावच्छिन्न तप करने वालों को उन्होंने कुछ-कुछ बताया था।३२-३४।

किञ्चित् सनत्कुमारञ्च तपन्तं सुचिरं परम् ।
सुतपन्तमनन्तंच किंचिच्चोवांच नारद ।३५
चिरं तपन्तं कपिलं हिमशैले तपस्विनम् ।
पुष्करे भास्करे कि चित्तपन्तं दुष्करं तपः ॥३६
उवाच किंचित् प्रह्लादं किंचिद् दुर्वाससं भृगुम् ।
एवंनिगूढभक्तं चक्रपया भक्तवत्सलः ॥३७
कीड़ासरोवरे रम्ये यदुवाच कृपानिधिः ।
शोकार्ता राधिकां तच्च कथयामि निशामय ॥३८
विरसां रसिकां दृष्ट्वा वासयित्वा च वक्षसि ।
उवाचाध्यात्मिकं किंचिद् योगिनीं योगिनां गुरुः ॥३९
जातिस्मरे स्मरात्मानं कथं विस्मरसि प्रिये ।
सर्वंगोलोकवृत्तान्तं सुदाम्नः शापमेवच ॥४०
शापात् किंचिद्दिनं त्वद्विच्छेदो मया सह ।
भविष्यति महाभागे मेलनं पुनरावयोः ॥४१
पुनरेवगमिष्यामि गोलोकं तं निजालयम् ।
गत्वा गोपाङ्गनाभिश्च गोपैर्गोलोकवासिभिः ॥४२

बहुत समय तपस्या करने वाले सनत्कुमार से और हे नारद ! अच्छी तरह से तप करने वाले अनन्त से कुछ भगवान् ने यह महायोग बोला था ।३५। हिमालय पर्वत पर चिरकाल तक परम तपस्वी तप करने वाले कपिल को कुछ कहा था तथा भास्कर पुष्कर में दुष्कर तपस्या करने वाले प्रह्लाद को—दुर्वासा को और भृगु को जो इस प्रकार से परम निगूढ़ तथा मन्द थे भक्त वत्सल ने यह आध्यात्मिक महायोग थोड़ा सा वताया था ।३६-३७। रम्य क्रीड़ा सरोवर में शोक से अत्यन्त आर्त राधिका को जो कृपा के निधि प्रभु ने कहा था उसे अब मैं तुमसे कहता हूँ उसका तुम श्रवण करो ।३८। उस परम रसिका राधा को विगत रस वाली देखकर उसे अपने वक्षःस्थल पर संस्थित कराकर योगिनीको योगियों के गुरु ने कुछ थोड़ा सा आध्यात्मिक महायोग

बोला था ।३९। श्रीकृष्ण ने कहा—हे जातिस्मरे ! हे प्रिये ! तुम अपने आपको स्मरण करो । इस समय कैसे अपनी आत्मा को तुम भूल रही हो । वह जो गोलोक में समस्त वृत्तान्त घटित हुआ था और सुदामाके द्वारा तुमको शाप दिया गया था ।४०। हे प्रिये ! हे दीने ! कुछ समय तक तो अवश्य ही मेरे साथ तुम्हारा विच्छेद होगा किन्तु हे महाभागे! फिर हम दोनों का मिलना हो जायगा ।४१। फिर उसी अपने आलय नित्यधाम गोलोक को चला जाऊंगा और वहाँ सभी गोपाङ्गनाएं गोप जो गोलोक के वास करने वाले हैं एकत्रित हो जायेंगे ।४२।

अधुनाध्यात्मिकं किंचित् त्वां वदामि निशामय ।
शोकघ्नंहर्षदं सारसुखदं मानसस्यच ।।४३
अहं सर्वान्तरात्मा च निर्लिप्तः सर्वंकर्मसु ।
विद्यमानश्च सर्वेषु सर्वत्राहृष्ट एव च ।।४४
बायुश्चरयि सर्वत्र यथैव सर्ववस्तुषु ।
न च लिप्तस्तथैवाहं साक्षी च सवकर्मणाम् ।।४५
जीवो मत्प्रतिविम्वश्च सर्वं सर्वत्र जोविषु ।
भोक्ता शुभाशुभानांच कर्ताच कर्मणां सदा ।।४६
यथा जलघटेष्वेव मण्डलं चन्द्रसूर्ययोः ।
भग्नेषु तेषु सैश्लिष्टस्तयोरेव तथा मयि ।।४७
जीवश्लिष्टस्तथा काले मृतेषु जीविषु प्रिये ।
आवाञ्च विद्यमानौ क सततं सर्वजन्तुषु ।।४८
आधारश्चाहमाधेयं कार्यञ्च कारणं विना ।
अये सर्वाणि द्रव्याणि नश्वराणि च सुन्दरि ।।४९

इस समयमैं आपको आध्यात्मिक महायोग कुछ थोड़ा—सा बताता हूँ उसका श्रवण करो । यह शोक का हनन करन वाला-हर्ष को प्रदान करने वाला—परम साररूप और मन को सुख देने वाला है ।४३। मैं सबका अन्तरात्मा हूँ अर्थात सभी के घट-घट में विद्यमान रहन वाला अन्तर्यामी स्वरूप वाला हूं किन्तु मैं समस्त कर्मों से निर्लिप्त रहता हूं

अर्थात् कर्मों का कोई भी प्रभाव मेरे ऊपर कभी भी नहीं होता है। सब चराचर में सर्वदा विद्यमान रहते हुए भी सर्वत्र अदृष्ट ही रहा करता हूं। तात्पर्य यह है कि मुझें कभी कोई देख नहीं पाता है।४४। जिस प्रकार से वायु सभी जगह चलता रहता है। ऐसा कोई भी स्थल नहीं होता है जहाँ वायु न हो—वह सभी वस्तुओंमें सर्वत्र और सर्वदा रहता ही है वैसे ही मैं भी सदा सर्वत्र विद्यमान रहते हुए भी वायु की भाँति ही अदृश्य रहता हूँ। मैं लिप्त नहीं होता हूँ और समस्त कर्मो का साक्षीं अर्थात् देखने रहने वाला हूँ।४५। सर्वत्र जीवियों में जो यह जीवात्मा हैं वह मेरा ही एक प्रतिबिम्ब होता है जो शुभ और अशुभ कर्मो का करने वाला और उनके फलों को भोगने वाला भी होता है।४६। जिस प्रकार से जलसे पूर्ण भरे हुए घटों में चन्द्र और सूर्य के मण्डलका स्पष्ट प्रतिविम्ब ऐसा दिखलाई दिया करताहै मानों वह उसी में संस्थित है किन्तु जिस समय वे घट भग्न हो जाते हैं तो वह चन्द्र सूर्यका दिखलाई देने वाला स्वरूप उन्हींमें संश्लिष्ट हो जाया करताहै। उसी भांति मेरा प्रतिविम्ब जीव भी मुझ में संश्लिष्ट हो जाया करताहै।४७। हे प्रिये ! जीवियों के मृत होने पर जब कि उनका समय आता है यह जीव श्लिष्ट होताहै किन्तु हम दोनों तो निरन्तर सभी जन्तुओंमें विद्यमान रहा करते हैं।४८। मैं आधार हूं और विना कारण के कार्य आधेय भी हूँ। हे सुन्दरी ये समस्त द्रव्य नश्वर अर्थात् नाशवान् ही होते हैं।४९।

आविर्भावाधिका: कुत्र कुत्रचिन्नूनमेवच।
ममांशा केऽपि देवाश्च केचिद्देवा: कलास्तथा ॥५०
केचित्कला: कलांशांशास्तदंशांशाश्च केचन।
मदंशा:प्रकृति: सूक्ष्मा सा च मूर्त्याचपञ्चधो ॥५१
सरस्वतं च कमला दुर्गा त्वञ्चापि वेदसू:।
सर्वदेवा: प्राकृतिका यावन्तो मूर्तिधारिण: ॥५२
अहमात्मा नित्यदेही भक्तध्यानानुरोधत:।
ये ये प्राकृतिका राधे ते नष्टा: प्राकृते लये ॥५३

अहमेवासमेवाग्रे पश्चादप्यहमेव च ।
यथाहञ्च तथा त्वञ्च यथा धावल्यदुग्धयोः ॥५४
भेदः कदापि न भवेन्निश्चितच तथावयोः ।
अहं महान्विराट् सृष्टौ विश्वानि यस्य लोमसु ॥५५
अंशस्त्वं तत्र महती स्वांशेन तस्य कामिनी ।
अहं क्षुद्राविराट् सृष्टौ विश्वं यन्नाभिपद्मतः ॥५६

कहीं पर इनका अधिक आविर्भाव होताहै और कहीं पर कुछ कम होता है। कुछ देव तो मेरे ही अंश होते हैं और कुछ मेरी कला होते हैं। कुछ कलाओं के भी अंश और कुछ उन अंशों के भी अंश हुआ करते हैं। यह सूक्ष्मा प्रकृति भी मेरा ही एक अंश है और मूर्ति के स्वरूप में वह पाँच रूपोमें रहा करती है।५०-५१। उन पाँचों मूर्त्तियों में सरस्वती—कमला-दुर्गा तुम और वेदसू हैं। ये समस्त देव प्राकृतिक ही हैं जितने भी मूर्त्ति को धारण करके रहने वाले हैं।५२। मैं आत्मा नित्य देहधारी हूँ और भक्तों के ध्यान के अनुरोध से ही रहा करता हूँ। हे राधे ! जो भी प्राकृतिक स्वरूप वाले होते हैं वे सभी प्राकृतिक लय होने पर नष्ट हो जाया करते हैं।५३। मैं ही आदि में भी था और पीछे भी मैं ही रह जाता हूँ। मैं जिस प्रकार से हूँ वैसे ही तुम भी हो। मुझमें और आपमें कुछभी अन्तर नहींहै जिस तरह दूधमें धवलती रहा करती है वैसे ही हमारा और आपका नित्य सम्बन्ध है।५४। हम दोनों का कभी भी भेद नहीं होताहै यह निश्चित है। मैं महान् विराट हूँ सृष्टि के सृजनके समयमें जिसके लोम-कूपों में ये विश्व रहा करतेहै ।५५। तुम उसमें एक महान् कामिनी अंश हो—उसके अपने अंश से मैं क्षुद्र विराट् हूँ सृष्टि में जिसके नाभि-स्थित पद्मसे यह विश्व विरचित होता है।५६।

अयं विष्णोर्लोमकूपे वासो मे चांशतः सति ।
तस्य स्त्री त्वञ्च बृहती स्वांशेन सुभगा तथा ॥५७
तस्यविश्वे च प्रत्येकं ब्रह्माविष्णुशिवादयः ।
ब्रह्माविष्णुशिवा अंशाश्चान्याश्चापिमत्कलाः ॥५८

मत्कलांशकलया सर्वे देवि चराचराः ।
वैकुण्ठे त्वं महालक्ष्मीरहं तत्र चतुर्भुजः ॥५९
स च विश्वाद्वहिश्चार्द्धं यथा गोलेक एव च ।
सरस्वती त्वं सत्ये च सावित्री ब्रह्मणः प्रिया ॥६०
शिवलोके शिवा त्वञ्च मूलप्रकृतिरीश्वरी ।
विनाश्य दुर्गं दुर्गाच्चि सर्वदुर्गतिनाशिनी ॥६१
सा एव दक्षकन्या च सा एव शैलशन्यका ।
कैलासे पार्वती तेन सौभान्या शिववक्षसि ॥६२
स्वाशेन त्वं सिन्धूकन्या क्षोरोदे विष्णु वक्षसि ।
अह स्वांशेन सृष्टौ चा ब्रह्मविष्णुमहेश्वराः ॥६३

हे सति ! यह मेरा वास अंश विष्णु के लोम कूप में है । उसकी तुम अपने अंश से वृहती सुभगा स्त्री हो ।५७। उसके प्रत्येक विश्व में ब्रह्मा विष्णु और शिव आदि होतेहैं । ब्रह्मा—विष्णु और शिव ये अंश हैं इनके अतिरिक्त अन्य भी मेरी कलाएँ हैं ।५८। हे देवि ! मेरी कला के अंश के अंश—कला से ही ये सब चर और अचर होते हैं । वैकुण्ठ में तुम मेरे साथ महालक्ष्मी के स्वरूप में हो और वहाँ पर मेरा चार भुजाओं वाला स्वरूप होता है ।५९। और वह विश्व से आधा बाहिर है जैसे गोलोक धाम होता है । हे सत्ये ! तुम ब्रह्मा की प्रिया सरस्वती और सावित्री के स्वरूप वाली हो ।६०। शिवलोक में आप मूल प्रकृति ईश्वरी शिवा के स्वरूप वाली है । दुर्गा से दुर्ग को विनष्ट करके आप समस्त दुर्गों की आर्त्ति (पीड़ा) का नाश करने वाली देवी हैं ।६१। वह ही तुम दक्ष प्रजापति की कन्या हो और अपर जन्म में वही हिम-शैल की पुत्री हुई हो । तुम कैलाश में शिव के वक्षःस्थल में परम सौ-भाग्य वाली पार्वती कही जाती हो ।६२। क्षीर सागर में तुम विष्णु के वक्षःस्थल में अपने ही अंश से सिन्धु की कन्या लक्ष्मी होकर विराज-मान रहा करती हो । और मैं अपने ही अंश से सृष्टि में ब्रह्मा-विष्णु और महेश्वर के स्वरूप में रहा करता हूँ ।६३।

त्वंच लक्ष्मीः शिवा धात्री सावित्री च पृथक् पृथक् ।
गोलोके च स्वयं राधा रासेश्वरी सदा ॥६४
वृन्दा बृन्दावने रम्ये विरजा विरजातटे ।
सा त्वं सुदामशापेन भारतं पुण्यमागता ॥६५
पूतं कर्तुं भारतञ्च वृन्दारण्यञ्च सुन्दरि ।
त्वत्कलां स्वांशकलया विश्वेषु सर्वयोषितः ॥६६
या योषित्सा च भवती यः पुमान् सोऽहमेव च ।
अहं च कलया वह्निस्त्वं स्वाहा दाहिका प्रिया ॥६७
त्वया सह समर्थोऽहंनालं दग्धुञ्च त्वांविना ।
अहं दीप्तिमतां सूर्यः कलया त्वंप्रभाकरी ॥६८
संज्ञा त्वंच त्वया भामि त्वां विनाऽहान दीप्तिमान्
अहं च कलया चन्द्रस्त्वञ्च शोभा च रोहिणो ॥६९
मनोहरस्त्वयासार्द्धं त्वां विना न च सुन्दरः ।
अहमिन्द्रश्च कलया सर्वलक्ष्मीश्च त्वं शची ॥७०

आप ही लक्ष्मी—शिवा-धात्री और सावित्री इन के पृथक् स्वरूपों में रहा करती हैं । आप गोलोक नित्य धाम में रास में सर्वदा रास की ईश्वरी राधा के स्वरूप से रहती हो ।६४। वृन्दावन में आप वृन्दा होकर विराजती हैं और परम रम्य विरजा के तट पर आप विरजा के स्वरूप में है । वह तुम अब सुदामा के शाप से इस परम पुण्य भारत में आ गई हो ।६५। हे सुन्दरि ! इस भारत देश की वसुन्धरा को और वृन्दारण्य को पवित्र करने के लिए ही आपका यहां पदार्पण हुआ है । विश्वों में समस्त नारियाँ आपकी स्वांशकला के अंश से ही समुत्पन्न हुई हैं ।६६। जो भी कोई नारी है वह आपका ही एक स्वरूप है और जो पुरुष है वह मेरा ही स्वरूप होता है । मैं ही एक कला से अग्नि का स्वरूप वाला हूँ और आप उसकेही सर्वदा साथ रहनेवाली उसका प्रिया दाहिका षक्ति है ।६७। मैं अग्नि के रूप में रहकर तुम्हारे साथ रहने ही से दग्ध करने में समर्थ होता हूँ अन्यथा प्रिया दाहिका के बिना मुझमें किसी के भी जला देने की सामर्थ्य नहीं हुआ करती है ।

मैं दीप्तिमानों में सूर्य का स्वरूप हूँ और वहाँ पर भी तुम अपनी एक कला से प्रभाकरी शक्ति के रूप में मेरे साथ विद्यमान रहा करती हो ।६८। आप संज्ञा हैं और मैं तुम्हारे ही साथ दीप्ति देता हूं । तुम्हारे विना मैं कभी भी दीप्ति वाला नहीं हो सकता हूँ । मैं अपनी एक कला से चन्द्रके स्वरूप वालाहूं तो आप अपनी कलासे उसकी शोभाधायिका रोहिणी के स्वरूप में सर्वदा साथ रहा करती हो ।६९। मैं आपको साथ लेकर ही मनोहर होता हूँ । आपके विना मेरा कुछ भी सौन्दर्य नहीं है । मैं कला से इन्द्र के रूप में स्थित रहा करता हूँ और आप वहाँ भी मेरे साथ अपनी कला से सर्व लक्ष्मी शची हैं ।७०।

त्वया सार्द्धं देवराजो हतश्रीश्च त्वया विना ।
अहं धर्मश्च कलया त्वंच मूर्तिश्च धर्मिणी ॥७१
नाहं शक्तो धर्मकृत्ये त्वाञ्च धर्मक्रियां विना ।
अहंयज्ञश्च कलया त्वं स्वाहांशेन दक्षिणा ॥७२
त्वया सार्द्धं ञ्च फलदोऽप्यसमर्थस्त्वया विना ।
कलया पितृलोकोऽहं स्वांशेन त्व स्वधा सती ॥७३
त्वयालं कव्यदाने च सदा नालं त्वयाविना ।
अह पुमांस्त्वं प्रकृतिर्न स्रष्टाहं त्वयाविना ॥७४
त्वंच सम्पत्स्वरूपाहमीश्वरश्च त्वया सह ।
लक्ष्मीयुक्तस्त्वया लक्ष्म्या निःश्रीकश्च त्वया विना ॥७५
यथा नालं कुलालश्च घट कर्तुं मृदा विना ।
अहं मेपश्च कलया स्वांशेन त्वं वसुन्धरा ॥७६
त्वां शस्यरत्नाधारां च बिभर्मिमूर्ध्नि सुन्दरि ।
त्वं चकान्तिश्च शान्तिश्चभूतिमूर्तिमतीसती ॥७७

तुम्हारे साथ में रहने पर ही इन्द्र देवराज होता है अन्यथा तुम्हारे विना वह हत श्री हो जाया करता है । मैं अपनी एक कला से धर्म हूँ और आप धर्मिणी की मूर्त्ति हैं ।७१। धर्म क्रिया तुम्हारे विना मैं धर्म के कृत्य में समर्थ नहीं होता हूँ । मैं अपनी एक कलासे यज्ञ के स्वरूप वाला हूँ और तुम स्वाहांश से दक्षिणा हो । तुम्हारे दक्षिणा रूपिणीके

साथ रहने परही मैं फल प्रदाता बनताहूँ और तुम्हारे बिना मैं यज्ञरूप वाला कुछ भी फल देने में समर्थ नहीं हो सकता हूँ। मैं अपनी एक कला से पितृलोक हूँ तो तुम अपने अंश से सभी स्वधा हो ।७२-७३। तुम्हारे साथ रहते हुए मैं कव्यके दानमें सदा समर्थ होता हूँ और जब तुम नहीं होती हो तो मैं स्वधाके अभावमें कभी समर्थ नहीं रहा करता हूँ। मैं पुमान हूँ और आप प्रकृति हैं। तुम्हारे विना मैं सृजन करने में सामर्थ नहीं हूँ ।७४। आप सम्पत स्वरूप वाली हैं और आप के साथ ही में मैं ईश्वर हूँ। तुम लक्ष्मी रूपिणी के साथ में रहकर ही मैं लक्ष्मीसे युक्त लक्ष्मीनारायण हूँ। जब तुम लक्ष्मी ही मेरे पास नहीं होती हो तो मैं भी निःश्रीक ही रहता हूँ ।७५। जिस प्रकार से तुम्हारे मिट्टी के बिना निर्माण कला में कुशल होते हुए भी घट की रचना नहीं कर सकता। उसी भाँति रचना का पूर्ण कौशल रहते हुए भी मैं सृजन तुम्हारे विना नहीं कर सकता हूँ। में कला से शेष के स्वरूप वालाहूँ और तुम अपने अंश से वसुन्धरा हो ।७६। हे सुन्दरि ! शस्यारत्नों की आधार स्वरूपिणी आपको अपने मस्तक पर धारण किया करता हूँ। तुम कान्ति-शान्ति-भूति और मूर्त्तिमती सती हो ।७७।

तुष्टिः पुष्टिः क्षमा लज्जा क्षुधा तृष्णा परा दया।
निद्रा शुद्धा च तन्द्रा च मूर्च्छा च सन्नतिः क्रिया ॥७८
मूर्तिरूपा ।भक्तिरूपा देहिनां देहरूपिणी।
ममाधारा सदा त्वं च तवात्माहं परस्परम् ॥७९
यथा त्वं च तथाहं च समौ प्रकृतिपुरुषौ।
न हि सृष्टिर्भवेद्देवि द्वयोरेकतरं विना ॥८०
इत्युक्त्वा परमात्मा च राधां प्राणधिकां प्रियाम्।
कृत्वा वक्षसि सुप्रीतो बोधयामास नारद ॥८१
स च क्रीडानियुक्तश्च बभूव रत्नमन्दिरे।
यया च राधया सार्द्धं कामुक्या सह कामुकः ॥८२

तुम ही तुष्टि-पुष्टि-क्षमा-लज्जा-क्षुधा-तृष्णा-परादया-निद्रा शुद्धा

तन्द्रा—मूर्च्छा—सन्नति और क्रिया के स्वरूपों वाली हो ।७८। आप मूर्त्तिरूप वाली—भक्ति के स्वरूप वाली और देहधारियों को देह रूप वाली है । आप सदा मेरी आधार हैं और मैं तुम्हारी आत्मा हूँ । ऐसे ही मैं और तुम दोनों परस्पर में हैं ।७९। जैसी तुम ही वैसा ही मैं हूँ । हम दोनों प्रकृति और पुरुष समान ही हैं । हे देवि ! दोनों में एक के बिना भी इस जगत की सृष्टि नहीं हो सकती है ।८०। यह कह कर परमात्मा ने अपने प्राणों से भी अधिक प्रिय राधा को अपने वक्षःस्थल में लगा लिया था । हे नारद ! श्रीकृष्ण ने सुप्रसन्न होते हुए इस प्रकार से राधा को आध्यात्मिक महायोग के द्वारा प्रबोधन कराया था ।८१। इसके अनन्तर फिर उस रत्ननिर्मित मन्दिर में कामुकी राधा के साथ परम कामुक वह क्रीड़ा में संलग्न हो गये थे ।८२।

८३—राधाकृष्णसंवादवर्णनम्

कृत्वा क्रीडांसमुत्थाय पुष्पतल्पात् पुरातनः ।
निद्रितां प्राणसदृशीं बोधयामासतत्क्षणम् ॥१
वस्त्राञ्चलेन संस्कृत्य कृत्वा तन्निर्मलं मुखम् ।
उवाच मधुरं शान्तं शान्तां च मधुसूदनः ॥२
अयि तिष्ठ क्षणं रासे रासेश्वरि शुचिस्मिते ।
ब्रज वृन्दावनं वापि व्रजं व्रज व्रजेश्वरि ॥३
रासाधिष्ठातुदेवि त्वं रासं रासे कुरु क्षणम् ।
ग्रामे ग्रामे यथा सन्ति सर्वत्र ग्रामदेवताः ॥४
प्रियालिनिवहैः सार्द्धं क्षणं चन्दनकाननम् ।
क्षणं वा चम्पकवनं गच्छ वा तिष्ठ सुन्दरि ॥५
क्षणं गृहञ्च यास्यामि विशिष्टं कार्य्यमस्ति मे ।
विरामं देहि मे प्रीत्या क्षणं मां प्राणवल्लभे ॥६
प्राणाधिष्ठातृदेवी त्वं प्राणाश्च त्वयि सन्ति मे ।
प्राणी विहाय प्राणांश्च कुत्र स्थातुं क्षमः प्रिये ॥७

नारायण ने कहा—पुरातन पुरुष राधा के साथ क्रीड़ा करके

फिर वह पुष्पों की उस शय्या से उठकर बैठ गये थे और निद्रित एवं प्राण के सदृश प्रिया राधा को उसी समय में उन्होंने जगा दिया था ।१। उनके मुख को वस्त्र के छोर से सुसंस्कृत करके निर्मल कर दिया था और फिर मधुसूदन शान्ति स्वरूप वाली राधा से परम शान्त एवं मधुर वचन बोले ।२। श्री कृष्ण ने कहा—हे रासेश्वरी ! हे शुचिस्मिते ! अब आप क्षण मात्र रास में स्थित हो जाओ । अथवा वृन्दावन में चलो या हे व्रजेश्वरि ! व्रज में चलो ।३। आप तो हे देवि ! रास की अधिष्ठात्री हैं । थोड़ी देर तक रासमण्डल में रास करो । जैसे ग्राम-ग्राम में सर्वत्र ग्राम देवता होते हैं ।४। हे सुन्दरि ! अपनी प्यारी आलियों के समूहों के साथ कुछ क्षण चन्दन के काननमें अथवा कुछ क्षण चम्पक के वन में जाकर स्थित रहो ।५। मैं क्षण मात्र को अपने गृह को जाऊँगा मुझे वहाँ कुछ कार्य है जो विशेषता रखने वाला है । हे प्राण वल्लभे ! आप प्रजन्नता पूर्वक मुझे क्षण भर के लिए अवकाश प्रदान कर दो ।६। आप मेरे प्राणों की क्षधिष्ठात्री देवी हैं । मेरे प्राण तुम्हारे ही अन्दर रहा करते हैं । हे प्रिये ! प्राणी प्राणों का त्याग करके अन्यत्र कहाँ रह सकता है ।७।

त्वयि मे मानसंशश्चत्वं मे संसारवासना ।
त्वत्तोममप्रियानास्ति त्वमेवशङ्करात्प्रिया ।।८
प्राणा मे शङ्करः सत्यं त्वञ्च प्राणाधिका सति ।
इत्युक्त्वा तां समाश्लिष्य भगवान् गन्तुमुद्यतः ।।९
अक्रूरागमनं ज्ञात्वा सर्वज्ञः सर्वसाधनः ।
आत्मा पाता च सर्वेषां सर्वोपकारकारकः ।।१०
दृष्ट्वा तमेव गच्छन्तमुत्सकं भिन्नमानसम् ।
उवाच राधिका देवी हृदयेन विदूयता ।।११
हे नाथ रमणश्रेष्ठ श्रेष्ठश्चप्रेयसां मम ।
हे कृष्ण हे रमानाथ व्रजेश मा व्रज व्रजम् ।।१२
अधुना त्वां प्राणनाथ पश्यामि भिन्नमानसम् ।
गते त्वयि मम प्रेम गतं सौभाग्यमेव च ।।१३

क्व यासि मां विनिक्षिप्य गम्भीरे शोकसागरे ।
विरहव्याकुलांदीनां त्वय्येव शरणागताम् ॥१४

न यास्यामि पुनर्गेहं यास्यामि काननान्तरम् ।
कृष्ण कृष्णति गायं गायं दिवानिशम् ॥१५

मेरा मन तुम्हारे ही अन्दर निरन्तर रहता है और आप मेरे संसार की वासना हैं । तुम से अधिक अन्य कोई भी मेरी प्यारी नहीं है तुम मुझे शङ्कर से भी अधिक प्रिय लगती हो ।८। हे सति ! यह सत्य है कि शङ्कर मेरे प्राणों के तुल्य प्रिय हैं किन्तु आप तो मेरे प्राणों से भी अधिक प्रिय हैं । इस प्रकारसे कहकर उस राधाका आश्लेष भली भांति करके हरि जाने को उद्यत हो गये थे ।९। सर्व कुछ के ज्ञान रखने वाले और सब साधनों से सम्पन्न ने अक्रूर के आगमन को जान लिया था । हरि सबके आत्मा-पालन एवं रक्षण करने वाले तथा सबके उपकार करने वाले थे ।१०। राधिका ने भिन्न मन वाले जाने को उद्यत उनको देख कर देव अपने विदूयमान हृदय को करके बोली-११। राधिका ने कहा—हे नाथ ! हे रमण श्रेष्ठ ! आप तो मेरे प्यारों में सबसे श्रेष्ठ हैं । हे कृष्ण ! रमानाथ हे व्रजेश ! आप ब्रज में मत जाओ ।१२। हे प्राणनाथ ! इस समय मैं आपको भिन्न मन वाले देख रही हूँ । आपके चले जाने पर मेरा प्रेम और यह सौभाग्य भी गया ही समझिये ।१३। हे प्राण वल्लभ ! गम्भीर शोक के सागर में मुझे डाल कर आप इस समय कहाँ जा रहे हैं? मैं तो आपके विरहसे अत्यन्त व्याकुल एवं दीन हो रही हूँ । मैं इस समय आपकी ही शरण में आई हुई हूँ ।१४। मैं फिर अपने घर में भी नहीं जाऊँगी और अन्य काननों में रात-दिन हे कृष्ण हा कृष्ण—इस तरह गायन करती हुई भ्रमण करती रहूँगी ।१५।

न यास्याम्यथवारण्यं यास्यामिकामसागरे ।
तत्रत्वत्कामनां कृत्वात्यक्ष्यामि चा कलेवरम् ॥१६

यथाऽऽकाशो यथात्मा च यथा चन्द्रो यथा रविः ।
तथा त्वं यासि मत्पार्श्वे निबद्धो वसनाञ्चले ॥१७
अधुनायासि नैराश्यं कृत्वा मे दीनवत्सल ।
न युक्तं हि परित्यक्तुं दीनां मां शरणागताम् ॥१८
यत्पादपद्मं ध्यायन्ते ब्रह्मविष्णुशिवादयः ।
त्वां मायया गोपवेशं कथं जानामि मत्सरी ॥१९
कृतं यद्देव दुर्नीतमपराधसहस्रकम् ।
यदुक्तं पतिभावेन चाभिमानेन तत् क्षम ॥२०
चूर्णीभूतश्च मद्गर्वो दूरीभूतो मनोरथः ।
विज्ञातमात्मसौभाग्यं किमन्यत् कथयामि ते ॥२१
ज्ञात्वा गर्गमुखाच्छ्रुत्वा मोहिता तव मायया ।
त्वाञ्चा वक्तुं न शक्नोमि प्रेम्णा वा भक्तिपाशतः ॥२२

अथवा मैं किसी भी कानन में नहीं जाऊँगी और काम के सागर चली जाऊंगी । वहां पर आपकी कामना करके अपने इस कलेवर का त्याग कर दूंगी ।१६। जिस तरह आकाश, आत्मा, चन्द्र और रवि हैं वैसे ही आप मेरे पास में वसन के छोर में वद्ध हैं ।१७। हे दीनों पर प्यार करने वाले ! इस समय आप बिल्कुल मुझे निराश करके त्याग रहे हैं यह उचित नहीं है मैं अत्यन्त दीन और आपके शरणमें आई हुई हूं ।१८। जिसके चरण कमल को ब्रह्मा, विष्णु और शिव आदि ध्यान में लाया करतेहैं मत्सरी मैं मायासे गोप के वेश वाले आपको कैसे जान सकती हूं ।१९। हे देव ! मैंने जो कुछ भी बुरा व्यवहार और सहस्र अपराध कियेहैं और पतिके भावसे तथा अभिमान वश होकर जो कुछ भी मैंने आपसे कह दियाहै उसे अब आप क्षमा कर दीजिए ।२०। मेरा समस्त गर्व चूर्ण हो गया है और सारे मनोरथ भी दूर हो गये हैं । मैंने अपना सौभाग्य जान लिया था । इससे अधिक इस समय आपसे मैं क्या कहूं ? ।२१। गर्ग के मुख से श्रवण करके और जान कर भी मैं

आपकी माया से मोहित हो गई थी। इस समय प्रेम से अथवा भक्ति के भाव के पाश से आपसे कहने में समर्थ नहीं हो रही हूँ।२२।

यासिचेन्मां परित्यज्य सकलंको भविष्यसि।
त्वत्पुत्रपौत्रा नश्यन्ति ब्रह्मकोपानलेन च ॥२३
क्षण युगशतं मन्ये त्वां विना प्राणवल्लभम्।
कथं शताब्दं त्वां त्यक्त्वा बिभर्मि जीवनं प्रभो ॥२४
इत्युक्त्वा राधिका कोपात्पपात धरणीतले।
मूर्च्छां स प्राप सहसा जहार चेतनां मुने ॥२५
कृष्णस्तां मूर्च्छितां दृष्ट्वा कृपया च कृपानिधिः।
चेतनां कारयित्वा च वासयामास वक्षसि ॥२६
बोधयामासविविधैः यौगैः शोकविखण्डनैः।
तथापि शोकं त्यक्तुं न शशांक शुचिस्मता ॥२७

हे प्राणनाथ ! यदि आप मुझे त्याग कर जा ही रहे हैं तो आप कलङ्क से युक्तहो जायेंगे। ब्रह्मकोप की अग्निसे आपके समस्त पुत्र और पौत्र नष्ट हो जायेंगे।२३। प्राणवल्लभ आपके विना मैं एक क्षण को भी युग के समान मानती हूँ। हे प्रभो ! शत वर्ष तक आपका त्याग करके मैं कैसे अपने जीवन को धारण करूँगी।२४। इतना कह कर राधिका कोप से भूतल पर गिर पड़ी थीं। हे मुने उस राधा को मूर्छा सहसा हो गई थी और उसने अपनी चेतना का त्याग कर दिया था।२५। कृष्ण ने उसकी मूच्छित देख कर कृपा के निधि ने कृपा करके उसको होश दिलाया था और अपने वक्षःस्थल में उठा कर उसे लगा लिया था।२६। शोक के विखण्डन करने वाले अनेक योगों के द्वारा राधा को प्रबोधित कियाथा तो भी शुचि स्मित राधिका ने अपने शोक को त्याग करने की सामर्थ्य प्राप्त न की।२७।

सामान्यवस्तुविश्लेषो नृणां शोकाय केवलम्।
देहात्मनोश्चा विच्छेदः क्व सुखाय प्रकल्पते ॥२८

न ययौ तत्र दिवसे ब्रजराजो व्रजं प्रति ।
क्रीडासरोगराभ्यासं प्रययौ राधया सह ॥२९
तत्र गत्वा पुनः क्रीडां चकार च तया सह ।
विजहौ विरहज्वालां रासे रासेश्वरी मुदा ॥३०
राधा सा स्वामिना सार्द्धं पुष्पचान्दनचर्चिता ।
पुष्पचन्दनतल्पे च तस्थौ रहसि नारद ॥३१

मनुष्यों को एक साधारण सी वस्तु का वियोग भी केवल शोक उत्पन्न कर देने वालाहो जाया करताहै तो देह और आत्माका विच्छेद होना कहाँ सुखप्रद रह सकता हूँ ? ।२८। उस दिन व्रजराज ब्रज की ओर नहीं गये थे और राधा के साथ वह क्रीड़ा सरोवर के समीप चले गये थे ।२९। वहाँ पहुँच कर फिर उन श्रीकृष्ण ने उस राधा के साथ पुनः क्रीड़ा की थी । वहाँ पर रासेश्वरी राधा ने रास में अत्यन्त हर्ष से विरह की ज्वाला का त्याग कर दिया था ।३०। हे नारद ! वह राधा अपने स्वामी के साथ में पुष्पों और चन्दन से चर्चित होकर पुष्प और चन्दन से चर्चित शय्या पर एकान्त में स्थित हो गई थी ।३१।

८४—रासक्रीडा मध्ये ब्रह्मण आगमनम्

अतः परं किं रहस्यं राधाकेशवयोर्वद ।
निगूढंतत्त्वमस्पष्टं तन्मे व्याख्यातुमर्हसि ॥१
शृणु नारद वक्ष्यामि रहस्यं परमाद्भुतम् ।
गोपनीयञ्च वेदेषु पुराणेषु पुराविदाम् ॥२
पुनः सकामो भगवान् कृष्णः स्वेच्छामयो विभुः ।
रेमे सरमयासार्द्धं विदग्धश्चविदग्धया ॥३
चतुः षष्टिकलासक्ता यथा कान्ताकलावती ।
कामशास्त्रेषु निपुणा विदग्धा रसिकेश्वरी ॥४
शृङ्गारलीलानिपुणाशश्वत्कामा च कामुकी ।
सुन्दरीसुन्दरीष्वेव शश्वत्सुस्थिरयौवना ॥५

पितृणां मानसी कन्या धन्या मान्या च मानिनी ।
शम्भोः शिष्या ज्ञानयुता शतकल्पान्त जीवनी ॥६
वेदवेदाङ्गनिपुणा योगनीतिविशारदा ।
नानारूपधारा साध्वी प्रसिद्धा सिद्धयोगिनी ॥७
तत्कन्याराधिकादेवी मातृतुल्या च कामुकी ।
चकारनानाभावं सा सुशीला स्वामिनं प्रति ॥८

नारद ने कहा—इसके आगे राधा और केशव का क्या रहस्य हुआ था ? उस निगूढ़ तत्व वाले अस्पष्ट रहस्य को आप मेरे समक्ष कहने के योग्य होते है। नारायण ने कहा—हे नारद ! मैं अब एक परम अद्भुत रहस्य तुमको बताता हूँ। उसका तुम श्रवण करो। यह रहस्य वेदोंमें भी अत्यन्त गोपनीय है और पुरावृत्तके ज्ञाताओंके पुराणों में भी यह छिपा हुआ है।१-२। पुनः सकाम भगवान् विभु श्री कृष्ण ने जो कि अपनी इच्छा से परिपूर्ण रहने वाले और परम विदग्ध हैं रमाके सहित उस विदग्धा राधा के साथ रमण किया था।३। वह रसिकों की ईश्वरी काम शास्त्र में अत्यन्त निपुण थी जैसे कलावती कान्ता हो उसी भांति वह चौंसठ कला में आसक्त हो गई थी।४। वह राधा शृङ्गार लीलाओं में बहुत ही दक्ष थी और कामुकी वह निरन्तर काम वासना वाली रहती थी और निरन्तर स्थिर वह सुन्दरियों में सबसे अधिक सुन्दरी थी और निरन्तर स्थिर यौवन से समन्वित रहती थी।५। वह देवी पितृगण की मानसी कन्या--धन्या—मान्या और परम मान वाली थी। वह शम्भुकी ज्ञान से युक्त शिष्या भी तथा शत कल्पों के अन्त जीवित रहने वाली थी।६। वह देवी वेदों और वेदों के समस्त अङ्गों में निपुण थी तथा योग और नीति की महती विदुषी थी। वह अनेक रूपों को धारण करने वाली—साध्वी और परम प्रसिद्धि सिद्धा एवं योगिनी थी।७। उस देवी की कन्या यह राधिका देवी थी जो अपनी माता के ही समान कामुकी थी। उस सुशीला ने अपने स्वामी के प्रति अनेक प्रकार के भावों को प्रदर्शित किया था।८।

नानासुवेशोज्ज्वलितां तां निद्राकुलितांविभुः ।
पुनश्चकार मोहेनगाढालिङ्गनमीप्सितम् ॥९
पुनश्च चुम्बनं कृत्वा निवेश्य च स्ववक्षसि ।
सुष्वाप जगतांस्वामी कामी विरहकातरः ॥१०
एतस्मिन्नतरे काले ब्रह्मा लोकपितामहः ।
शिवशेषादिभिर्देवैर्मुनीन्द्रैः सार्द्धमाययौ ॥११
आगत्य नत्वा शिरसा तुष्टाव सम्पुटाञ्जलिः ।
सामवेदोक्तस्तोत्रेण परिपूर्णतमं विभुम् ॥१२
भारावतारण करुणार्णव शोकसन्तापग्रसन ।
जरामृत्युभयादिहरण शरणपञ्जर
भक्तानुग्रहकातरभक्तवत्सल ।
भक्तसञ्चितधनओं नमोऽस्तुते ॥१३

अनेक प्रकार के सुवेशों से समुज्ज्वलित और निद्रा से आकुलित उसका विभु ने पुनः मोहसे अभीष्ट गाडालिङ्गन किया था ।९। और पुनः चुम्बन करके अपने वक्षःस्थल पर निवेशित कर जगतों के स्वामी-परम कामी और विरह से कातर सो गये थे ।१०। इसी बीच लोकों के पितामह ब्रह्मा शिव और शेष आदि देवों तथा मुनीन्द्रोंके साथ वहाँ आ गये थे ।११। वहाँ आकर और शिर से प्रणाम कर के पुटाञ्जलि होकर साम वेद में कहे हुए स्तोत्र के द्वारा उस परि पूर्णतम विभु का स्तवन करने लगे थे ।१२। आप भार के अवतारण करने वाले—करुणा सागर तथा शोक एवं सन्ताप के ग्रास करने वाले हैं । आप मानवों के जरा--मृत्यु आदि के भय को हरण करने वाले हैं । आप शरण में प्राप्त के पञ्जर अर्थात् पूर्ण रक्षक हैं । आप भक्तों पर अनुग्रह करने के लिये अत्यन्त कातर रहा करते हैं । आप भक्तों पर प्यार करने वाले और भक्तों के लिये संचित धन के तुल्य हैं । आप के लिये प्रणाम हैं ।१३।

सर्वाधिष्ठातृदेवायेत्युक्त्वा वै प्रीणनाय च ।
पुनः पुनरुवाचेदं मूर्च्छितश्च बभूव ह ॥१४
इति ब्रह्मकृतं स्तोत्रं यः शृणोति समाहितः ।
तत्सर्वाभीष्टसिद्धिश्च भवत्येव न संशयः ॥१५
अपुत्रो लभते पुत्रं प्रियाहीनो लभेत् प्रियाम् ।
निर्धनो लभते सत्यं परिपूर्णतमं धनम् ॥१६
इह लोके सुखं भुक्त्वा चान्ते दास्यं लभेद्धरेः ।
अचलां भक्तिमाप्नोति मुक्तेरपि सुदुर्लभाम् ॥१७
स्तुत्वा च जगतां धाता प्रणम्य च पुनः पुनः ।
शनैः शनैः समुत्थाय भक्त्या पुनरुवाच ह ॥१८

ब्रह्माजी ने उन सबके अधिष्ठातृ देव के लिये इतना स्तवन करके उनकी प्रसन्नता करने के लिये इसी स्तवन की वार वार कहा और फिर वह मूच्छित हो गये थे ।१४। इस ब्रह्मा के द्वारा किये गये स्तोत्र को जो समाहित होकर श्रवण करताहै उसके समस्त अभीष्टोंकी सिद्धि निश्चय ही हो जाया करती है-इसमें तनिक भी संशय नहीं है ।१५। जो पुत्र हीन होताहै उसे पुत्र रत्नकी प्राप्ति हो जातीहै और जो भार्या से रहित होता है उसे भार्या मिल जाया करती है । निर्धन पुरुष को धनका लाभ होताहै और वह सत्यही परिपूर्णधन प्राप्त करता ।१६।इस स्तोत्र का श्रोता पुरुष इस लोक में सुख का भोग कर अन्त में हरि के दास्य भाव को प्राप्त हो जाया करताहै । वह अचल भक्ति प्राप्त करके अत्यन्त सुदुर्लभ मुक्ति को भी प्राप्त कर लेता है । इस तरह जगत् के धाता ने प्रभुका स्तवन करके उनको वार-वार प्रणाम किया था । फिर धीरे धीरे उठकर भक्ति पूर्वक उनसे बोले ।१७-१८।

उत्तिष्ठ देवदेवेश परमानन्दकारण ।
नन्दनन्दन सानन्द नित्यानन्द नमोऽस्तु ते ॥१९
व्रज नन्दालयं नाथ त्यज वृन्दावनं वनम् ।
स्मर सुदामशापञ्च शतवर्षनिबन्धनम् ॥२०

भक्तशापानुरोधेन शतवर्षं प्रियां त्यज ।
पुनरेतांच सम्प्राप्य गोलोकंच गमिष्यसि ॥२१
गत्वा पितृगृहं देव पश्याक्रूरं समागतम् ।
पितृव्यमतिथिं मान्यं धन्यं वैष्णवमीश्वरम् ॥२२
तेन सार्द्धं मधुपुरीं भगवन् गच्छ साम्प्रतम् ।
कुरु शम्भोर्धनुर्भङ्गं भग्नं वैरिगणं हरे ॥२३
हन कसं दुरात्मानं तातं बोधय मातरम् ।
निर्माणं द्वारकायाश्च भारावतरणं भुवः ॥२४
दह वाराणसीं शम्भोः शक्रस्य सदनं विभो ।
शिवस्य जृम्भणं युद्धे वाणस्य भुजकृन्तनम् ॥२५

ब्रह्मा ने कहा--हे देव देवेश ! आप तो परम आनन्दके कारण है । अब उठिये । हे नन्द के नन्दन ! आप आनन्द से युक्त और नित्य ही आनन्द से परिपूर्ण हैं । आपको हम सबका नमस्कार है ।१६। हे नाथ! अब आप नन्दके आलयमें पधाररिये और इस वृन्दावन की निकुञ्जका त्याग करिये । आप सुदामाके शत वर्ष निबन्धन वाले शाप का स्मरण करिये ।२०। अपने भक्त के द्वारा दिये हुए शाप के अनुरोध से सौ वर्ष तक प्रिया राधाका परित्याग कर दीजिए । फिर इसकी प्राप्तिकर आप गो लोक में जांयगे ।२१। हे देव ! इस समय पिता के घर में जा कर आये हुए अक्रूर का दर्शन करे । वह अक्रूर आपके चाचा होते है-- अतिथि के स्वरूप परम मान्य धन्य एवं वैष्णव शिरोमणि है ।२२। हे भगवन् ! अब उसके साथ आप मधुरी को जाइये । हे हरे ! वहाँ शम्भु के धनुष का भङ्ग कर वैरिगण का नाश करिये ।२३। अत्यन्त दुष्ट का हनन कर अब वहाँ जाकर अपने पिता वसुदेवको बोधन देवें । अब तो आपको द्वारका पुरी का निर्माण और इस वसुन्धरा के भार का अवतरण करना है ।२४। हे विभो ! शम्भु की वाराणसी और इन्द्र के सदन का दाह करें । युद्ध में शिव का जृम्भण तथा वाणकी भुजाओं का कृन्तन करने की कृपा करें ।२५।

रुक्मिणीहरणं नाथ घातनं नरकस्य च।
षोडशानां सहस्रञ्च स्त्रीणां पाणिग्रहं कुरु ॥२६
त्यज प्रियां प्राणसमां व्रजेश्वर व्रजं व्रज।
उत्तिष्ठोत्तिष्ठ भद्रं ते यावद्राधा न जाग्रति ॥२७
इत्येवमुक्त्वा ब्रह्मा च सेन्द्रैर्देवगणैः सह।
जगाम ब्रह्मलोकञ्च शेषश्च शङ्करस्तथा ॥२८
पुष्पचान्दनवृष्टिञ्च कृष्णस्योपरि देवताः।
चक्रुः प्रीत्या च भक्त्या च वाग्बभूवाशरीरिणी ॥२९
वध कंसं वधार्हञ्च स्वपित्रोर्मोक्षणं कुरु।
क्षयं कुरु भुवोर्भारं नारदेत्येवमेव च ॥३०
इत्येवं तद्वचः श्रुत्वा भगवान् भूतभावनः।
राधां भगवतीं त्यक्त्वा समुत्तस्थौ शनैः शनैः ॥३१
ययौ हरिः कियद्दूरं निरीक्ष्य च पुनः पुनः।
क्षणं तस्थौ चन्दनानां वने वाससमीपतः ॥३२
यिहाय राधा निद्रां सा समुत्तस्थौ स्वतल्पतः।
न निरीक्ष्य हरिं शान्तं कान्तञ्च प्राणवल्लभम् ॥३३
हा नाथ रमणश्रेष्ठ प्राणेश प्राणवल्लभ।
प्राणचोर प्रियतम क्व गतोऽसीत्युवाच ह ॥३४

हे नाथ ! आप कृपा कर रुक्मिणी देवी का हरण करें और नरकासुर घातन भी करें। वहाँ से सोलह सहस्र पत्नियों का पाणिग्रहण करिए।२६। हे ब्रजेश्वर ! अब अपनी प्राणों के समान प्रिया का त्याग कर देवें और ब्रज में पधारें आप शीघ्र ही उठकर चल दीजिए जब तक यह राधा जाग्रत नहीं होती है।२७। इन्द्र आदि देवगणों के साथ ब्रह्मा इस प्रकार से श्रीकृष्ण से निवेदन करके फिर वह ब्रह्मलोक को चले गये थे तथा शेष और शंकर भी अपने निवास स्थानों में चले गये थे।२८। इसी समय में देवों ने श्रीकृष्ण के ऊपर पुष्प चन्दन की वर्षा की थी जो कि बड़े ही प्रेम और भक्ति के भाव में की गई थी। इसके उपरान्त आकाश वाणी हुई थी।२९। आकाश वाणी ने कहा

था—वधके योग्य कंस का अब शीघ्र वध करो और अपने माता-पि ा को मुक्त कराइए। हे नारद ! आकाश वाणी ने कहा था कि अब भूमि के भार का क्षय करो।३०। इस प्रकार के आकाश से उद्भूत वचन का श्रवण का भूत मात्र पर कृपा करने वाले भगवान् ने भगवती राधा को त्याग कर वहाँ से शनैः शनैः उत्थान किया था।३१। कुछ ही दूर हरि गये कि बार-बार देखकर वह एक क्षण के लिए वाज के समीप में चन्दन के वन में खड़े हो गये थे।३२। राधा ने निद्रा का त्याग कर दिया था और अपने तल्प से खड़ी हो गई थीं। इसने अपने समीप में वहाँ परम शान्त स्वरूप स्वामी प्राण वल्लभ को नहीं देखा था।३३। राधा श्याम सुन्दर को न देखकर विलाप करने लगी--हे नाथ ! आप रमण कराने में बहुत ही श्रेष्ठ थे। हे प्राणों के स्वामिन्! हे प्राणों के वल्लभ ! कोप तो मेरे प्राणों को चुराने वाले हैं। हे प्रियतम ! आप इस समय कहाँ चले गये हैं ? ।३४।

क्षणमन्वेषणं कृत्वा बभ्राम मालतीवनम्।
उवास क्षणमुत्तस्थौ क्षणं सुष्वाप भूतले ॥३५
रुरोद क्षणमत्युच्चैर्विललाप मुहुर्मुहुः।
आगच्छागच्छ हे नाथैवमुक्त्वा पुनः पुनः ॥३६
मूर्च्छां गम्प्राप सन्तापात् सन्तप्ता विरहानलैः।
भूतले च तृणाच्छन्ने पपात च यथा मृता ॥३७
आययुस्तत्र गोप्यश्च ब्रह्मन् शतसहस्रशः।
काश्चिच्चामरहस्ताश्च गृहीत्वा चन्दनद्रवम् ॥३८
तासां मध्ये प्रियलीलाः कृत्वा राधां स्ववक्षसि।
मृतामिवप्रियां दृष्ट्वा रुरोद प्रेमविह्वला ॥३९
सजलं पङ्कजदलं पङ्कोपरि निधाय च।
स्थापयामास तां राधां निश्चेष्टाञ्च मृतामिव ॥४०

राधा ने इस प्रकार विलाप करते हुए क्षणमात्र अन्वेषण किया था और मालती के निकुंज वन में भ्रमण किया था। एक क्षण वह बैठ जाती थी थी फिर कुछ क्षण हो जाती थी और क्षण भरके लिए भूतल

पर सी जाती थी ।३५। फिर क्षण भर में ही बहुत ऊँचे स्वर में वह रुदन करती थीं और बार-बार विलाप करने लगीं थीं। बार-बार वह यही कहती थीं कि हे नाथ ! अब वहां आ जाइये-आजाइये ।३६। वह फिर उस श्रीकृष्ण के विरह के अनल से जो सन्ताप हुआ था उससे अत्यन्त सन्तप्त होकर मूर्च्छा को प्राप्त होगई थी। फिर बेहोश होकर वही तृणोंसे समाच्छन्न भूतल पर गिर पड़ीथी जैसे कोई मृता हो ।३७। वहां पर हे ब्रह्मन् ! सैकड़ों और सहस्रों गोपियाँ आ गए थी। उनमें कुछ के करों में चमर थे और कुछ हाथों में शीतल सुगन्धित चन्दनका द्रव लिए हुए थीं ।३८। उनके मध्यमें प्रिया लीला राधा को अपने वक्षः स्थल में लेकर अपनी प्रिया राधाको मृतकी भाँति देखकर प्रेमातिशय से विह्वल होकर रुदन करने लगी थीं ।३९। जल के सहित पंकज के दलों को पंक के ऊपर रखकर उस पर मृतके भाँति पड़ी हुई चेष्टाहीन राधा को स्थापित कर दिया था ।४०।

गोपीभिः सेवितां तत्र रुचिरैः श्वेतचामरैः।
चन्दनद्रवयुक्ताञ्च स्निग्धवस्त्रान्वितांसतीम् ॥४१
ददर्श कृष्णस्तत्रेत्य तामेव प्राववल्लभाम्।
निवारितश्च गोपीभिर्बलिष्ठाभिश्च नारद ॥४२
यथानीतः सापराधो दण्ड्यो राजभयादिभिः।
चकार राधां क्रोडे च समागत्य कृपानिधिः ॥४३
चेतनां कारयामास बोधयामास बोधनैः।
सम्प्राप्य चेतनां देवी ददर्श प्राणवल्लभम् ॥४४
बभूव सुस्थिरा देवी तत्याज विरहज्वरम्।
चकार कान्तं सा कान्ता गात्रालिङ्गनमीप्सितम् ॥४५

गोपियों के द्वारा सुन्दर श्वेत चमरोंसे वहाँ राधा की सेवा की जा रही थी। राधा के निश्चेष्ट शरीर में शीतल चन्दन को इन गोपियोंके द्वारा लगाया गया था और स्निग्ध वस्त्र से वह संयुत थी। इस रीतिसे उस सती की सेवा हो रही थी ।४१। उसी समय कृष्ण ने वहाँ आकर अपनी प्राण वल्लभा उसको देखा। हे नारद! जो बलिष्ठ गोपियाँ थीं

उन्होंने उनका निवारण भी किया था ।४२। जैसे कोई अपराध से युक्त और राज भय आदि से दंड के योग्य होता है वैसे वह वहाँ आये थे । कृपानिधि ने यहाँ आकर राधा को अपनी गोदमें लिटा लिया था ।४३ श्रीकृष्णने उससमय अनेक बोधनोंके द्वारा उसे ज्ञान कराया और चेतना प्राप्त कराई थी । जब राधा को चेतना प्राप्त हो गई तो उसने वहाँ अपने प्राण वल्लभ का दर्शन किया था ।४४। श्रीकृष्ण को देखकर वह देवी सुस्थिर हुई और विरह के ज्वर का उसने त्याग कर दिया था । उस कान्ता ने फिर अपने कान्त से ईप्सित गात्र का आलिङ्गन किया था ।४५।

८५—अक्रूरस्य कृष्णसमीपे गमनम्

यथाऽक्रूरः स्वशरणं गत्वा कंसेन प्रेषितः ।
चकार शयनं तल्पे भुक्त्वा मिष्टान्नमुत्तमम् ॥१
सकर्पूरञ्च ताम्बूलं च खाद वासितं जलम् ।
जगाम निद्रां सुखतः सुखसम्भोगमात्रतः ॥२
ततो ददर्श सुस्वप्नं पुराणश्रुतिसम्मितम् ।
निशावशेषसमये वाद्यादिपरिवर्जिते ॥३
अरोगी बद्धकेशश्च वस्त्रयुग्मसमन्वितः ।
सुतल्पशायी सुस्निग्धश्चिन्ताशोकविवर्जितः ॥४
किशोरवयसं श्यामं द्विभुजं मुरलीधरम् ।
पीतवस्त्रपरीधानं वनमालाविभूषितम् ॥५
चन्दनोक्षितसर्वाङ्गं मालतीमाल्यशोभितम् ।
भूषितं भूषणार्हञ्च सद्रत्नमणिभूषणैः ॥६
मयूरपिच्छचूडञ्च सस्मित पद्मलोचनम् ।
एवम्भूतं द्विजशिशुं ददर्श प्रथमं मुने ॥७

नारायण ने कहा—कंस नृप के द्वारा भेजे हुए अक्रूर अपने गृह में गए थे और वहाँ उत्तम मिष्ठान्न को खाकर तल्प पर उसने शयन किया था ।१। उस अक्रूर ने सुवासित जलपान किया और कर्पूर समन्वित तांबूल का चर्वण किया था । फिर वह सुख संभोग से सुख-पूर्वक निन्द्रा को प्राप्त होगए थे ।२। उस समय पुराण और श्रुति से सम्मत

वहुत सुन्दर वहाँ स्वप्न अक्रूर ने निशा के निशा के अवशेष होने के समय में देखा था जवकि वाद्य आदि सब परिवर्जित हो गए थे ।३। अक्रूर ने स्वप्न में देखा था कि एक कोई रोग से रहित अर्थात पूर्ण स्वस्थ, अपने केशोंको बाधे हुए, दो वस्त्रों से संयुत पुरुष है जो सुन्दर शय्या पर शयन कर रहा है- सुस्निग्ध और चिन्ता शोक आदि सब विकारों से रहित है ।४। फिर अक्रूर ने स्वप्न में देखा था कि एक किशोर अवस्था वाला, श्याम वर्ण से युक्त, दो भुजाओं वाला, मुरली-धारी, पीताम्वर का परीधान किये हुए और वन माला से विभूषित हैं ।५। उस पुरुष के समस्त शरीर में चंदन लगा हुआ है और मालती के पुष्पों की मालाओं से वह सुशोभित हो रहा है । सुन्दर रत्नों के भूषणों से भूषण के योग्य वह विभूषित हो रहा है ।६। उसके मोर की पंख लगी हुई है, स्मित से युक्त उसका मुख है और पद्म के समान परम सुन्दर नेत्रों वाला है । हे मुने ! प्रथम इस प्रकार का एक द्विज का शिशु अक्रूर ने अपने स्वप्न में देखा था ।७

ततो ददर्श रुचिरां पतिपुत्रवतीं सतीम् ।
पीतवस्त्रपरीधानां रत्नभूषणभूषिताम् ॥८
ज्वलतप्रदीपहस्ताञ्च शुक्लधान्यकरां वराम् ।
शरच्चन्द्रनिभास्यां च सस्मितां वरदां शुभाम् ॥९
ततो ददर्श विप्रं च प्रकुर्वन्तं शुभाशिषम् ।
श्शेतपद्मं राजहंसं तुरगंच सरोवरम् ॥१०
ददर्श चित्रितं चारुफलितं पुष्पितं शुभम् ।
आम्रनिम्बनारिकेलगुर्वार्ककदलीतरुम् ॥११
दशन्तं श्वेतसर्पं च स्वात्मानं पर्वतस्थितम् ।
वृक्षस्थञ्च गजस्थञ्च तरिस्थं तुरगस्थितम् ॥१२
वीणां वादितवन्तञ्चभुक्तवन्तञ्च पायसम् ।
दधिक्षीरयुतान्नञ्च पद्मपत्रस्थमीप्सितम् ॥१३

कृमिविट्सहिताङ्गञ्च रुदन्तं मोहितं तदा।
शुक्लधान्यपुष्पकरं क्षण चन्दनचर्चितम् ॥१४

अक्रूर ने स्वप्न में एक सती सधवा स्त्री को देखा जो अपने पति और पुत्रादि संयुक्त थी। वह सती पीत वर्ण के वस्त्र का परीधान किए हुए थी और रत्नों के भूषणों से उसके सभी अङ्ग समलंकृत ही रहे थे।८। उसके करों में जलते हुए दीपक थे तथा शुक्ल धान्य वह श्रेष्ठ सती अपने हाथ में लिए हुए थीं। उसका मुख शरतकाल के पूर्ण चन्द्र के समान सुन्दर था, उसके मुख पर मन्द मुस्कान झलक रही थी और वरदा तथा जो शुभ थी। इमके अनन्तर स्वप्नमें देखाथा कि कोई प्रिय आया हुआ है जो शुभ आशीर्वाद दे रहा है। अक्रूर ने स्वप्न में देखा कि वहाँ श्वेत पद्म हैं, राजहंस हैं और तुरङ्ग तथा सरोवर है।९-१०। अक्रूर ने चित्रित, सुन्दर, शुभ, फलों से और पुष्पों से युक्त आम्र निम्ब नारियल, गुर्वार्क और कदली के वृक्षों को देखा था।११। उसने स्वप्न में अपने आपको पर्वत पर स्थित श्वेत सर्प द्वारा दर्शन करतेहुए देखा था। इसके पश्चात उसने अपने आपको कटे वृक्ष पर स्थित, गज पर बैठे हुए, अश्व और तरि पर स्थित देखा था।१२। अक्रूर ने स्वप्न में देखा था कि वह वीणा वादन कर रहे है, पायस का भक्षण कर रहे हैं और पद्मपत्र पर स्थित इच्छित दधि, क्षीर से युक्त अन्न का भोजन कर रहे हैं।१३। उसने देखा था कि वह कृमि और विट् से सहित अङ्गों वाला है रुदन कर रहा है, मोहित हो रहा है तथा शुक्ल धान्य और पुष्प हाथमें ग्रहण किये हुये हैं एवं चन्दन से चर्चित हैं।१४।

प्रासादस्थं समुद्रस्थमात्मानञ्च सलोहितम्।
छिन्नभिन्नक्षताङ्गञ्च मेदपूयसमन्वितम् ॥१५
ततो ददर्श रजतं मणिं कुम्भञ्च काञ्चनम्।
मुक्तामाणिक्यरत्नञ्च पूर्णकुम्भजलं शुभम् ॥१६
सुरभीञ्च सवत्सां च वृषभेन्द्रं मयूरकम्।
शुकञ्च सारसं हंसं चिल्लं खञ्जनमेव च ॥१७

ताम्बूलं पुष्पमाल्यं ज्वलदग्निं सुरार्चनम् ।
पार्वतीप्रतिमां कृष्णप्रतिमां शिवलिंगकम् ॥१८
विप्रबालां च बालां च सुपक्वफलितां कृषिम् ।
देवस्थलीं च राजेन्द्र सिंहं व्याघ्रं गुरुं सुरम् ॥१९
दृष्ट्वा स्वप्नं समुत्तस्थौ चाकाराह्निकमीप्सितम् ।
उद्धवं कथयामास सर्वं वृत्तान्तमेव च ॥२०
उद्धवाज्ञां समादाय कृत्वा गुरुसुरार्चनम् ।
यात्रां चाकार श्रीकृष्णं ध्यात्वा मनसि नारद ॥२१

इसके उपरान्त अक्रूर ने स्वप्न में अपने आपको एक प्रासाद पर स्थित, समुद्र में स्थित, लोहित, युक्त, छिन्न-भिन्न एवं क्षत अङ्गों वाला एवं मेद और पूय (मवाद) से युक्त देखा था ।१५। इसके पश्चात् उसने स्वप्न में रजत, शुभ्रमणि, सुवर्ण, मुक्ता,माणक्य रत्न और जलसे परिपूर्ण शुभ कुम्भको देखा था ।१६। वत्स के सहित सुरभी, वृषभेन्द्र, मयूर शुक, सारस, हंस, चील, खंजनको देखा था ।१७। अक्रूर ने फिर स्वप्न में ताम्बूल, पुष्पोंकी माला,जलती हुई अग्नि, सुरोंका अर्चन, पार्वतीकी प्रतिमा, कृष्ण की मूर्ति और शिव की लिंग मूर्तिको देखा था ।१८। ब्राह्मण की बाला, बाला और सुपक्व एव फलित कृषि, देवस्थली, राजेन्द्र, सिंह, व्याघ्र, गुरु और सुर की स्वप्न में अक्रूर ने देखा था ।१९। ऐसे परम शुभ स्पप्न को देखकर अक्रूर शय्या से उठ गयेथे फिर उन्होंने अभीष्ट आह्निक किया था। इसके अनन्तर अक्रूरने अपने शुभ स्वप्न को उद्धव से कह दिया था ।२०। उद्धव की आज्ञा प्राप्त करके गुरु और सुरों का अर्चन करने के पश्चात् हे नारद ! मन में श्रीकृष्ण का ध्यान करके अक्रूर ने अपनी ब्रज की यात्रा आरम्भ करदी थी।२१।

ददर्श वर्मत्न्येवं च मंगलार्हं शुभप्रदम् ।
वांछाफलप्रदं रम्यं पुरो मङ्गलसूचकम् ॥२२
वामे शवं शिवां पूर्णं कुम्भं वकुल चासकम् ।
पतिपुत्रवतीं साध्वीं दिव्याभरणभूषिताम् ॥२३

शुक्लपुष्पं च माल्यं च धान्यं च खंजनं शुभम् ।
दक्षिणे ज्वलदग्निं विप्रं च वृषभं गजम् ॥२४
वत्सप्रयुक्तां धेनुं च श्वेताश्वं राजाहंसकम् ।
येश्यां च पुष्पमालां च पताकां दधि पायसम् ॥२५
मणिं सुवर्णं रजतं मुक्तामाणिक्यमीप्सितम् ।
सद्योमांसं चान्नं च माध्वीकं घृतमुत्तमम् ॥२६
कृष्णसारं फलं लाजसिद्धान्नं दर्पणं तथा ।
विचित्रितं विमानं च सुदीप्तां प्रतिमां तथा ॥२७
शुक्लोत्पलं पद्मवनं शङ्खचिल्लं चकोरकम् ।
मार्जारं पर्वतं मेघं मयूरं शुकसारसम् ॥२८

अक्रूर ने मार्ग में भी इसी प्रकार से मङ्गल की सूचना देने वाले—शुभ का सन्देश बताने वाले—मङ्गल के योग्य-रम्य इच्छा को पूर्ण करने वाले शकुन देखे थे ।२२। अपने वाम भाग में शव, शिवा, पूर्ण कुम्भ—नकुल चासक, पति, और पुत्र के सहित साध्वी नारी जो दिव्य आभरणों ने भूषित थी, देखी थी ।२३। शुक्ल पुष्प, माल्य, धान्य और शुभ खंजन पक्षी को देखा था । दक्षिण भागमें जलती हुई अग्नि-विप्र-वृषभ-गज देखा था ।२४। वत्स से युक्त धेनु-श्वेत घोड़ा, राजहंस, वेश्या, पुष्पों की माला, पताका, दधि, और पायस देखा था ।२५। मणि, सुवर्ण, रजत, मुक्ता, ईप्सित माणिक्य, ताजा, मांस, चन्दन, माध्वीक और उत्तम घृत देखा ।२६। कृष्णसार, फल, लाजा, सिद्धान्न, दर्पण, विचित्रित विमान, सुदीप्त प्रतिमा देखे थे ।२७। शुकलोत्पल, पद्मों का वन, शङ्खचिल्ल, चकोर, मार्जार, पर्वत मेघ, मयूर, शुक और सारस को देखा था ।२८।

शङ्खकोकिलवाद्यानां ध्वनिं शुश्राव मंगलम् ।
विचित्रं कृष्णसंगीतं हरिशब्दं जयध्वनिम् ॥२९
एवम्भूतं शुभं दृष्ट्वा श्रुत्वा प्रहृष्टमानसः ।
प्रविवेश हरिं स्मृत्वा पुण्यं वृन्दावनं वनम् ॥३०

ददर्श पूरतो रम्य रासमण्डलमीप्सितम् ।
चन्दनागुरुकस्तूरीपुष्पचन्दनवायुना ॥३१
वासितं मंगलघटे रम्भास्तक्ष्भैर्विराजितम् ।
आम्रपल्लवसंघैश्च पट्टसूत्रविचित्रितैः ॥३२
शोभितैःपरितः शश्वत् पद्मरागविनिर्मितम् ।
शोभितं शोभनार्हंच त्रिकोटिरत्नमन्दिरैः ॥३३
रम्तैः कुंजकुटीरैश्च राजितं शतकोटिभिः ।
रासं वृन्दावनं दृष्ट्वा कियद्दूरं ययौ च सः ॥३४
ददर्श पुरतो रम्यं नन्दव्रजमनुत्तमम् ।
परं वैकुण्ठसंकशं वैकुण्ठनिलयं शुभम् ॥३५

मार्ग में अक्रूर ने शंख और कोकिल के वाद्यों का श्रवण किया था जो कि मङ्गल ध्वनि होती है । विचित्र कृष्ण का संगीत-हरि शब्द और जय ध्वनि का श्रवण किया था ।२९। इस प्रकार के शुभ शकुनों का देखकर तथा सुनकर अक्रूरका मनवहुत प्रसन्न हो गयाथा । फिर उसने हरिका स्मरण करके परम पुण्य स्थल वृन्दावनके वनमें प्रवेश किया था ।३०। वहाँ प्रवेश करते ही सामने अत्यन्त रमणीय और अत्यमीष्ट रास मण्डल को देखा था जो चन्दन-अगूरी—कस्तूरी—पुष्प और चन्दन की वायु से सुगन्धित था तथा मङ्गल घटों से रम्भा के स्तम्भों से सुशोभित था । वह रास मण्डल आम्रके पल्लवोंके समुदायसे और पटट्सूत्रों से विचित्र हो रहा था ।३१-३२। वह रास मण्डल चारों ओर से परम शोभित था तथा पद्मराग मणियोंके द्वारा विनिर्मित था । तीन करोड़ रत्नों के निर्मित मन्दिरों से वह शोभा के योग्य एवं शोभित हो रहाथा ।३३। उसमें सैकड़ों करोड़ों अति रम्य कुंज कुटीर बनी हुई थी जिनसे उसकी शोभा अत्यन्त बढ़ी हुई थी । फिर रास वृन्दावन को देखकर वह कुछ ही दूर गया था ।३४। फिर उस अक्रूर ने सामने परम उत्तम एवं अतिरम्य नन्द व्रज को देखा था । यह वैकुण्ठ के ही समान और उससे भी उत्तम था । यह वैकुण्ठ के शुभ निलय से संयुत था ।३५।

रत्नसोपानसंयुक्तं रत्नस्तम्भैर्विराजितम् ।
नानाचित्रविचित्राढ्यं सद्रत्नवलयान्वितम् ॥३६
खचितं मणिसारेण रचितं विश्वकर्मणा ।
द्वारिदृष्टेन मार्गेण राजद्वारं विवेश सः ॥३७
पताकारत्नजालाढ्यं मुक्तामाणिक्यभूषितम् ।
रत्नदर्पणशोभाढ्यं रत्नचित्रविचित्रतम् ।
रत्नवीथीविरचितंशोभितैमंगलैर्गृहैः ॥३८
अक्रूरागमनं श्रुत्वा साह्लादो नन्द एव च ।
सहितो रामकृष्णाभ्यां जगामानु व्रजाय वै ॥ ३९
वृषभान्वादिभिर्युक्तः कृत्वा वेश्यापुरः सराम् ।
पूर्णकुम्भङ्गजेन्द्रं च कृत्वाऽग्रं शुक्लधान्यकम् ॥४०
कृष्णां णां मधुपर्कं च पाद्यं रत्नासनादिकम् ।
गृहीत्वा सादरः शान्तः सस्मितो विनतस्तथा ॥४१
आनन्दयुक्तो नन्दश्च सगणः सहबालकः ।
दृष्ट्वाऽक्रूरं महाभागं तूर्णमालिंगनं ददौ ॥४२

इसमे रत्नों से निर्मित सोपान बने हुए थे और यह रत्नोंके स्तम्भों से शोभायमान था । यह अनेक चित्र-विचित्र वस्तुओं से युक्त था तथा सद्रत्नों के वलयों से समन्वित तथा ।३६। उत्तम मणियों से उचित और विश्वकर्मा के द्वारा रचित था । द्वारि दृष्टि मार्ग के द्वारा उसने राज-द्वारा में प्रवेश किया था ।३७। वह भवन पताका और रत्नों के जालसे युक्त था तथा मुक्ता और मणियों से भूषित था । रत्नों के दर्पणों की शोभा से युक्त और रत्नोंसे चित्र विचित्र था । उसमें रत्नों की ही बनी हुईं थी तथा वह मङ्गल घरों से परम मङ्गलमय था ।३८। अक्रूर के आगमन का श्रवण कर नन्द को परम आह्लाद हुआ था । वह नन्द राम और कृष्णको साथमें लेकर अनुव्रजनके लिए वहाँ आगे गए थे।३९। उस समय वृषभानु आदि भी सब नन्द के साथ गए थे । अपने आगे वेश्या को ले गये थे तथा जल पूर्ण कलश-गजेन्द्र और शुक्ल धान्य को उन्होंने अपने आगे कर लिया था ।४०। कृष्ण गौ-मधु पर्क-पाद्य और

रत्नासन आदि का ग्रहण कर बहुत आनन्दके साथ शान्त एवं विनय भाव से युक्त होकर मुस्कराते हुए अक्रूर को लिवाने के लिए नन्द गए थे ।४१। नन्द उस समय वहुत ही आनन्द से युक्त थे और अपने गण तथा वालकों के साथ नन्द ने अक्रूर का दर्शन किया था और महाभाग का तुरन्त ही बढ़ कर आलिङ्गन किया था ।४२।

प्रणेमुः शिरसाः सर्वे गोपा जगृहुराशिषम् ।
परस्परञ्च सं योगो वभूव गुणवान् मुने ।।४३
क्रोडे चकाराक्रूरश्च कृष्णं रामं क्रमेण च ।
चुचुम्ब गण्डयुगले पुलकाञ्चितविग्रहः ।।४४
साश्रुनेत्रोऽतिसाह्लादः कृतार्थः सिद्धबाञ्छितः ।
ददर्श कृष्णं द्विभुजं क्षणं श्यामलसुन्दरम् ।।४५
पीतवस्त्रपरीधानं मालतीमाल्यविभूषितम् ।
चन्दनोक्षितसर्वागं परं वंशीधरं वरम् ।।४६
स्तुतं ब्रह्मेशशेषाद्यैर्मुनीन्द्रैः सनकादिभिः ।
वीक्षितं गोपकन्याभिः परिपूर्णतमं विभुम् ।।४७
क्षणं ददर्श क्रोडस्थं सस्मितञ्च सस्मितञ्च चतुर्भुजम् ।
लक्ष्मीसरस्वतीयुक्तं वनमालाविभूषितम् ।।४८
सुनन्दनन्दकुमुदैः पार्षदैः परिसेवितम् ।
सेवितं सिद्धसंघैश्च भक्तिनम्रैः परात्परम् ।।४९

उस जमय समस्त गोपो ने अक्रूर को शिर से प्रणाम किया था और आशीर्वाद प्राप्त किया था। हे मुने ! उस समय परस्पर गुण वाला संयोग हुआ था ।४३। अक्रूर ने बलराम और कृष्ण को अपनी गोद में क्रम से उठा लियाथा और उनके गण्डयुगलों को बड़े ही स्नेहसे चुम्बित किया था तथा स्वयं पुलकायमान शरीर वाले होगए थे ।४४। अक्रूर के नेत्रों से प्रेमाश्रुओं की धारा वह रही थी। वह अत्यन्त ही आह्लाद से युक्त—कृतार्थ और सिद्ध वांछा वाले हो गयेथे जिस समय उन्होंने एक क्षण भर श्यामल सुन्दर दो भुजाओं वाले श्रीकृष्णका दर्शन किया था ।४५। पीत वस्त्र के परीधान करने वाले— मालती लता के

पुष्पों की मालाओं से विभूषित—चंदन से उक्षित सर्वाङ्ग वाले—वंशी को धारण किए हुए परम श्रेष्ठ श्रीकृष्ण का स्वरूप था ।४६। श्रीकृष्ण ब्रह्मा-शेष-ईश आदि के द्वारा मुनीन्द्रों के द्वारा और सनकादि के द्वारा स्तुत थे । गोपिकायें उनके स्वरूपको देख रहीं थीं तथा वह परिपूर्णतम एवं विभु थे ।४७। एक क्षणके लिए अक्रूर ने ऐसे स्वरूप वाले श्रीकृष्ण को जबकि वह उसकी गोदमें थे चार भुजाओंसे युक्तऔर मुस्कराते हुए देखा था । उस समय अक्रूर ने कृष्ण को लक्ष्मी और सरस्वतीके सहित तथा वनमाला से भूषित देखा था ।४८। अक्रूर ने देखा था कि वह सुनन्द-नन्द-कुमुद नामधारी पार्षदों के द्वारा सेवित हैं और पर से भी पर वह भक्ति-भाव से विनम्र सिद्धों के समुदाय के द्वारा सेवित हो रहे हैं ।४९।

क्षणं ददर्श देवं तं पञ्चवक्त्रं त्रिलोचनम् ।
शुद्धस्फटिसंकाशं नागाराजविराजितम् ।।५०
दिगम्बरं परं ब्रह्म भस्मांगश्च जटायुतम् ।
जपमालाकरं ध्याननिष्ठं श्रेष्ठञ्च योगिनाम् ।।५१
क्षणं चतुर्मुखं ध्याननिष्ठं श्रेष्ठं मनीषिणाम् ।
क्षणं धर्मस्वरूपञ्च शेषरूपं क्षणं क्षणम् ।।५२
क्षणं भास्कररूपञ्च ज्योतिरूपं सनातनम् ।
क्षणं परमशोभाढ्यं कोटिकन्दर्प निन्दितम् ।।५३
कामिनीकमनीयं च कामुकं कामसंयुतम् ।
एवम्भूतं शिशुं दृष्ट्वा स्थापयामास वक्षसि ।।५४
रत्नसिंहासने रम्ये नन्ददत्ते च नारद ।
कृत्वा प्रदक्षिणं भक्त्या पुलकांचितविग्रहः ।
प्रणम्य शिरसा भूमौ तुष्टाव पुरुषोत्तमम् ।।५५

एक क्षण के लिये उन्हें अक्रूर ने पांच मुखों से और तीन नेत्रों से युक्त-शुद्ध स्फटिक मणि के समान वर्ण वाले— नाग राजों से विराजित देखा था । अक्रूरने देखाकि वह दिगम्बर रूप धारी परम ब्रज—भस्म-भूषित अङ्ग वाले जटाओं से युक्त-हाथ में जप की माला लिये हुए--

योगियों में श्रेष्ठ और ध्यान में परम निष्ठ थे।५०-५१। एक क्षण में ध्यान से निष्ठ चतुर्मुखकी जो मनीषियोंमें सर्वश्रेष्ठ है और दूसरे क्षण में धर्म से स्वरूपको तथा क्षण भरमें ज्योति रूप वाले सनातन भास्कर के रूप को और क्षण भर में ही कोटि कन्दर्पों को पराजित करने वाले परम शोभासे युक्त स्वरूपका दर्शन कियाथा।५२-५३।वह इतना सुन्दर स्वरूप था जो कामिनियों का कमनीय था--कामुक और काम से संयत था। इस प्रकार के उस शिशुका दर्शन करके अक्रूरने अपने वक्ष:स्थल में उसको स्थापित कर लिया था।५४। हे नारद ! नन्द के द्वारा प्रदान किए हुए रत्नोंके सिंहासन पर भक्तिभावसे प्रदक्षिणा करके अक्रूरका शरीर पुलकायमान होगया था। अक्रूर ने भूमिमें अपना मस्तक टेककर प्रणाम किया था तथा वह पुरुषोत्तम की स्तुति करने लगे।५५।

नमः कारणरूपाय परमात्मस्वरूपिणे।
सर्वेषामपि विश्वनामीश्वराय नमो नमः ॥५६

पराय प्रकृतेरीश परात्परतराय।
निर्गुणाय निरीहाय नीरूपाय स्वरूपिणे ॥५७

सर्वदेवस्वरूपाय सर्वदेवेश्वराय च।
सर्वदेवाधिदेवाय विश्वादिभूतरूपिणे ॥५८

असंख्येषु च विश्वेषु ब्रह्मविष्णुशिवात्मकः।
स्वरूपायादिबीजाय तदीशविश्वरूपिणे ॥५९

नमो गोपांगनेशाय गणायेश्वररूपिणे।
नमः सुरगणेशाय राधेशाय नमो नमः ॥६०

राधारमणरूपाय राधारूपधराय च।
राधाराध्याय राधाया प्राणाधिकतराय च ॥६१

राधासाध्याय राधाधिदेवप्रियतमाय च।
राधाप्राणाधिदेवाय विश्वरूपायते नमः ॥६२

वेदस्तुतात्मवेदज्ञरूपिणे वेदिने नमः।
वेदाधिष्ठातृदेवाय वेदबीजाय ते नमः ॥६३

अक्रूर ने कहा-परमात्माके स्वरूप वाले कारण रूप आपको मेरा नमस्कार। समस्त विश्वों के ईश्वर आपके लिए मेरा वार-बार प्रणाम है।५६। हे प्रकृतिके स्वामिन्! आप पर हैं और पर से भी परतर हैं। आप गुणों से रहित हैं-निरीह हैं अर्थात् आप सब प्रकार की इच्छा से शून्य है---आप रूप से हीन ह और स्वरूप वाले हैं ऐसे आपको मेरा नमस्कार है।५७। आप समस्त देवों के स्वरूप वाले हैं अर्थात् आप ही में सम्पूर्ण देवों में विराजमान रहते हैं। आप समस्त देवों के ईश्वर हैं और सर्व देवों के भी अधिदेव हैं तथा विश्व आदि भूतों के रूप वाले है ऐसे आपके लिए नमस्कार है।५८। इन असंख्य विश्वों में आप ब्रह्मा-विष्णु और शिवके रूप वाले हैं,आप आदि बीजरूप स्वरूप वालेहैं तथा इसके ईश विश्वरूप वाले हैं ऐसे आपके लिये मेरा वारम्वार प्रणाम है।५६। गोपाङ्गनाओं के ईश के लिए नमस्कारहै तथा गणेश और ईश्वर रूप धारी एवं सुरगण के ईशके लिए मेरा नमस्कारहै। राधाके स्वामी के लिये बार-वार मेरा प्रणाम है।६०। राधाको रमण कराने वाले रूप धारी को तथा राधा के रूपको धारण करने वाले—राधा के आराध्य देव और राधाके प्राणों से भी अधिक प्रिय के लिये नमस्कार है।६१। राधाकें द्वारा साध्य-राधा के अधिदेव प्रियतम--राधा के प्राणों के अधि-देव और विश्वरूप आपके लिये मेरा नमस्कार है।६२। वेदों के द्वारा स्तुत-आत्मा वेदके ज्ञाता रूप वाले वेदी आपके लिए नमस्कार है। वेदों के अधिष्ठातृदेव वेदों के बीच आपके लिये मेरा नमस्कार है।६३

यस्य लोमसु विश्वानि चासंख्यानि च नित्यशः।
महद्विष्णोरीश्वराय विश्वेशाय नमो नमः॥६४
स्वयं प्रकृतिरूपाय प्राकृताय नमो नमः।
प्रकृतीश्वररूपाय प्रधानपुरुषाय च॥६५
इत्येवं स्तवनं कृत्वा मूर्च्छामाप सभातले।
पपात सहसा भूमौ पुनरीशं ददर्श सः॥६६
बहिः स्थं हृदयस्थञ्च परमात्मानमीश्वरम्।
परितः श्यामरूपञ्च विश्वस्थं विश्वमेव च॥६७

अक्रूरं मूर्च्छितं दृष्ट्वा नन्दः सादरपूर्वकम् ।
रत्नसिंहासने रम्ये वासयामास नारद ॥६८
पप्रच्छ सर्ववृत्तान्तं किञ्चिद्दृष्टमिति त्वया ।
मिष्टान्नं भोजयामास कुशलञ्च पुनः पुनः ॥६९
अक्रूरः कथयामास कंसवृत्तान्तमीप्सितम् ।
स्वपित्रोर्मोक्षणार्थञ्च गमनं रामकृष्णयोः ॥७०

जिसके रोम कूपों में असंख्य विश्व नित्य रहते हैं और जो महा विष्णु के भी ईश्वर हैं ऐसे विश्वों के ईश आपके लिये मेरा नमस्कार है और बारम्बार नमस्कार है ।६४। आप स्वयं प्रकृति के रूप बोले हैं और प्राकृत हैं । आप प्रकृतिके ईश्वर रूप वालेहैं और प्रधान पुरुषहैं ऐसे आपके लिये मेरा नमस्कार है ।६५। इस प्रकार से अक्रूर स्तवन करके स्वयं मूर्च्छा को प्राप्त हो गयेथे और सभा स्थलमें सहसा भूमिमें गिर पड़े थे और उठकर पुनः उसने अपने ईश्वर का दर्शन किया था ।६६। अक्रूर ने बाहिर स्थित-हृदय में स्थित उस परमात्मा ईश्वर को जो सब ओर थे--विश्व में स्थित और विश्वरूप एवं श्याम स्वरूप वाले थे ऐसे प्रभु का दर्शन किया था ।६७। हे नारद ! जब नन्द ने अक्रूर को मूर्च्छित दशा में देखा था तो उसने उसको आदर के साथ रम्य सिंहासन पर बिठा दिया था ।६८। फिर नन्द ने उनसे सब वृत्तान्त पूछा था कि आपने क्या देखा है । इसके अनन्तर मिष्टान्न का भोजन कराया था और बार-बार कुशल पूछा था।६९। अक्रूर ने राजा कंस का जो अभीष्ट वृत्तान्त था वह सब नन्द से कह दियाथा । अपने माता-पिता के मोक्षण कराने के लिए वलराम और श्रीकृष्ण का मथुरा में गमन हुआ था ।७०।

अथ सुष्वाप समये परं संहृष्टमानसः ।
रम्ये चम्पकतल्पे च कृष्णं कृत्वा स्ववक्षसि ॥७१
प्रातरुत्थाय सहसा कृत्वाह्निकमनुत्तमम् ।
स्वरथे स्थापयामास रामं कृष्णं जगत्पतिम् ॥७२

गव्यं पंचप्रकारंच नानाद्रव्यं सुदुर्लभम्
वृषभानुञ्च नन्दञ्च सुनन्दं चन्द्रभानुकम् ।।७३
नानाप्रकारं वाद्यञ्च मृदङ्गमुरजादिकम् ।
पटहं पणवञ्चैव ढक्कां दुन्दुभिमानकम् ।।७४
सज्जासहननीकांस्यपट्टमर्दलमाण्डवीम् ।
वादयामास सानन्दं नन्दगोपो व्रजेश्वरः ।।७५
श्रुत्वा वाद्यञ्च गोप्यश्च गमनं रामकृष्णयोः ।
दृष्ट्वा कृष्णं रथस्थं तमाययुः कोपपीडिताः ।।७६
कृष्णेन वारिताः सर्वा प्रेरिता राधया द्विज ।
बभञ्जुरीश्वररथं पादाघातेन लीलया ।।७७

इसके उपरान्त अक्रूर समय उपस्थित होने पर परम हर्षित होते हुए अति रमणीय चम्पक के तल्प पर कृष्ण को अपने वक्षःस्थल पर रखकर सो गए थे ।७१। प्रातःकाल में उठकर तुरन्त अपना उत्तम आह्निक कर्म समाप्त करके अक्रूर ने अपने रथ में बलराम और जगत् के पति श्रीकृष्ण को स्थापित कर दिया था।७२। उनके साथमें पाँचों प्रकार का गव्य तथा अन्य अनेक प्रकार के सुदुर्लभ द्रव्य भी रख दिए थे । उस रथ में नन्द--वृषभान--सुनद और चन्द्र भानु भी बैठ गए थे ।७३। मृदङ्ग--मुरज आदिक अनेक प्रकार के वादन थे । पटह, पणक, ढक्का, दुन्दुभि, आनक,सज्जा, सहननी,कांस्यपट्ट, प्रर्दल और माण्डवी को आनन्द के सहित व्रजेश्वरी नन्दगोप ने बजवाया था ।७४-७५। इन वाद्यों की ध्वनिको तथा श्रीराम कृष्ण दोनों भाइयों के गमनको श्रवण कर एवं रथ में संस्थित कृष्णको देखकर गोपियाँ कोपसे पीड़ित होती हुई उनके समीप में आगईं थी-।७६। हे द्विज ! वे समस्त गोपियां राधा के द्वारा प्रेरित होकर वहाँ आई थी । यद्यपि कृष्ण के द्वारा वे वारित भी की गई थी तो भी उन्होंने लीला से पादों के आघात के द्वारा ईश्वर के रथ का भंजन किया था ।७७।

तत्र सर्वेषु गोपेषु हाहाकारं कृतेषु च ।
प्रययुर्बलवत्यश्च कृष्णं कृत्वा स्ववक्षसि ।।७८

काचित्क्रूरं तमक्रूरं भर्त्सयामास कोपतः।
काश्चिद्बद्ध्वाच वस्त्रेण चाक्रूरं प्रययुस्ततः।।७६
काचित्तं ताडयामास कङ्कणेनं करेण च।
तद्वस्त्रं हारयामास कृत्वा विवसनं मुने ॥८०
क्षतविक्षतसर्वाङ्गं दृष्ट्वाक्रूरञ्च माधवः।
जगाम राधानिकटं बोधयामास तां पुनः ॥८१
आध्यात्मिकेन योगेन विनयेन च सादरम्।
अक्रूरं बोधयामास बोधयामास तां विभुः ॥८२
आकाशत्पतितं दिव्यं मन्त्रप्रस्थापितं रथम्।
विचित्रवस्त्रसंयुक्तं ददर्श पुरतो हरिः ॥८३
खचितं मणिराजेन रचितं विश्वकर्मणा।
तं दृष्ट्वा मातृभवनमाजगाम जगत्पतिः ॥८४
भुक्तवा पीत्वा सुखं सुप्त्वा गमने सहबान्धवः।
तस्थौ मुनीन्द्रदेवेन्द्रब्रह्मेशशेषवन्दितः ॥८५
सुषुपर्गोपिकाः सर्वाः परं संहृष्टमानसा।
पुष्पतल्पे च रम्ये च राधया सह नारद ॥८६
सर्वे च नन्दयुक्ताश्च जना गोकुलवासिनः।
केचिद्गोपाश्च ननृतुः केचित् संगीततत्पराः ॥८७

उस समय वहाँ पर समस्त गोपों के द्वारा हाहाकार करने पर बलवती गोपियाँ कृष्ण को अपने वक्षःस्थल में लगाकर चली गई थीं।७८। कूछ गोपियाँ कोप से अतिक्रूर उस अक्रूरका भर्त्सना देने लगी थी और कुछ ब्रज वालायें वस्त्र से अक्रूर को बाँध कर वहाँ से चली गई थीं।७६। कुछ गोपाङ्गनाओं ने अपने कर और कंकण से उस अक्रूर को ताड़ित किया था। हे मुने! कुछ ने उसके वस्त्र छीनकर उसे वसन हीन कर दिया था।८०। माधव उस प्रकार से क्षत-विक्षत अङ्गों वाले अक्रूर को देखकर वह राधा के पास गये और उसको फिर उन्होंने समझाया था।८१। श्रीकृष्ण ने आध्यात्मिक योग के द्वारा तथा

बहुत ही आदर के साथ विनय से अक्रूर को समझाया था तथा विभुने उस राधा को भी प्रबोधन कराया था।८२। उस समय आकाश से एक परम दिव्य मन्त्रों द्वारा प्रस्थापित रथ आया जो विचित्र वस्त्रों से संयुक्त था। ऐसा एक रथ हरि ने अपने सामने देखा था।८३। यह रथ उत्तम मणियों से खचित था और विश्वकर्मा के द्वारा विरंचित किया था। उसको देखकर जगत के पति अपने माता के भवन में आ गए थे।८४। खा-पीकर और सुख पूर्वक शयन करके मुनीन्द्र-देवेन्द्र-ब्रह्मा-शेष और ईश के द्वारा वन्दना किए हुए श्रीकृष्ण अपने भाई के सहित गमन को स्थित हो गए थे।८५। समस्त गोपियां अत्यन्त संप्रहृष्ट मन वाली होती हुईं हे नारद ! राधा से साथ रम्य पुष्पों ने तल्पों पर सो गई थीं।८६। उस समय सभी गोकुल के निवास करने वाले जन आनन्द से युक्त हो गए थे। कुछ गोप तो नाचने लगे थे और कुछ संगीत में तत्पर हो गये थे।८७।

८७—यात्रामंगलवर्णनम्

राधिकायांच सुप्तायां सुप्तासु गोपिकासु च।
पुष्पचन्दनतल्पे च वायुना सुरभीकृते ॥१
तृतीयप्रहरेऽतीते निशायांच शुभक्षणे।
शुभचन्द्रर्क्षयोगे चामृतयोगसमन्विते ॥२
सौम्यस्वामियुते लग्ने सौम्यग्रहविलोकिते।
पापग्रहसमासक्तदुष्टदोषादिर्विजते ॥३
यशोदां बोधयामास कारयामास मङ्गलम्।
बन्धूनाश्वासयामास समुत्थाय हरिः स्वयम् ॥४
वाद्यं निषेधयामास राधिकाभयभीतवत्।
स्वतन्त्रो विश्वकर्त्ता च पाता भर्त्ता स्वतन्त्रवत् ॥५
प्रक्षाल्य पादयुगलं धृत्वा धौते च वाससी।
उवास संस्कृते स्थाने विलिप्ते चन्दनादिना ॥६

फलपल्लवसंयुक्तं संस्कृतं चन्दनादिभिः।
वामे कृत्वा पूर्णकुम्भं वह्निं विप्रं स्वदक्षिणे ॥७

नारायण ने कहा—परम सुगन्धित वायु के द्वारा सुरभी कृत पुष्प एवं चन्दन के तल्प (शय्या) पर राधा के सुत हो जाने पर तथा समस्त गोपिकाओंके सो जाने पर रात्रिमें तीसरे प्रहरके व्यतीत होजाने पर जब शुभ क्षण उपस्थित हुआ था उस समय में शुभ चन्द्र और नक्षत्र के योग हो जाने पर तथा अमृत योग के आने पर एवं सौम्यग्रह जो कि अपनी राशि का स्वामी था उसके लग्न में आ जाने पर और सौम्य ग्रहों की ही दृष्टि पूर्ण होने पर पाप ग्रहों से समासक्त दुष्ट ग्रहों दोष से रहित होने के समय में श्रीकृष्ण की मंगल-यात्रा का आरम्भ हुआ था ।१-३। हरि ने अपनी माता यशोदा की भली भाँति प्रबोधन कराया और मंगल कराया था । अपने समस्त बन्धु-बान्धवों को समाश्वासन दिया और स्वयं उस समय उठकर यात्रा को प्रस्तुत हो गए थे ।४। राधा के भय से डर कर कृष्ण ने वाद्य वादन का निषेध कर दिया था । यद्यपि यह स्वतन्त्र विश्व की रचना करने वाले तथा उसके पोषण-रक्षण और स्वतन्त्र की भाँति भरण करने वाले थे किन्तु फिरभी राधा के भय से भीत हो गये थे ।५। हरि ने दोनों चरणों का प्रक्षालन किया था और धौत वस्त्रों को धारण किया था फिर चन्दन आदि से विलिप्त सुसंस्कृत स्थान पर बैठ गयेथे ।६। वह स्थल फूलों और पल्लवों से संयुक्त था तथा चंदनादि से भली-भाँति संस्कार किये जाने वाला था । उनके वाम भाग मे उन स्थल में जल से पूर्ण कलश था और दक्षिण भाग में अग्नि—विप्र थे ।७।

पतिपुत्रतीं दीपं दर्पणं पुरतस्तथा।
दूर्वाकाण्डंच सुस्निग्धं पुष्प धान्यं सितंशुभम् ॥८
गुरुदत्तं गृहीत्वा च प्रददौ मस्तकोपरि।
घृतं ददर्श माध्वीकं रजतं कांचनं दधि ॥९

चन्दनं लेपनं कृत्वा पुष्पमालां गले ददौ ।
गुरुवर्गं ब्राह्मणंच वन्दयामास भक्तितः ॥१०
शङ्खध्वनिं वेदपाठं संगीतं मङ्गलाष्टकम् ।
विप्राशीर्वचनं रम्यं शुश्राव परमादरम् ॥११
ध्यात्वा मङ्गलरूपंच सर्वत्र मङ्गल प्रदम् ।
चिक्षेप दक्षिणं पादं सुन्दरं स्वात्मविग्रहम् ॥१२
विधृत्य नासिकां वामभागं मध्यमयाविभुः ।
विसृज्यवायुं सम्पूर्णं नासदक्षिणरन्ध्रतः ॥१३
ततो ययौ नन्दनन्दो नन्दस्य प्रांगणं वरम् ।
सानन्दः परमानन्दो नित्यानन्दः सनातनः ॥१४

उनके समक्ष पति पुत्र वाली सौभाग्यवती नारी-दीप दर्पण थे तथा दूर्वाकाण्ड-सुस्निग्ध पुष्प-धान्य जो सित और शुभ था । इनको गुरु ने दिया और मस्तक पर श्रीकृष्ण ने धारण किया । घृत, माध्वीक, रजत, कांचन और दधि का दर्शन किया ।८-९। इसके अनन्तर श्री कृष्ण ने चन्दन का लेपन किया और पुष्पों की माला को गले में पहिना फिर भक्ति भाव से गुरु वर्ग तथा ब्राह्मणों की वन्दना की ।१०। श्रीकृष्ण शंख की ध्वनि-वेदों का पाठ, संगीत, मंगलाष्टक और विप्रों द्वारा दिए हुए परम रम्य आशीर्वाद के वचनों को बहुत आदर के साथ श्रवण किया ।११। फिर मंगलके प्रदान करने वाले सर्वत्र मंगल रूप का ध्यान किया । इसके पश्चात स्वात्म विग्रह सुन्दर दक्षिण पाद का क्षेप किया ।१२। श्रीकृष्ण विभु ने नासिका के वाम भाग को मध्यमा अंगुली से विधृत करके नासिका के दक्षिण छिद्र से सम्पूर्ण वायु का विसर्जन किया ।१३। इसके बाद नन्द नन्दन नन्द के श्रेष्ठ प्राङ्गण में गए । श्री कृष्ण उस समय बहुत ही आनन्द से युक्त तथा पपम आनन्द वाले— नित्य आनन्द से संयुत-सनातन थे ।१४।

नित्योऽनित्यो नित्यबीजस्वरूपो नित्यविग्रहः ।
नित्यांगभूतो नित्येशो नित्यकृत्यविशारदः ॥१५

नित्यनूतनरूपंच नित्यन्नूतनयौवनः ।
नित्यनूतनवेशंच वयसा नित्यनूतनः ॥१६
नित्यनूतनसम्भाषी यत्प्रेम नित्यनूतनम् ।
नित्यनूतनसम्प्राप्ति सौभाग्य नित्यनूतनम् ॥१७
सुधारसपरं मिष्टं यद्वाक्यं नित्यनूतनम् ।
नित्यनूतनभक्तांच यत्पदं नित्यनूतनम् ॥१८
स्थायं स्थायं प्राङ्गणेऽस्मिन् मायेशो माययायुतः ।
अतीवरम्ये सुस्निग्धो बभूव गमनोन्मुखः ॥१९
रम्भास्तम्भसमूहैश्च रसालपल्लवान्वितैः ।
पट्टसूत्रनिबद्धैश्च सुन्दरैश्च सुसंस्कृते ॥२०
पद्मरागेण खचिते रचिते विश्वकर्मणा ।
कस्तूरीकुङ्कुमाक्तैश्च चन्दनैश्च सुसंस्कृते ॥२१
तत्र तस्थौ स्वयं कृष्णः सहाक्रूरः सबान्धवः ।
यशोदया समाश्लिष्टो वामपार्श्वेन मायया ॥२२
नन्देनानन्दयुक्तेनाश्लिष्टो दक्षिणपार्श्वतः ।
सम्भाषितो बान्धवैश्च पित्रा मात्रा च चुम्बितः ॥२३

श्रीकृष्ण स्वरूप नित्य एवं अनित्य है नित्य बीज रूप और नित्य विग्रह वाला है । यह नित्याङ्गभूत-नित्येश-और नित्य कृत्यों के पंडित थे ।१५। यह नित्य नवीन रूप वाले-नित्य नूतन यौवन से युक्त-नित्य ही नया वेश रखने वाले और वयसे नित्य ही नवीन थे ।१६। यह नित्य ही नवीन सम्भाषण करने वाले-नित्य नया प्रेम से समन्वित—नित्य नूतन संप्राप्ति से युक्त और नित्य नवीन सौभाग्य वाले थे ।१७। जिनके वाक्य सुधारस से परिपूर्ण-मिष्ट और नित्य नूतन होतेथे । नित्य नूतन भक्तों वाले तथा नित्य नये पद वाले थे ।१८। यह माया के स्वामी माया से युक्त इस नन्द के प्रांगण में स्थित हो-होकर जो कि आंगन अतीव रम्य था, गमन के सम्मुख होते हुए सुस्निग्ध हो गये ।१९। इसके अन्तर श्रीकृष्ण रथमें विराजमान हुए जो रथ कदलीके स्तम्भोंके समूहोंसे समन्वित था तथा उसमें आम्र के पल्लव भी संलग्न थे । पट्ट

सूत्रों से वह निबद्ध था जो अत्यन्त सुन्दर थे। इस प्रकार से वह रथ भली-भाँति संस्कृत हो रहा था। उसमें पद्मराग मणियाँ जड़ी हुई थीं और वह विश्वकर्मा के द्वारा निर्मित किया था। यह रथ कस्तूरी कुंकुम और चन्दन से चर्चित था। इसमें अपने बड़े भाई के साथ अक्रूर को लेकर श्रीकृष्ण स्वयं बैठ गए। वहाँ उस समय वाम भागमें माता यशोदा द्वारा आलिङ्गित किए और आनन्द से युक्त नन्द के द्वारा दक्षिण के भाग में आश्लिष्ट किये।२०-२२। समस्त बाँधवों के साथ अच्छी तरह से सम्भाषण किया और माता-पिता ने उनका चुम्बन किया था।२३।

८७—श्रीकृष्णस्य मथुरागमनम्

अथ कृष्णो गुरुं नत्वा निर्गम्य शिविरान्मुने।
आरुह्य स्वर्गयानं च शुभां मधुपुरीं ययौ ॥१
विवेश मथुरां रम्यां सहाक्रूरगणैःसमम्।
निर्जित्य शक्र नगरीं शोभायुक्तां मनोहराम् ॥२
रत्नश्रेष्ठेन खचितां रचितां विश्वकर्मणा।
अमूल्यरत्नकलशै राजितैश्च विराजिताम् ॥३
राजमार्गशतैरिष्टैर्वेष्टितां रुचिरैर्वरैः।
चन्द्राकारैश्चन्द्रसारैर्मणिभिः परिसंस्कृतैः ॥४
विचित्रैर्मणिसारैश्च वीथशतविनिर्मितैः।
शोभितैर्वणिजैः श्रेष्ठैः पुण्यस्तुसमन्वितैः ॥५
सरोवरसहस्रैश्च परितः परिशोभिताम्।
शुद्धस्फटिकसङ्काशैः पद्मरागविराजितैः ॥६
रत्नालङ्काराभूषाढ्यैः शोभितां पद्मिनीगणैः।
स्थिरयौवनसंयुक्तैर्निमेषरहितैः परैः ॥७
साक्षतैरूर्ध्ववदनैः कृष्णदर्शनलालसैः।
भ्रूभङ्गलीलालोलैश्च शश्वच्चञ्चललोचनैः ॥८

नारायण ने कहा-इसके अनन्तर हे मुने! कृष्ण ने गुरु को प्रणाम

करके शिविर से निर्गमन किया और स्वर्ग से आए यान पर समारूढ़ होकर शुभ मथुरापुरी को गये ।१। फिर श्रीकृष्ण ने अक्रूरादिगणों के साथ रम्य मधुपुरी में प्रवेश किया । यह मथुरापुरी अपनी शोभा और मनोहरता से इन्द्रकी पुरी को पराजित कराने वाली थी।२। श्रेष्ठ रत्न जहाँ तहाँ इसमें खचित हो रहे थे और विश्वकर्माके द्वारा इसकी रचना की गईथी । यह अति अमूल्य रत्नोंके कलशोंसे जो वहाँ रचित थे सुशोभित थी।३। सैकड़ों अभीष्ट राजमार्गोसे यह वेष्टित थी जो परम श्रेष्ठ सुन्दर—चन्द्र के आकार वाले और चन्द्रसार परिसंस्कृत मणियों से युक्त थे ।४। विचित्र उत्तम मणियों से सैंकड़ों ही वीथियां उसमें निर्मित थीं जिनमें परम शोभित-पुण्य वस्तुओं से समन्वित वणिक् संस्थित थे ।५। यह मधुपुरी सहस्रों सरोवरों से चारों ओर परिशोभित थी जिनमें शुद्ध स्फटिक के सदृश पद्मराग मणियाँ लगी हुईं थीं ।६। इस पुरी में रत्नों के आभूषणों से समलंकृत पद्मिनीगणों से अत्यन्त शोभा हो रही थी । ये पद्मिनियाँ स्थिर यौवनसे संयुत निमेष रहित (इकटक झाँकती हुई) मस्तक पर कुंकुम से समर्चित अक्षतों से युक्त ऊपर की ओर मुख किए हुये थीं जिनके चंचल नेत्र भ्रूमङ्गलीला से अत्यन्त चंचलता दिखाने वाले और कृष्ण के दर्शन की लालसा से युक्त थे ।७-८।

शश्वत्कामसमायुक्तैः पीनश्रोणिपयोधरैः ।
कोमलाङ्गैर्मध्यकूपै रतिसारविशारदैः ॥९
रत्ननिर्माणयानानां कोटिभिः परिशोभिताम् ।
भूषणैर्भूषिताभिश्च चित्रिताभिश्च चित्रकैः ॥१०
नानाप्रकारश्रीयुक्तां पुष्पोद्यानत्रिकोठिभिः ।
नानापुष्पैः पुष्पिताभिर्युक्ताभिर्मधुसूदनैः ॥११
माधुर्यमधुसंयुक्तैर्मधुलुब्धैर्मुदान्वितैः ।
माध्वीर्गैकमधुमत्तैश्च युक्तैर्मधुकरीचयैः ॥१२
नानाप्रकारदुर्गैश्च दुर्गम्यर्वैरिणां गणैः ।
रक्षितां रक्षकैःशश्वद्रक्षास्त्रविशारदैः ॥१३

त्रिकोटयट्टालिकाभिश्च संयुक्तां सुमनोहरम् ।
रचिताभिश्चसद्रत्नैर्विचित्रैर्विश्वकमणा ॥१४

ये पद्मिनी जातिकी मधुपुरीकी नारियाँ निरन्तर कामसे समायुक्त थीं जिनके श्रोणिभाग और पयोधर पीनथे । इनके अङ्ग अत्यन्त कोमल और मध्य कूप थे । ये रति शास्त्र की विदुषियां थी ।९। इस मथुरामें रत्नों द्वारा निमित करोड़ों ही यान थे जिनसे इसकी शोभा अत्यधिक हो रही थी । भूषणों से भूषित–विचित्र चित्रों से युक्त थी ।१०। तीन करोड़ पुष्पोंद्यानोंसे अनेक प्रकार की श्री से यह मधुपुरी समन्वित थी । जिनमें नाना भाँति के पुष्पों से युक्त लताओं पर मधुकर गुंजार कर रहे थे ।११। उन मधुकरियों के समूह थे जो माधुर्य पूर्ण मधु से संयुक्त मधु के लुब्ध-माध्वीक मधु से मत्त और आनन्द से युक्त थे ।१२। वह मधुपुरी अनेक दुर्गों से रक्षित और शत्रुओं के द्वारा दूर्गम्य थी । वहा रक्षा करने के शास्त्र के महान् पण्डित रक्षक निरन्तर उसी पुरी की रक्षा किया करते कि कोई भी शत्रु प्रवेश न कर सके ।१३। उसमें तीन करोड़ अट्टालिकायें बनी हुई थी जिनसे वह परम मनोहर दिखलाई देती थी ये अट्टलिकायें बहुत विचित्र सप्रत्नों के द्वारा विश्वकर्मा ने बनाई थीं ।१४।

एवम्भूताञ्च मथुरां दृष्ट्वा कमललोचनः ।
ददर्श पथि कुब्जां तां वृद्धामतिजरीतुराम् ॥१५
यान्तीं दण्डसहायेन चातिनम्रां नमद् वलीम् ।
रुक्षितां विकृताकारां विभ्रतीं चन्दनद्रवम् ॥१६
कस्तूरीकुमाक्तञ्च स्पृष्टमामेण नारद ।
सुगन्धिमकरन्देन गन्धाढ्यं सुमनोहरम् ॥१७
सा दृष्ट्वास्सिता वृद्धा श्रीकान्त शान्तमीश्वरम् ।
श्रीयुक्तं श्रीनिवासं तं श्रीबीजं श्रीनिकेतनम् ॥१८
प्रणम्य सहसा मूर्ध्ना भक्तिनम्रा पुटाञ्जलिः ।
प्रददौ चन्दनं तस्य गात्रे श्यामसुन्दरे ॥१९

गात्रेषु तद्गणानाञ्च स्वर्णपात्रकरा वरा ।
कृत्वा प्रदक्षिणां कृष्णं प्रणनाम पुनः पुनः ।२७
श्रीकृष्णदृष्टिमात्रेण श्रीयुक्ता सा बभूव ह ।
सहसा श्रीसमा रम्या रूपेण यौवनेन च ।२
वह्निशुद्धा सुवसना रत्नभूषणभूषिता ।
यथा द्वादशवर्षीया कन्या धन्या मनोहरा ।२२

कमल के समान सुन्दर नेत्रों वाले श्रीकृष्ण ने इस प्रकार की परम सुशोभित मधुपुरी को देखा था और फिर मार्गमें उस एक कुब्जा को भी देखा था जो अत्यन्त वृद्धा और अति जरा से बहुत ही आतुर थी ।१५। वह एक डण्डे का सहारा लेकर मार्ग में जा रही थी । उसकी कमर अत्यन्त झुकी हुई थी और नवी हुई वलियों वाली थी । वह कुब्जा रूक्षित तथा विकृति आकृति वाली थी और उसके हाथ में चन्दन द्रव था ।१६। हे नारद ! वह चन्दन द्रव कस्तूरी और कुंकुस से स्पृष्ट मात्र से अक्त था तथा सुगन्धि के मकरन्द से गन्ध युक्त एवं परम सुन्दर था ।१७। उस कुब्जाने परम शान्त ईश्वर श्रीकान्त को देखा और वह वृद्धा मुस्कराने लगी थी । उसने श्री युक्त-श्री के निवास स्थल—श्री के बीज स्वरूप और श्री के निकेतन उसको सहसा शिर से प्रणाम किया और भक्ति भाव से विनम्र होती हुई हाथ जोड़कर उनके परम सुन्दर श्याम गात्र में उस चन्दन द्रव का लेपन किया था ।१८-१९। उनके साथ जो गण थे उनके सबके अङ्गों में भी चन्दन का लेपन किया । उसके हाथ में स्वर्ण का श्रेष्ठ पात्र था उसने कृष्ण की प्रदक्षिणा करके बारम्बार प्रणाम किया था ।२०। श्रीकृष्ण की दृष्टि मात्र से ही वह श्री युक्त होगई और तुरन्त ही वह कुब्जा रूप और यौर यौवन से लक्ष्मीके सदृश अत्यन्त रम्य बन गई ।२१। वह्निशुद्ध सुन्दर वस्त्रों वाली तथा रत्नों के भूषणों से समलंकृत वह जैसे कोई बारह वर्ष की कन्या हो उस तरह की धन्य एवं मनोहर होगई थी ।२२।

बिम्बोष्ठी सस्मिता श्यामा तप्तकांचनसन्निभा ।
सुश्रोणी सुदतीविल्वफलतुल्यपयोधरा ।२३

श्रीवासस्तां समाश्वास्य ययौ स्थानान्तरं परम् ।
कृतार्थरूपा सा प्रीत्या ययौ पद्मा यथालयम् ।२४
सा ददर्श स्वभवनं यथापद्मालयालयम् ।
रत्नशय्याविरचितं सद्ररत्नसारनिर्मितम् ।२५
कर्मणा मनसा वाचा चिन्तयन्ती हरेः पदम् ।
हरेरागमनञ्चापि मुखचन्द्रं मनोहरम् ।२६
ततो ददर्श श्रीकृष्णो मालाकारं मनोहरम् ।
मालासमूहं बिभ्रन्तं गच्छन्तं राजमन्दिरम् ।२७
सोऽपि दृष्ट्वाच श्रीकान्तं प्रणम्य शिरसाभुवि ।
ददौ माल्यसमूहञ्च कृष्णाय परमात्मने ।२८
कृष्णस्तस्मै वरं दत्वा स्वदास्यमतिदुर्लभम् ।
माल्यं गृहीत्वा प्रययौ राजमार्गं वरं वरः ।२९

वह कुब्जा विम्व के समान ओष्ठों वाली-मन्दस्मित से युक्त-श्यामा-तप्त काञ्चन के समान वर्ण वाली होगई थीं । उसकी श्रोणी बहुत सुन्दर थी—दन्तपंक्ति रम्य थी और उसके पयोधर विल्व फल के समान परम आकर्षक हो गये थे ।२३। श्रीवास कृष्ण ने उसका समाश्वासन किया और वह वहां से अन्य सुन्दर स्थान पर चले गये । जैसे पद्म आलय में हो वैसे ही वह कृतार्थ रूप वाली होकर प्रीति से चली गई ।२४। उसने जाकर अपने भवन को लक्ष्मी के आलय के तुल्य देखा जो रत्नों की शय्या से युक्त एवं उत्तम रत्नों के द्वारा निर्मित किया हुआ था ।२५। वह फिर मन-कर्म और वाणी से हरि के चरणों का ही चिन्तन किया करती थी । हरि के वहाँ मनोहर मुख चन्द्रके आगमन का चिन्तन करती रहती थी ।२६। इसके अनन्तर आगे चलकर श्री कृष्ण ने एक मनोहर मालाकार को देखा था जोकि माला के समूहों को लिये हुए राजमन्दिर को जारहा था ।२७। उसने जब श्रीकान्त का दर्शन प्राप्त किया तो भूमि में मस्तक टेक कर उनको प्रणाम किया और परमात्मा कृष्ण को मालाऐं समर्पित की थीं ।२८। कृष्ण ने अति दुर्लभ अपना

दास्य पद प्राप्त करने का वरदान दिया और मालाएं ग्रहण कर वह परम श्रेष्ठ प्रभु राजमार्ग में आगे चल दिये।२९।

ततो ददर्श रजकं बिभ्रन्तं वस्त्रपुञ्जकम्।
अहङ्कृतं बलिष्ठञ्च सततं यौवनोद्धतम्।३०
वस्त्रं ययाचे तं कृष्णो विनयेन महामुने।
स तस्मै न ददौ वस्त्रं तमुवाच च निष्ठुरम्।३१
गोरक्षकाणां त्वयोग्यं वस्त्रमेतत् सुदुर्लभम्।
राजयोग्यञ्च हे मूढ हे गोपजनवल्लभ।३२
गृहीत्वा गोपकन्याश्च कन्यालोलुपलम्पट।
यद्विहारः कृतस्तत्र वृन्दारण्येऽप्यराजके।३३
न चात्र तादृशं कर्म राज्ञ कंसस्य वर्त्मनि।
विद्यमानोऽत्र राजेन्द्र शास्ता दुष्टस्य तत्क्षणम्।३४
रजस्कय वचः श्रुत्वा जहास मधुसूदनः।
जहास बलदेवश्च साक्रूरो गोपवर्गकः।३५
तंनिहत्य चपेटेन जग्राह वस्त्रपुञ्जकम्।
वस्त्रं संधारयामास श्रीकृष्णः सगणस्तथा।३६
रत्नयानेन गोलोकं पार्षदैर्वेष्टितेन च।
ययौ रजकराजश्च धृत्वा दिव्यकलेवरम्।३७
शश्वद्यौवनयुक्तञ्च जरामृत्युहरं बरम्।
पीतवस्त्रसमायुक्तं सस्मितं श्यामसुन्दरम्।३८
बभूव सोऽपि गोलोके पार्षदेषु च पार्षदः।
कृष्णस्यागमनं तत्र सस्मार सततं वशी।३९
अस्तं गतो दिवकरोऽप्यक्रूरः स्वगृहं ययौ।
कृष्णस्यानुमति प्राप्य कृष्णोऽपि कस्यचिद् गृहम्।४०
वैष्णवस्य कुविन्दस्य तस्मिन् न्यस्तधनस्य च।
सानन्दो नन्दसहितो बलदेवादिभिर्युतः।४१
स भक्तः पूजयामास प्रणम्य श्रीनिकेतनम्।
तस्मै ददौ स्वदास्यञ्च ब्रह्मादिदेवदुर्लभम्।४२

इसके उपरान्त एक धोबी को देखा जो वस्त्रों का एक पुंज ले जा रहा था ! वह बड़ा अहङ्कार से युक्त—अत्यन्त बल वाला और निरन्तर अपने यौवन के मद से उद्धत हो रहा था ।३०। हे महामुने ! श्री कृष्ण ने विनय पूर्वक उससे वस्त्रों की याचना की किन्तु उनको वस्त्र नहीं दिये और उनसे अत्यन्त निष्ठुर वचन कहने लगा ।३१। ये वस्त्र बहुत ही सुदुर्लभ हैं और गायों के चराने वाले ग्वालाओं के योग्य नहीं हैं। हे गोपजनों के वल्लभ ! हे मूढ़ ! ये वस्त्र राजा के योग्य हैं ।३२। आप तो कन्याओं के लोलुप और लम्पट हैं। अहर्निश गोपों की कन्याओं को अपने साथ लेकर वहां वृन्दावन में आपने विहार किया है जहां कोई भी राजा नहीं है ।३३। यहाँ पर कंस महाराज के मार्ग में वैसा कर्म नहीं हो सकता है। यहाँ पर तो राजाओं का भी स्वामी दुष्टों को उसी समय शासन शासन करने वाला विद्यमान है ।३४। रजक (धोबी) के इस वचन को श्रवण करके कृष्ण उसी समय हँस गये। साथ ही में बलराम और अक्रूर के सहित समस्त गोपों का समूह हँस पड़ा ।३५। उसको एक चपेट से मारकर उसके वस्त्रों के पुञ्ज को ले लिया और फिर श्रीकृष्णने अपने गण वालों के साथ वस्त्रों का धारण किया ।३६। वह रजक राज दिव्य कलेवर धारण कर पार्षदों से वेष्टित रत्नों से निर्मित यान के द्वारा गो लोक धाम को चला गया ।३७। वह रजक भी फिर निरन्तर यौवन से युक्त—जरा और मृत्यु को हरण करने वाला-परम श्रेष्ठ—पीत वस्त्रों से युक्त—स्मित से संयुत—श्याम के समान सुन्दर गोलोक में पार्षदों में एक प्रवर पार्षद गोलोक में जाकर होगया और वहाँ पहुँच कर कृष्ण के आगमन का वह वशी सदा वहाँ स्मरण किया करता ।३८-३९। भुवन भास्कर सूर्य देव भी अस्ताचल को गये और अक्रूर भी अपने घर चल गये और कृष्ण की अनुमति प्राप्त करली। फिर कृष्ण भी किसी एक अपने भक्त के घर चले गये ।४०। वहाँ परम वैष्णव एक कुविन्द था जो उसमें अपने धन को न्यस्त कर चुका था। कृष्ण नन्द और बलराम आदि के सहित परम आनन्द के साथ वहां गये ।४१। उस परम भक्त ने श्री निकेतन को प्रणाम करके उनकी पूजा की। श्रीकृष्ण

ने उसको भी अपना दास्य पद प्रदाह कर दिया जो ब्रह्मादि को भी देव दुर्लभ पद होता है ।४२।

पर्य्यङ्के सुषुपुः सर्वे भुक्त्वा मिष्टान्नमुत्तमम् ।
निद्राञ्च लेभे सा कुब्जा निद्रे शोऽपि ययौ मुदा ।४३
गत्वा ददर्श कुब्जां तां रत्नतल्पे च निद्रिताम् ।
दासीगणैः परिवृतां सुन्दरीं कमलामिव ।४४
बोधयामास तां कृष्णो न दासीश्चापि निद्रिताः ।
तामुवाच जगन्नाथो जगन्नाथप्रियां सतीम् ।४५
त्यज निद्रां महाभागे शृङ्गार देहि सुन्दरि ।
पुरा शूर्पणखा त्वञ्च भगिनी रावणस्य च ।४६
तपः प्रभावान्मां कान्तं भज श्रीकृष्णजन्मनि ।
रामजन्मनि मद्धौतोस्त्वया कान्ते तपःकृतम् ।४७
अधुना सुखसम्भोगं कृत्वा गच्छ ममालयम् ।
सुदुर्लभ श्चगोलोकं जरामृत्युहरं परम् ।४८

वहाँ सबने उत्तम मिष्टान्न का भोजन करके पर्यंकों पर शयन किया। कुब्जा उस समय निद्रा को प्राप्त कर चुकी थी किन्तु निंद्रा के ईश वहाँ सानन्द पहुँच गये ।४३। वहाँ पहुँच कर भी उन्होंने रत्नों की तल्प (शय्या) पर निद्रित दशा में प्राप्त कुब्जा को देखा जो कि दासी गणों से परिवृत्त कमला के तुल्य परम सुन्दरी थी ।४४। उसको वहाँ जगाया और दासियाँ भी निद्रित नहीं हुई थी। जगत् के स्वामी ने जगन्नाथ की प्रिया उससे कहा ।४५। भगवान् ने कहा—हे महाभागे ! अब निद्रा का त्याग कर दो। हे सुन्दरि ! अब अपने शृङ्गार को मुझे दो। पहिले जन्म में तुम रावण की बहिन शूर्पणखा थी ।४६। अपने तपस्या के प्रभाव से अब श्रीकृष्ण के जन्म में मुझ को अपना कान्त सेवन करो। राम जन्म में मेरे ही लिए कान्ते ! तपस्या की थी ।४७। इस समय यथेच्छ सुख-पूर्वक सम्भोग करके फिर मेरे आलय में चली जाओ जोकि गोलोक अत्यन्त दुर्लभ स्थान है और वह जरामृत्यु का हरण करने वाला है ।४८

तथाजगाम तां तन्द्रा कृष्णवक्षःस्थलस्थिताम् ।
बुबुधे न दिवारात्रं स्वर्गमर्त्यंजलं स्थलम् ।४६
सुप्रभाता च रजनी बभूवं रजनीपतिः ।
पत्युर्व्यतिक्रमेणेव लज्जयैव मलीमसः ।५०
अथाजगाम गोलोकात् रथो रत्नविनिर्मितः ।
जगाम तेन तं लोकं धृत्वा दिव्यकलेवरम् ।५१
वह्निशुद्धांशुकाधानं रत्नभूषणभूषितम् ।
प्रतप्तकाञ्चनाभासं नित्यं जन्मादिवर्जितम् ।५२
सा नभूव च तत्रैव गोपी चन्द्रमुखी मुने ।
गोप्यः कतिविधास्तस्या बभूवुः परिचारिकाः ।५३
भगवानपि तत्रैव क्षणं स्थित्वा स्वमन्दिरम् ।
जगाम यत्र नन्दश्च सानन्दो नन्दनन्दनः ।५४
अथ कंसो निशायाञ्च निद्रायां भयविह्वलः ।
ददर्श दुःखदु स्वप्नमाप्मात्मनो मृत्युसूचकम् ।५५
ददर्श सूर्य्यं भूमिस्थं चतुःखडं नभश्च्युतम् ।
दशखण्ड चन्द्रविम्बं भूमिस्थं खाच्च्युत मुने ।५६

उस कुब्जा को वहीं पर श्रीकृष्ण के वक्षःस्थल पर स्थित रहने वाली को निद्रा होगई और उस समय उसको दिन-रात्रि,स्वर्ग-मनुष्य लोक जल और स्थल किसी का भी ज्ञान नहीं रहा ।४६। रजनी सुप्रभात वाली होगई और रजनीपति भी पति के व्यतिक्रम से मानों लज्जासे ही मलीन होगया ।५०। फिर गोलोक से रत्नों से निर्मित रथ आगया । उस रथके द्वारा ही वह दिव्य कलेवर धारण करके उस गोलोक को चली गई ।५१। उस समय उसका दिव्य कलेवर वह्नि शुद्ध वस्त्र को धारण करने वाला-रत्नों से विरचित भूषणों से भूषत प्रतप्त सुवर्ण की आभा के समान आभा से युक्त-नित्य और जन्म—मरण आदि से रहित था ।५२। हे मुने । वहां पर ही चन्द्र के तुल्य मुख वाली गोपी होगई और कितने ही प्रकार की गोपियाँ वहाँ पर भी परिचारिकाएं थीं ।५३। भगवान् भी वहाँ थोड़ी देर स्थित रहकर वहीं पर चले गये जहाँ सानन्द

नन्द थे ।५४। इसके उपरान्त जब रात्रि होगई तो कंस ने निद्रा में भय से विह्वल होकर अपनी आत्मा की मृत्यु का सूचक अत्यन्त दुःख पूर्ण दुःस्वप्न देखा ।५५। उसने सूर्य को चार खण्डों वाला होकर नभोमण्डल से च्युत हुआ और भूमि पर स्थित देखा। उस कंस ने हे मुने ! इसी भाँति चन्द्रमा को भी आकाश मण्डल से पतित और दश खण्डों वाला भूमि में पड़ा हुआ देखा ।५६।

पुरुषान् विकृताकारान् रज्जुहस्तान् दिगम्बरान् ।
विधवा शूद्रपत्नीञ्च नग्नाञ्च छिन्ननासिकाम् ।५७
हसन्तीं चूर्णतिलकां श्वेतकृष्णोच्चमूर्द्धजाम् ।
खड्गखप्प रहस्ताञ्च लोलजिह्वाञ्च बिभ्रतीम् ।५८
मुण्डमालासमायुक्तां गर्दभं महिषं वृषम् ।
शूकरं भल्लुकं काकं गृध्रं कङ्कञ्च वानरम् ।५९
विरजं कुक्कुरं नक्रं शृगालं भस्मपुञ्जकम् ।
अस्थिराशिं तालफल केशं कार्पासमुल्वणम् ।६०
निर्वाणाङ्गारमुल्काञ्च शवं मर्त्यं चिताश्रितम् ।
कुलालतैलकाराणां चक्रं वक्रं कपर्दकम् ।६१
श्मशान दग्धकाष्ठञ्च शुष्ककाष्ठं कुशं तृणम् ।
गच्छन्तञ्च कबन्धञ्च नदन्तं मृतमस्तकम् ।६२
दग्धस्थानं भस्युतं तडागं जलवर्जितम् ।
दग्धमत्स्यञ्च लोहञ्च निर्वाणदग्धकाननम् ।६३

उस कंसने ऐसे विकृत आकृति वाले भयङ्कर पुरुषों को देखा जिनके हाथों में बाँधने के लिए रज्जु का पाश था और वे बिल्कुल नग्न थे। उसने विधवा एवं नग्न तथा नाक कट जाने वाली शूद्रकी पत्नीको स्वप्न में देखा ।५७। उसने उस शूद्र पत्नी को चूर्ण तिलक से युक्त-हँसते हुए-श्वेत और कृष्ण अंगके ऊपर को उठे हुए केशों वाली हाथमें खड्ग और खप्पर लिए—चंचल जिह्वा को धारण करने वाली को देखा जिसके गले में मुण्डों की माला पड़ी हुई थी—उसने स्वप्न में गधा—भैंसा—वृषभ—शूकर—काक—गिद्ध—कंक और बन्दर को भी देखा ।५८-५९। विरज-

कुत्ता—नक्र—गीदड़ और भस्म का एक बड़ा समूह देखा। हड्डियों का ढेर-ताल के फल-केश और उल्वण कपास को देखा।६०। निर्वाण अङ्गार-उल्का-शव(मुर्दा) और चिता में स्थित मनुष्य को देखा। कुम्हार और तेलियों का चक्र देखा।६१। कंस ने स्वप्न में श्मशान-जला हुआ काष्ठ—सूखा काष्ठ—कुश तृण मृतमस्तक वाला तथा नाद करने वाला जाता हुआ कबन्ध देखा।६२। जला हुआ स्थान जो भस्म से रहित था तालाब—दग्ध मत्स्य लोहा—निर्वाण दग्ध वन को देखा।६३।

गलत्कुष्ठञ्च वृषलं नग्नञ्च मुक्तमूर्द्धजम्।
अतीवरुष्टं विप्रञ्च शपन्तंगुरुमीदृशम्।
अतीवरुष्टं भिक्षुञ्च योगिनं वैष्णवं नरम्।६४
एवं दृष्ट्वा समुत्थाय कथाथामाश मातरम्।
पितरं भ्रातरं पत्नीं रुदन्ती प्रेमविह्वलाम्।६५
मञ्चकान् कारयामास स्थापयामास हस्तिनम्।
मल्लं सैन्यञ्च योद्धारं कारयामास मङ्गलम्।६६
सभांच कारयामास पुण्यं स्वस्त्ययनं शिवम्।
यत्नेन योजयामास योगेयुक्तं पुरोहितम्।६७
उवास मंचके रम्ये धृत्वा खड्ग विलणम्।
रणे नियोजमास योद्धारं युद्धकोविदम्।६८
वासयामास राजेन्द्रान् ब्राह्मणांश्च मुनीश्वरान्।
ब्राह्मणांश्च सुहृर्गान् धर्मिष्ठात् रणकोविदान्।७६

कंस ने स्वप्न में गलित कुष्ठ के रोग वाला—वृषल का जो नग्न था और अपने केशों को खोले हुए देखा तथा अत्यन्त रुष्ट विप्र—शाप देते हुए गुरु—बहुत ही क्रोधित भिक्षु—योगी और वैष्णव नर को देखा।६४। इस प्रकार के अत्यन्त अशुभ की सूचक स्वप्न देखकर उठ बैठा और उसने इसको अपनी मामा-पिता-भाई और प्रेम से विह्वल रुदन करती हुई पत्नी से कहा।६५। उस कंस ने बड़े-बड़े ऊंचे मंचों की रचना कराई और हाथी को वहाँ स्थापित कर दिया। बड़े-बड़े मल्ल,सेना और

योद्धाओं को नियुक्त कर दिया तथा मङ्गल कराया ।६६। कस ने सभी रचना कराई और पुण्य-शिव स्वस्त्ययन की व्यवस्था भी की। वहाँ पर यत्न पूर्वक योग में युक्त पुरोहित को योजित करा दिया ।६७। कंस स्वयं विलक्षण एक खंग धारण करके रम्य मंच पर स्थित होगया और रण में युद्ध विद्या में परम दक्ष योद्धा को नियोजित करा दिया ।८६। कंस ने वहाँ पर राजेन्द्रों—ब्राह्मणों—मुनीश्वरों—धर्मिष्ठ विप्रों —मित्र वर्गों और रण के पण्डितों को उन मंत्रों पर बिठा दिया था ।६९।

अथाजगाम गोविन्दो रामेण सह नारद ।
महेशस्य धमुर्मध्यं वभञ्ज तत्र लीलया ।७०
शब्देन तस्य मथुरा व्रधिरा च वभूव ह ।७१
निषादं प्राप कंसश्च मुदञ्च देवकीसुतः ।
उपस्थितः सभामध्ये गजमल्लं निहत्य च ।७२
योगी ददर्श तं देवं परमात्मानमीश्वरम् ।
यथा हृत्पद्ममध्यस्थं तादृशं बहिरेव च ।७३
राजेन्द्ररूपं राजानं शास्तारं दण्डधारिणम् ।
पिता माता दुग्धमुखं स्तनान्धं बालकं यथा ।७४
कामिन्यं कोटिकन्दर्पलीलालावण्यधारिणम् ।
कंसश्चकालपुरुषं वैरिणं तस्यवान्धवाः ।
मल्ला मृत्युपदञ्चैव प्राणतुल्यञ्च यादवाः ।७५
नमस्कृत्य मुनीन् विप्रान् पितरं मातरं गरुम् ।
जगाममञ्चकाभ्यानं हस्तेकृत्वासुदशनम् ।७६
दृष्ट्वा भक्तं भक्तबन्धु कृपया च कृपानिधिः ।
आकृष्य मञ्चकात् कंसं जघान लीलया मुने ।७७

हे नारद ! इसके अनन्तर उस धनुष मख शाला में बलराम के साथ गोविन्द आ गये। वहां पर उनने महेश के धनुष को मध्य भाग में से लीला के ही साथ भग्न कर दिया था ।७०। जिस समय महे के धनुष का भंजन किया उससे ऐसी महान् भयङ्कर ध्वनि हुई कि समस्त मथुरापुरी

वधिर जैसी हो गई ।७१। कंस को बड़ा बिषाद हुआ और देवकी नन्द आनन्द को प्राप्त हुए । फिर वह उस सभा के मध्य में हाथी और मल्ल का हनन करके उपस्थित हो गये ।७२। उस समय जो योगी जन वहाँ पर थे उन्होंने उस देव परमात्मा ईश्वर को ऐसे ही देखा जैसा कि उनके हृदय के मध्य में स्थित कमल में विराजमान था । उन्होंने वही स्वरूप वाहिर भी देखा ।७३। राजा लोगों ने एक राजेन्द्र के स्वरूप वाले शासन करने वाले दण्ड धारी स्वरूप में उनका दर्शन किया । माता–पिता ने श्याम सुन्दर को ऐसे देखा जैसे कोई स्तन पीने वाला दुध मुहाँ छोटा शिशु हो ।७४। जो कामिनी नारियाँ वहाँ पर सभा स्थल में विद्यमान थीं उन्होंने कृष्ण के स्वरूप को करोड़ों कामदेवों के लीला–लावण्य के धारण करने वाला देखा । कंस को श्रीकृष्ण का स्वरूप साक्षात् कालरूप दिखाई दिया और उसके वन्धुओं ने एक वैरी के स्वरूप में देखा मल्लों ने मृत्यु के स्थान के समान और यादवों ने अपने प्राणों के तुल्य प्रिय स्वरूप का दर्शन किया ।७५। श्री कृष्ण मुनियों —विप्रों–माता–पिता और गुरु को प्रणाम करके वह फिर हाथ में सुदर्शनचक्र लेकर उस मंच के समीप में आये थे जहाँ कंस स्थित था । भक्तों के वन्धु और कृपा के निधि श्री कृष्ण ने भक्त को देखकर कृपा कर हे मुने ! मंच से कंस को खींच कर उसका हनन लीला ही से कर दिया ।७६-७७।

राज ददर्श विश्वञ्च सर्वंकृष्णमयं परम् ।
पुरतो रत्नयानञ्च हीराहारविभूषितम् ।७८
ययो विष्णुपदं स्फीतो दिव्यरूपं विधाय च ।
तेजो विवेश परमं कृष्णपादाम्बुजे मुने ।७९
निर्वृत्य तस्य सत्कारं ब्राह्मणेभ्यो धनं ददौ ।
ददौ राज्यं राजच्छत्रमुग्रसेनाय धीमते ।८०
स बभूच नृपेन्द्रश्च चन्द्रवंशसमुद्भवः ।
विललाप कंसमाता पत्नीवर्गश्च तत्पिता ।८१

बान्धवा मातृवर्गश्च भगिनी भ्रातृकामिनी ।
दर्शनं देहि राजेन्द्र समुत्तिष्ठ नृपासने ।८२
राज्यं रक्ष धनं रक्ष बान्धवं वलमेव च ।
क्व यासि बान्धवान् हित्वा त्वमनाथान् महाबल ।८३

उस समय राजा कंस ने इस समस्त विश्व को परम कृष्ण मय ही देखा और अपने सामने एक रत्न निर्मित यान को देखा जो हीरे और हीरों से विभूषित हो रहा था ।७८। वह फिर दिव्य स्वरूप धारण कर फैल-फूटकर विष्णु लोक में चला गया । हे मुने ! वह तेज फिर कृष्ण के चरण कमल में प्रविष्ट हो गया ।७९। इसके उपरान्त उसके सत्कार से निवृत्त हो श्री कृष्ण ने ब्राह्मणों को धन का दान दिया । तथा श्रीमान् उग्रसेन को वहाँ का राजछत्र और राज्य दे दिया ।८०। वह फिर चन्द्र वंश में समुत्पन्न नृपेन्द्र हो गया । कंस की माता और उसकी पत्नियों का समुदाय तथा उसके पिता ने बड़ा विलाप किया ।८१। उस कंस के वान्धव—मातृ वर्ग—भगिनी—भाई की कामिनी विलाप करती हुई कह रहीं थी कि हे राजेन्द्र ! तुम उठकर हमको अपना दर्शन दो और नृपासन पर विराजमान हो जाओ ।८२। आप अपने राज्य—धन—वान्धवगण और अपनी सेना की रक्षा करो । आप हम सब वान्धवों का त्याग करके हे महावल ! कहाँ को चले जा रहे हैं । हम सब अब आपके विना यहाँ अनाथ हैं ।८३।

ब्रह्मादिस्तम्बपर्य्यन्तमसंख्य विश्वमेव च ।
सर्वं चराचराधारं यः सृजत्येव लीलया ।८४
मुह्य शेशेषधर्माश्च दिनेशश्च गणेश्वरः ।
मुनीन्द्रवर्गो देवेन्द्रो ध्यायते यमहर्निशम् ।८५
वेदाः स्तुवन्ति यं कृष्णं स्तौति भीता सरस्वती ।
स्तौति य प्रकृतिर्हृष्टा प्राकृतं प्रकृतेः परम् ।८६
स्वेच्छामयं निरीहञ्च निर्गुणञ्च निरञ्जनम् ।
परात्परतरं ब्रह्म परमात्मानमीश्वरम् ।८७

नित्यं ज्योतिःस्वरूपञ्च भक्तानुग्रहविग्रहम् ।
नित्यानन्दञ्चनित्यञ्च नित्यमक्षरविग्रहम् ।८८
सोऽवतीर्णो हि भगवाम् भारावतरणाय च ।
गोपालबालवेशश्च नायेशो मायया प्रभुः ।८९
सत्यं हन्ति च सर्वेशो रक्षिता तस्य कः पुमान् ।
सयं रक्षति सर्वात्मा तस्य हन्ता न कोऽपि च ।९०

ब्रह्मा से स्तम्ब पर्यन्त असंख्य विश्व है। सब चर और अचर का जो आधार है और जो इस सबका सृजन अपनी सामान्य लीला से ही किया करता है । ब्रह्मा—ईश शेष और धर्म--दिनेश—गणेश्वर—मुनिगण--देवों का स्वामी इन्द्र ये सब जिसका अहर्निश ध्यान किया करते है ।८४-८५। समस्त वेद जिस कृष्ण का स्तवन किया करते हैं और सरस्वती देवी भी परम भीत होकर जिसकी स्तुति किया करती है। प्रकृति देवी अति हर्षित होती हुई जिसका स्तवन करती हैं जो प्रकृति से पर और प्राकृत भी है ।८६। जो अपनी ही इच्छा से परिपूर्ण है—बिना ईहा वाला—गुणों से रहित और निरंजन है। जो पर से भी पर ब्रह्म—परमात्मा और ईश्वर है ।८७। जो नित्य ही ज्योति के स्वरूप वाला और भक्तों की सुरक्षा के लिये ही शरीर को धारण करने वाला है। जो नित्य ही आनन्दमय—नित्य एवं अक्षर विग्रह वाला है ।८८। वह साक्षात् भगवान पूर्ण स्वरूप अवतीर्ण हुआ है और इस वसुन्धरा के भार के हटाने के लिये उस प्रभु ने अवतार लिया है। वह एक गोपाल के बालक का वेश धारण किये हुए है। वह स्वयं माया का अधिपति होते हुए भी माया से ही प्रभु जन्म धारण किये हुए हैं। नित्य ही आनन्द रूप सर्वेश वह जिसका हनन करते हैं उसकी रक्षा करने वाला कौन पुरुष हो सकता है ? और सर्वात्मा वह जिसकी रक्षा किया करते हैं उसके हनन करने वाला कोई नहीं हैं ।८९-९०।

इत्येवमुक्त्वा सर्वश्च विरराम महामुने ।
ब्राह्मणान् भोजयामास तेभ्यः सर्वं धनं ददौ ।९१

भगवानपि सर्वात्मा जगाम पितुरन्तिकम् ।
छित्त्वा च लोहनिगडं तयोर्मोक्षं चकार सः ।९२
ननाम दण्डवद्भूमौ मातरं पितरं तथा ।
तुष्टाव भक्त्या देवेशो भक्तिनम्रात्मकन्धर ।९३
पितरं मातरं विद्यामन्त्रदं गुरुमेव च ।
यो न पुष्णाति पुरुषो यावज्जीवं च सोऽशुचिः ।९४
सर्वेषामपि पूज्यानां पिता वन्द्यो महान् गुरुः ।
पितुःशतगुणैर्माता गर्भधारणपोषणात् ।९५
माता च पृथिवीरूपा सर्वेभ्यश्च हितैषिणी ।
नास्ति मातुः परो बन्धुः सर्वेषां जगतीतले ।९६
विद्यामन्त्रप्रदः सत्यं मातुः परतोरोगुरुः ।
न हितस्मात्परः कोऽपि वन्द्यः पूज्यश्चवेदतः ।९७
इत्येवमुक्त्वा श्रीकृष्णो बलभद्रो ननाम च ।
माता चकार तौ क्रोड़े पिता च सादरं मुने ।९८
मिष्टान्नं परमं तौ च भोजयामास सादरम् ।
नन्दञ्च भोजयामास गोपालान्परमादरम् ।९९
मङ्गलं कारयामास भोजयामास ब्राह्मणान् ।
वसुर्वसुसमूहञ्च ब्राह्मणेभ्यो ददौ मुदा ।१००

हे महामुने ! इस प्रकार से यह कहकर सब विरत हो गये । ब्राह्मणों को भोजन कराया और उनको समस्त धन दान कर दिया । ।९१। सबकी आत्मा भगवान् कृष्ण भी अपने पिता के पास चले गये । वहाँ उनके जो लोह के निगड़ (बेड़ियाँ) थे उनके छेदन करके उनने उनका मोक्ष किया ।९२। इसके अनन्तर अपने माता–पिता (देवकी–वसुदेव) के चरणों में दण्ड की भाँति भूमि पड़ कर प्रणाम किया । भक्ति भाव से नम्र कन्धरा करके देवेश ने उन दोनों का स्तवन किया । भगवान् ने कहा—जो पुरुष अपने माता—पिता को–विद्या प्रदान करने वाले तथा मन्त्र प्रदान करने वाले गुरु का पोषण नहीं करता है वह जब तक भी जीवित रहता है अशुचि होता है ।९३-९४। समस्त पूजा के

योग्य पुरुषों में पिता अधिक वन्दनीय और महान् गुरु होता है। गर्भ के धारण करने से और पोषण करने के कारण माता पिता से भी सौ गुनी अधिक वन्दनीय होती है।९५। माता पृथिवी के स्वरूप वाली होती है जो सबके हितकी इच्छा रखने वाली होती है। माता के समान कोई भी वन्धु नहीं होता है। इस जगती तल में सबमें अधिक हित चाहने वाली वही होती है ।९६। विद्या और मन्त्र के प्रदान करने वाला सचमुच माता से भी परतर गुरु होता है। उससे परतर वेदके अनुसार अन्य कोई भी पूज्य और वन्दनीय नहीं होता है।९७। इतना कहकर श्री कृष्ण और वलभद्र ने माता---पिता को पुनः प्रणाम किया। हे मुने ! माता और पिता ने बड़े ही आदर पूर्वक उन दोनों को अपनी गोद में बिठा लिया।९८। इसके अनन्तर माता—पिता ने उन दोनों को मिष्टान्न का भोजन कराया। इनके अतिरिक्त नन्द तथा गोपालों को भी परम आदर के साथ वसुदेव—देवकी ने भोजन कराया।९९। मङ्गल कृत्य कराया था और ब्राह्मणों को भोजन कराया। वसुदेव ने ब्राह्मणों को वहुत सा धन दान में दिया था और वड़ी प्रसन्नता से वह दान किया।१००।

८८—नन्दाय ज्ञानकथनम्

अथ कृष्णञ्च सानन्दं नन्दं तं पितरं बलः ।
बोधयामासशोकार्तं दिव्यैराध्यात्मिकादिभिः ।१
उच्चैरुदन्तं निश्चेष्टं पुत्रविच्छेदकातरम् ।
गत्वा तस्तै मुनिश्रेष्ठमित्युवाच जगत्पतिः ।२
निबोध नन्दं सानन्दं त्यज शोकं मुदं लभ ।
ज्ञानं गृहाण मद्दत्तं यद दत्तं ब्रह्मणे पुरा ।३
यच्चद्दत्तञ्च शेषाय गणेशायेश्वराय च ।
दिनेशाय मुनीशाय योगीशाय च पुष्करे ।४
कष्ठः कस्य पिता पुत्रः का माता कस्यचित् कुतः ।
आयान्ति यान्ति संसारं सर्वे स्वकृतकर्मणा ।५
कर्मानुसाराज्जन्तुश्च जायते स्थानभेदतः ।
कर्मणा कोऽपि जन्तुश्च योगीन्द्राणां नृपस्त्रियाम् ।६

द्विजपत्न्यांक्षत्रियायां वैश्यायांशू द्रयोनिषु ।
तिर्यग्योनिषुकश्चिच्च कश्चित्पश्वादियोनिषु ।७

ममैव मायया सर्वे सानन्दा विषयेषु च ।
देहत्यागे विषण्णशच विच्छेदे वान्धवस्य च ।८

नारायण ने कहा—इसके अनन्तर बलदेव ने और कृष्ण को आनन्द युक्त नन्द को और अपने पिता वसुदेव को जो शोक से आर्त्त हो रहे थे दिव्य आध्यात्मिकादि योगों के द्वारा बोधन कराया ।१। ऊँचे स्वर से रुदन करते हुए— चेष्टा रहित और पुत्र के वियोग से अत्यन्त कातर मुनियों में श्रेष्ठ के पास जाकर जगत्पति ने उनसे यह कहा ।२। श्री भगवान् ने कह—हे नन्द ! ज्ञान प्राप्त करो, आनन्द के साथ शोक का त्याग कर दो और हर्ष का लाभ करो । मेरे दिये हुए ज्ञान को ग्रहण करो जो कि पहले ब्रह्मा के लिये दिया था ।३। जो शेष को दिया था तथा गणेश के लिये और शिव के लिये दिया । पुष्कर में दिनेश—मुनीश और योगीश के लिये जो ज्ञान दिया वही अब मै आप को दे रहा हूँ ।४। कौन किसका पुत्र है और कौन किसका पिता है तथा कोन किसकी माता है । सब जीव इस संसार में अपने ही किये हुए कर्मसे आते हैं और यहाँ से चल बसा करते हैं ।५। यह जन्तु अपने कर्म के अनुसार ही स्थान भेद से उत्पन्न हुआ करता है । कोई जन्तु अपने ही कर्म से योगीन्द्रों के यहाँ तथा कोई नृप की स्त्रियों में, ब्राह्मण की पत्नीमें क्षत्रिया में, वैश्या में शूद्रयोनियों में, तिर्यक् योनियों में और कोई पशु आदि की योनियों में उत्पन्न हुआ करता है ।६-७। यह मेरी ही माया है जिससे सब ही जन्तु विषयों में आनन्द सहित लिप्त रहा करते हैं और देह का जब त्याग करते हैं तो बहुत ही विषाद युक्त हो जाया करते हैं तथा अपने बान्धव के विच्छेद होने पर भी इन्हें बड़ा दुःख हुआ करता है ।८।

प्रजाभूमिधनादीनां विच्छेदो मरणाधिकः ।
नित्यं भवमि मूढश्च न च विद्वान् शुचा युतः ।९

मद्भक्तौ भक्तियुक्तश्च मद्याजी विजितेन्द्रियः ।
मन्मन्त्रोपासकश्चैव मत्सेवानिरतःशुचिः ।१०
मद्भयाद्वाति वातोऽयं रविर्भाति च नित्यशः ।
भाति चन्द्रो महेन्द्रश्च कालभेदे च वर्षति ।११
वह्निर्दहति मृत्युश्च चरत्येव हि जन्तुषु ।
विर्भित वृक्षः कालेन पुष्पाणि च फलानि च ।१२
निराधारश्च वायुश्च वाय्याधारश्च कच्छपः ।
शेषश्च कच्छपाधारः शेषाधाराश्च पर्वताः ।१३
तदाधाराश्च पातालाः सप्त एव हि पङ्क्तितः ।
निश्चलञ्च जलं तस्माज्जलस्था च वसुन्धरा ।१४

प्रजा, भूमि और धन आदि का विच्छेद मरण से भी अधिक प्रतीत हुआ करता है किन्तु यह दुःख नित्य मूढ़ जन्तु को ही होता है किन्तु विद्वान् कभी शोक एवं दुःख से युक्त नहीं हुआ करता है ।९। जो मेरा भक्त होता है, मेरी भक्ति से युक्त होता है, मेरा ही यजन करने वाला तथा इन्द्रियों को जीतने वाला होता है । मेरे मन्त्र की उपासना करने वाला और मेरी ही सेवा में सर्वदा निरत रहने वाला होता है वह शुचि हुआ करता है । उसे कभी शोकादि नहीं होता है ।१०। मेरे ही भय से यह वायु वहन किया करता है और यह रवि भी मेरे ही भय से नित्य प्रकाश दिया करता है। चन्द्र का प्रकाश मेरे भय से होता है और महेन्द्र काल भेद से वर्षा किया करता है ।११। अग्नि दाह किया करता है और मृत्यु जन्तुओं में चरण करता है । वृक्ष समय पर पुष्पों और फलों को उत्पन्न किया करते हैं ।१२। वह वायु तो बिना आधार वाला है किन्तु कच्छप वायु के आधार वाला है । शेष कच्छप का आधार लिया करता है और शेष के आधर वाले समस्त पर्वत होते हैं ।१३। उसके आधार वाले सात पाताल पंक्ति से रहा करते हैं । उससे यह जल निश्चल रहता हैं और जल में ही यह वसुन्धरा स्थित रहा करती हैं ।१४।

सप्तस्वर्गं धराधारं ज्योतिश्चक्रं ग्रहाश्रयम् ।
निराधारश्च वैकुण्ठो ब्रह्माण्डेभ्यः परोवरः ।१५
तत्परश्चापि गोलोकः पञ्चाशत्कोटियोजनात् ।
ऊर्ध्वं निराश्रयश्चापि रत्नसारविनिर्मितः ।१६
सप्तद्वारः सप्तसारः परिखासप्तसंयुतः ।
लक्षप्राकारयुक्तश्च नद्या विरजया युतः ।१७
वेष्टितो रत्नशैलेन शतशृङ्गेण चारुणा ।
योजनायुतमानश्च यस्यैक शृंगमुज्ज्वलम् ।१८
शतकोटियोजनश्च शैल उच्छित एव च ।
दैर्घ्यं तस्य शतगुणं प्रस्थश्च लक्षयोजनम् ।१९
योजनायुतविस्तीर्णस्तत्रैव रासमण्डलः ।
अमूल्यरत्ननिर्माणो वर्तुलश्चन्द्रबिम्बववत्तु ।२०
पारिजातवनेनैव पुष्पितेन च वेष्टितः ।
कल्पवृक्षसहस्रेण पुष्पोद्यानशतेन च ।२१
नानाविधैः पुष्पिवृक्षैः पुष्पितेन च चारुणा ।
त्रिकोटिरत्नभवनो गोपीलक्षैश्च रक्षितः ।२२

सात स्वर्ग, धरा के आधार वाले हैं तथा ज्योति शुक्रग्रहों के आश्रय से संस्थित रहता है। ब्रह्माण्डोंसे परोवर वैकुण्ठ निराधार होता है ।१५। उस वैकुण्ठसे भी ऊपर पचास करोड़ योजन दूर नित्य गोलोक धाम है। वह बिल्कुल बिना आश्रय वाला है तथा रत्नों से जो सार-भूत रत्न हैं उनसे उसका निर्माण हुआ है ।१६। यह गोलोक सात द्वारों वाला—सात सारों से समन्वित तथा सात परिखाओंसे युक्त है। इसमें एक लक्ष प्रकार है और बिरजा नाम धारिणी नदी से युक्त है।१७। यह गोलोक धाम सुन्दर सौ शृङ्गों वाले रत्नों के शैल से वेष्टित है। इस दश सहस्र योजन का मान है और जिसका एक उज्ज्वल शिखर है ।१८। यह शैल सौ करोड़ योजन ऊंचा है। उसकी लम्बाई ऊंचाई से सौ गुनी है तथा इसका प्रस्थ एक लक्ष योजन है। १९। वहाँ पर दश सहस्र योजन विस्तार वाला रास मंडल है जो अमूल्य रत्नों के द्वारा निर्माण वाला है

और चन्द्रमाके विम्व की भांति वत्तु ल (गोल) आकार वाला है। उसके चारों ओर परिजातोंका वन है जिसमें पुष्प वरावर विकसित रहा करते हैं। वहां सहस्र कल्प वृक्ष हैं जो मनमें समुत्पन्न मनोरथों को पूर्ण करने वाले हैं और सैकड़ों ही पुष्पों के उद्यान बने हुए हैं।२०-२१। नाना प्रकार के पुष्पों के वृक्षों से युक्त पुष्पित एवं तीन करोड़ रत्नों के भवनों वाला वह रास मण्डल है। उसकी रक्षा एक लक्ष गोपियाँ किया करती हैं।२२।

श्वेतचामहस्ताभिस्तत्तुल्याभिश्च सर्वतः।
अमूल्यरत्ननिर्माण भूषिताभिश्च भूषणैः।२३
मत्प्राणाधिष्ठातृदेवी देवीनां प्रवरा वरा।
सुदाम्नः सा च शापेन वृषभानुसुताऽधुना।२४
शताब्दिको हिविच्छेदो भविष्यतिमयासह।
तेन भारावतरणं करिष्यामि भुवः पिता।२५
तदा यास्यामि गोलोकं तया सार्द्धं सुनिश्चितम्।
त्वया यशोदया चापि गोपैर्गोपीभिरेव च।२६
वृषभानेनतत्पत्न्याकलावत्या च बान्धवैः।
एवं च नन्दः सानन्दंयशोदां कथयिष्यति।२७
त्यज शोकं महाभाग व्रजैःसार्द्धं व्रजं व्रज।
अहमात्माचसाक्षीच निर्लिप्तः सर्वजीविषु।२८

वहाँ रास मण्डल में श्वेत चमर हाथों में लेने वाली और अमूल्य रत्नों के निर्माण करने वाले भूषणों से विभूषित सब प्रकार से राधा के तुल्य गोपियों से युक्त एवं परि सेवित मेरे प्राणों की अधिष्ठात्री देवी समस्त देवियों में प्रवर एवं श्रेष्ठ राधा है जो इस समय सुदामा के शाप से वृषभानु की सुता होकर व्रज में अवतीर्ण हुई हैं।२३-२४। मेरे साथ उसका एक शताब्दी तक विच्छेद होगा,इससे मैं भू का पिता होकर उसके भार का निराकरण करूंगा।२५। फिर इसके अनन्तर मैं उसी राधा के साथ में सुनिश्चित रूप से गो लोक में चला जाऊंगा। उस समय तुम—यशोदा और व्रज के सखा गोप एवं गोपियां भी मेरे साथ होंगे।

।२६। वृषभानु–उसकी पत्नी कलावती तथा उनके बान्धव भी मेरे साथ रहेंगे । इस प्रकार से आनन्द युक्त नन्द और यशोदा को कहेगा ।२७। हे महा भाग ! शाक को त्याग दो और अब व्रज वासियों के साथ व्रज में जाओ । मैं तो आत्मा और सबका साक्षी हूँ । मैं समस्त जीवियों में निर्लिप्त हूँ ।२८।

जीवी मत्प्रतिविम्बश्च इत्येवं सर्वसम्मतम् ।
प्रकृतिर्मद्विकारा च साप्यहं प्रकृतिः स्वयम् ।२९
यथा दुग्धे च धावल्यं न तयोर्भेद एव च ।
यथा जले तथा शैत्यं यथा वह्नौ च दाहिका ।३०
यथाऽऽकाशे तथा शब्दो भूमो गन्धोयथा नृप ।
यथाशोभा च चन्द्रे च यथादिनकरे प्रभा ।३१
यथा जीवस्तथात्मानं तथैव राधया सह ।
त्यज त्वं गोपिकाबुद्धिं राधायां मयि पुत्रताम् ।३२
अहं सर्वस्य प्रभवः साच प्रकृतिरीश्वरी ।
श्रूयतां नन्द सानन्दं मद्विभूतिसुखावहाम् ।३३
पुरा या कथिता तात ब्रह्मणेऽव्यक्तजन्मने ।
कृष्णोऽहंदेवतानाञ्च गोलोके द्विभुजः स्वयम् ।३४
चतुर्भुजोऽहं वैकुण्ठे शिवलोके शिवः स्वयम् ।
ब्रह्मलोकेचब्रह्माऽहं शय्यंस्तेजस्विनामहम् ।३५
पवित्राणामहं वह्निर्जलमेव द्रवेषु च ।
इन्द्रियाणां मनश्चास्मि समीरः शीघ्रगामिनाम् ।३६

यह जीव तो मेरा प्रतिविम्ब स्वरूप है-यही सिद्धान्त सर्व सम्मत भी है । प्रकृति मेरा ही विकार रूपवाली है और वह प्रकृति भी मैं ही स्वयं हूँ ।२९। जिस तरह दुग्ध में धवलता होती है और उन दोनों में कोई भी भेद नहीं होता है जिस प्रकारसे जल में शीतलता होती है और वह्नि में दाहिका शक्ति होती तथा आकाश में शब्द होता है एवं भूमि में गंध होती है । नृप ! जिस तरह चन्द्र में शोभा और दिनकर में प्रभा होती है तथा जिस प्रकार से जीव और आत्मा हैं उसी भांति मैं राधा के साथ

रहता है। आप राधा में एक सामान्य गोपिका की बुद्धिका तथा मुझमें पुत्र भावना को त्याग देवें ।३०-३२। मैं सबका प्रभव अर्थात् उत्पत्ति-कारण हूँ और वह राधा साक्षात् ईश्वरीय प्रकृति हैं। हे नन्द ! आप आनन्द के साथ मेरी सुख देने वाली विभूति का श्रवण करो ।३३। हे तात ! पहिले अव्यक्त जन्म वाले ब्रह्माके लिए जो कही गई थी। मैं देवों का कृष्ण हूँ जो गो लोक में स्वयं दो भुजाओं वाला रहता हूँ ।३४। मैं वैकुण्ठ लोक में चार भुजाओं से युक्त रहता हूँ और शिव लोक में स्वयं ही शिव के स्वरूप में विद्यमान रहा करता हूँ। ब्रह्म लोक में ब्रह्मा और तेजस्वियों में मैं दिनकर के स्वरूप में रहता हूँ ।३५। पवित्रों में मेरा वह्नि स्वरूप होता है तथा द्रवों में जल भी मेरा स्वरूप है। इन्द्रियों में मैं इन्द्रियों का राजा मन हूँ तथा शीघ्र गर्मियों में मैं वायु हूँ ।३६।

यमोऽहं दण्डकर्तॄणां कालः कलयतामपम् ।
अक्षराणामकारोऽस्मिः साम्नाञ्च साम एव च ।३७
इन्द्रश्चतुर्दशेन्द्रेषु कुबेरो धनिनामहम् ।
ईशानोऽहं दिगीशानां व्यापकानां नभस्तथा ।३८
सर्वान्तरात्मा जीवेषु ब्राह्मणश्चाश्रमेषु च ।
धनानाञ्च रत्नमहममूल्यं सर्वदुर्लभम् ।३९
तैजसानां सुवर्णोऽहं मणीनां कौस्तुभः स्वयम् ।
शालग्रामस्तथार्च्यानां पत्राणां तुलसीति च ।४०
पुष्पाणां पारिजातोऽहं तीर्थानां पुष्करः स्वयम् ।
वैष्णवानां कुमारोऽहं योगीन्द्राणां गणेश्वरः ।४१
सेनापतीनां स्कन्दोऽहं लक्ष्मणोऽहं धनुष्मताम् ।
राजेन्द्राणाञ्च रामोऽहं नक्षत्राणामहं शशी ।४२
मासानां मार्गशीर्षोऽहमृतूनामस्मि माधवः ।
वारेष्वादित्यवारोऽहं तिथिष्वेकादशीति ।४३
सहिष्णुनाञ्च पृथिवी माताहं बान्धवेषु च ।
अमृतं भक्ष्यवस्तूनां गव्येष्वाज्यमहं तथा ।४४

कल्पवृक्षश्च वृक्षाणां सुरभी कामधेनुषु ।
गंगाऽहं सरितां मध्ये कृतपापविनाशिनी ।४५

दण्ड देने वालों में मैं यमराज हूँ और कलन करने वालों में काल मेरा ही एक स्वरूप है, अक्षरों में आकर मेरा रूप हैं और सामों में साम वेद मेरा स्वरूप होता है ।३७। चौदह इन्द्रों में मैं इन्द्र हूँ तथा धनियों में मैं कुवेर हूँ । दिगीशों में ईशान मेरा ही स्वरूप है तथा व्यापक पदार्थों में मैं नभ हूँ ।३८। जीवों में सबका अन्तरात्मा हूँ तथा आश्रमों में ब्राह्मण का आश्रम मेरा ही साक्षात् स्वरूप है । धनों में मैं रत्न हूँ जो सबको दुर्लभ एवं अमूल्य होता है ।३९। तैजस पदार्थों में मैं सुवर्ण हूँ तथा मणियों में कौस्तुभमणि मेरा एक रूप होता है । जो अर्चना करने के योग्य है उनमें मेरा शालग्राम स्वरूप होता है और पत्रों में तुलसी दल मेरा ही रूप है ।४०। वैष्णवों में कुमार तथा योगीन्द्रों में मैं गणेश्वर हूँ । सेनापतियों में स्कन्द और धनुष धारियों में मैं लक्ष्मण हूँ । राजेन्द्रों में राम मेरा साक्षात् स्वरूप है तथा नक्षत्रों में मैं चन्द्र हूँ ।४१-४२। मासों में मैं मार्ग शीर्ष हूँ और ऋतुओं में माधव वसन्त मेरा ही स्वरूप है । वारों में आदित्य वार मैं हूँ तथा तिथियों में एकादशी हूँ ।४३। सहन शीलों में पृथ्वी मेरा स्वरूप है तथा बान्धवों में माता के रूप में मैं ही रहा करता हूँ । भक्षण करने के योग्य वस्तुओं में मैं अमृत हूँ और गव्यों में घृत मेरा ही स्वरूप होता है कल्प वृक्ष वृक्षों में मेरा स्वरूप है तथा कामधेनुओं में सुर भी मेरा रूप होता है नदियों में गंगा मैं हूँ जो कि समस्त पापों के विनाश करने वाली है ।४४-४५।

वाणीति पण्डितानाञ्च मन्त्राणां प्रणवस्तथा ।
विद्यासु बीजरूपोऽहं शस्यानां धान्यमेव च ।४६
अश्वत्थी फलिनामेव गुरुणां मन्त्रदः स्वयम् ।
अश्वत्थी फलिनामेव गुरुणां मन्त्रदः स्वयम् ।
कश्यपश्च प्रजेशानां गरुडःपक्षिणां तथा ।४७
अनन्तोऽहञ्च नागानां नराणाञ्च नराधिपः ।
ब्रह्मर्षीणां भृगुरहं देवर्षीणाञ्च नारदः ।४८

राजर्षीणाच जनको महर्षीणां शुकस्तथा ।
गन्धर्वाणा चित्रनथः सिद्धानां कपिलो मुनिः ।४९

पण्डितों में वाणी—मंत्रों में प्रणव—विद्याओं में बीज का स्वरूप और शस्यों में धान्य मेरा ही स्वरूप होता है ।४६। फल देने वालों में पीपल तथा गुरुओं में मन्त्र की दीक्षा देने वाला स्वयं मैं हूँ । प्रजेशों में मैं कश्यप—पक्षियों में गरुड़ तथा नागों में अनन्त मेरा ही स्वरूप है एवं नरों में नराधिप मैं ही हूँ । ब्रह्मतियों में मैं भृगु हूँ और देवर्षियों में नारद मेरा ही स्वरूप है ।४७-४८। राजर्षियों में जनक तथा महर्षियों में शुक्र गन्धर्वों में चित्ररथ और सिद्धों में कपिल मुनि मेरा ही स्वरूप होता है ।४९।

बृहस्पतिर्बुद्धिमतां कवीनां शुक्र एव च ।
ग्रहणांच शनिरहं विश्वकर्मा च शिल्पिनाम् ।५०
मृगाणांच मृगेन्द्रोऽहं वृषाणां शिववाहनम् ।
ऐरावतो गजेन्द्रणां गायत्री छन्दसामहम् ।५१
वेदाश्च सर्वशास्त्राणां वरुणो यादसामहम् ।
उर्वश्यप्सरसामेव समुद्राणां जलार्णवः ।५२
सुमेरुः पर्वतानांच रत्नवत्सु हिमालयः ।
दुर्गा च प्रकृतीनांच देवीनां कमलालय ।५३
शतरूपा च नारीणां मत्प्रियाणांच राधिका ।
साध्वीनामपि सावित्री वेदमाता च निश्चितम् ।५४
प्रह्लादश्चापि दैत्यानां बलिष्ठानाः बलिः स्वयम् ।
नारायणर्षिर्भगवान् ज्ञानिनांमध्य एव च ।५५
हनूमान् वानराणांच पाण्वानां धनंजय ।
मनसा नागकन्यनां वसूनां द्रोण एव च ।५६

बुद्धिमानों में बृहस्पति में हूँ तथा कवियों में शुक्र मेरा स्वरूप है । ग्रहोंमें शनि और शिल्प ज्ञाताओंमें विश्वकर्मा मेरा रूप समझना चाहिए ।५०। मृगों में सिंह मैं हूँ तथा वृषों में शिव का वाहन वृष मेरा स्वरूप होता है । गजेन्द्रों में ऐरावत नाम धारी मैं हूँ तथा छन्दों में

'गायत्री' मेरा रूप है ।५१। सम्पूर्ण शास्त्रों में वेद मेरे ही रूप हैं एवं यादवों में वरुण मैं हूँ । अप्सराओं में उर्वसी तथा समुद्री जलार्णव मेरा स्वरूप होता है ।५२। पर्वतों में सुमेरु पर्वत मेरा स्वरूप है तथा रत्न-वानों में हिमालय मैं हूँ । प्रकृतियों में दुर्गा तथा देवियों में लक्ष्मी मेरा स्वरूप होता है ।५३। नारियों में शतरूपा एवं मेरी प्रियाओं में राधिका मेरा ही साक्षात् स्वरूप समझना चाहिए साध्वियों में सावित्री निश्चित वेदों की जानकी मेरा स्वरूप है ।५४। दैत्यों में प्रह्लाद और वलिष्टों में स्वयं वलि एवं ज्ञानियों के विषय में भगवान् नारायण ऋषि मैं ही हूँ ।५५। वानरों हनुमान और पाण्वों में धनञ्जय—नाग—कन्याओं में मनसा तथा वसुओं में द्रोण मेरा ही स्वरूप है ।५६।

द्रोणो जलधराणां च वर्षाणां भारतं तथा ।
कामिनां कामदेवोऽहं रम्भा च कामुकीषु च ।५७
गोलोकश्चास्मि लोकानामुत्तमः सर्वतः परः ।
मातृकासु शान्तिरहं रतिश्च सुन्दरीषु च ।५८
धर्मोऽहं साक्षिणां मध्ये सन्ध्या च वासरेषु च ।
देवेष्वहं च माहेन्द्रो राक्षसेषु विभीषणः ।५९
कालाग्निरुद्रो रुद्राणां संहारो भैरवेषु च ।
शंखेषु पाँचजन्योऽहं अङ्गेष्वपि च मस्तकः ।६०
परं पुराणसूत्रेषु चाहं भागवतं वरम् ।
भारतं चेतिहासेषु पंचरात्रेषु कापिलम् ।६१
स्वायम्भुवो मनूनांच मुनीनाँ व्यासदेवकः ।
स्वधाऽहं पितृपत्नीषु स्वाहा वह्निप्रियासु च ।६२
यज्ञानां राजसूयोऽहं यज्ञपत्नीषु दक्षिणा ।
शस्त्रास्त्रज्ञेषु रामोऽहं जमदग्निसुतो महान् ।६३

जलधरों में द्रोण—वर्षो में भारत कामियों में कामदेव तथा कामुकियों में रम्भा मेरा रूप होता है ।५७। लोकों में सर्वोत्तम और सब से पर गो-लोक धाम है सो वह भी एक मेरा ही स्वरूप है । मातृकाओं में मैं शांति हूँ तथा पर सुन्दरियोंमें रति मैं ही हुँ ।५८। साक्षियों के मध्य में मैं धर्म

हूँ और वासरों में सन्ध्या मेरा स्वरूप होता है देवों में माहेन्द्र तथा राक्षसों में विभीषण मेरा ही स्वरूप हैं ।५९। रुद्रों में कालाग्नि रुद्र तथा भैरवों में संहारत्रशङ्खों में पांचजन्य तथा अङ्गों में मस्तक मेरा स्वरूप है ।६०। पुराण सूत्रों में परमोत्तम एवं श्रेष्ठतम भगवान साक्षात् मेरा ही रूप होता है। इतिहास ग्रन्थों में भारत एवं पंचरात्रों में कपिल पंच रात्र मैं हूँ ।६१। मनुओं में स्वायभुव मनु और मुनियों में व्यास देवत्रपितृ पत्नियों में स्वधा एवं अग्नि की प्रियाओं में स्वाहा मेरा रूप समझना चाहिए ।६२। यज्ञों में राज सूयं यज्ञ तथा यज्ञपत्नियों में दक्षिणा शस्त्रास्त्र के ज्ञाताओं में महान् जमदग्नि का पुत्र राम मेरा ही स्वरूप है ।६३।

अहं च सर्वभूतेषु मयि सर्वे च सन्ततम् ।
यथा वृक्षे फलान्येव फलेषुचांकुरस्तरोः ।६४
सर्वकारणरूपोऽहं न च मत्कारणं परम् ।
सर्वेशोऽहं न मेऽपीशो ह्यहं कारणकारणम् ।६५
सर्वेषां सर्वबीजानां प्रवदन्ति मनीषिणः ।
मन्मायामोहितजना मां न जानन्ति पापिनः ।६६
पापग्रस्तेन दुर्बुद्ध्या विधिना वंचितेन च ।
स्वात्माहं सवजन्तूनां स्त्रात्माहं नाहतः स्वयम् ।६७
यत्राहं शक्तयस्तत्र क्षुत्पिपसादयस्तथा ।
गते मयि तथा यान्ति नरदेहे यथानुगाः ।६८
हे व्रजेश नन्द तात ज्ञानं ज्ञात्वा व्रजं व्रज ।
कथयस्व च तां राधां यशोदां ज्ञानमेव च ।६९
ज्ञात्वा ज्ञानं व्रजेशश्च जगाम स्वानुगैः सह ।
गत्वा च कथयामास ते द्वे च योषितांवरे ।७०
ते च सर्वे जहुः शोकं महाज्ञानेन नारद ।
कृष्णो यद्यपि निर्लिप्तो मायेशो मायया रतः ।७१
यशोदया प्रेरितश्च पुनरागत्य माधवम् ।
तुष्टाव परमानन्दं नन्दश्च नन्दनदनम् ।७२

सामवेदोक्तस्तोत्रेण कृतेन ब्रह्मणा पुरा ।
पुत्रस्य पुरतः स्थित्वा रुरोद च पुनः पुनः ।७३

कि भुक्तं किमपूर्वं वा दत्तं मात्रा च राधया ।
कीदृक् वाक्यं सुमधुरं सम्भाषा कीदृशीति च ।१३
गोपानां गोपिकानाञ्च शिशूनां मातुरेव च ।
राधायाश्चापि कीदृग्वा मयि प्रीतोद्धवादिकम् ।१४

हे उद्धव ! भाण्डीर वन में तुमने क्या वट वृक्ष देखा था जो अत्यन्त सुस्निग्ध और बालकों से युक्त रहता है ? क्या तुमने वृन्दावन में गौओं को गोष्ठ—गोकुल और गोकुल व्रज को देखा था ? ।९। यदि वह मेरी प्राणेश्वरी राधा जीवित रह रही है तो उसको तुमने जब देखा तो उसने मेरे विषय में क्या कहा था ? हे भाई ! उस समस्त वृत्तांत को बतलाओ । मेरा मन आन्दोलित हो रहा है ।१०। समस्त गोपाङ्गनाओं ने क्या कहा था ? गोप बालकों ने क्या कहा था ? गोपों और वृद्ध वर्ग ने जो कि मेरे पिता के वयस्क हैं क्या कहा था ? ।११। बल्देव की माता सती रोहिणी क्या बोली थी ? हे तात ! अन्य बन्धु बल्लभ-वल्लवों ने क्या-क्या कहा था ? ।१२। आपने वहाँ क्या खाया था—क्या कुछ अपूर्व माता के द्वारा या राधा के द्वारा दिया हुआ खाया था ? वहाँ की वाक्यावली कैसे थी और व्रज का सम्भाषण किस प्रकार का सुमधुर था ? ।१३। वहाँ गोपों का—गोपिकाओं का—शिशुओं का और माता का तथा राधा की भी मुझमें कैसा प्रेम आदि तुमने उद्धव ! देखा था ? ।१४।

माञ्चस्मरति माता मे माञ्चस्मरति रोहिणी ।
माञ्चस्मरति सा राधा मत्प्रेमविरहाकुला ।१५

माञ्च स्मरन्ति गोप्यश्च गोपाश्च गोपबालका: ।
भांडोरे वटमूले च बाला: क्रीडन्ति मां बिना ।१६
दत्तमन्नं ब्राह्मणीभिर्यत्र भुक्तं सुधोपमम् ।
प्रमदाबालकै: सार्द्धं यत्तद्दृष्टं परीप्सितम् ।१७
इन्द्रयागस्थलं दृष्टं दृष्टं गोवर्धनं वरम् ।
ब्रह्मणा च हृता गावो यत्र तद् दृष्टमुत्तमम् ।१८
श्रीकृष्णस्य वच: श्रुत्वा शोकाक्तं मधुरान्वितम् ।
उद्धव: समुवाचेदं भगवन्तं सनातनम् ।१९

क्या मेरी माता यशोदा मेरा स्मरण किया करती हैं ? क्या रोहिणी मुझे याद करती रहती है ? क्या वह राधा मेरे प्रेम के विरह से बेचैन रहती है ? ।१५। क्या गोपियाँ मेरा स्मरण करती हैं ? क्या गोप और गोपों के बालक मुझे याद किया करते हैं ? क्या वहाँ भाण्डीर वन में वट वृक्ष के मूल के तले में बालक मेरे बिना क्रीड़ा करते हैं ? ।१६। जिस स्थान पर ब्राह्मणियों के द्वारा सुधा के तुल्य अन्न हमने खाया था, जहाँ कि प्रमदा और बालक भी साथ में थे, क्या वह स्थल जो परीप्सित है, तुमने देखा था ? ।१७। क्या तुमने इन्द्र के योग का स्थल और श्रेष्ठ गोवर्धन पर्वत को अवलोकित किया था ? क्या वह उत्तम स्थान तुमने देखा था जहाँ पर ब्रह्मा ने हमारी गौओं का हरण किया था ? ।१८। श्रीकृष्ण के इस शोक से कहे हुए माधुर्य से परिपूर्ण वचन को सुनकर उद्धव ने सनातन भगवान् से कहा था ।१९।

यद्यदुक्तं त्वया नाथ सर्वंदृष्टं यथेप्सितम् ।
सफलं जीवनं जन्म कृतमत्रैव भारते ।२०
दृष्टं भारतसारञ्च पुण्यं वृन्दावनं वनम ।
तत्सारं ब्रजभूमौ च सुरम्यां रासमण्डलम ।२१
तत्सारभूता गोलोकवासिन्यो गोपिका वरा: ।
दृष्टा तत्सारभूता च राधरासेश्वरी परा ।२२
कदलीवनमध्ये च निर्जने सुहृदस्थले ।
पङ्कस्वे पङ्कजदले सजले चन्दनाचिते ।२३

शयनेऽतिविषण्णा सा रत्नभूषणवर्जिता ।
अतीवमलिना क्षीणा छादिता शुक्लवाससा ।२४
सेविता सखीभिस्तत्र सततं श्वेतचामरैः ।
कृशोदरी निराहारा क्षणं श्वसिति च क्षणम् ।२५
क्षणं जीवति किं सा वा विरहज्वरपीडिता ।
किं वा जलं स्थलं किंवा नक्तं किं वा दिनं हरे ।२६
परं पशुं न जानाति किं परं किमु बान्धवम् ।
बाह्यज्ञानविरहिता ध्यायमाना पदं तव ।२७
त्रैलोक्ये यशसा भाति सन्मृत्युर्यशसम्भवः ।
स्त्रीहत्यां नैव वाञ्छन्ति ज्ञानहीनाश्च दस्वः ।२८

उद्धव ने कहा—हे नाथ ! आपने जो-जो भी कहा है वह मैंने सभी देखा है और इच्छा भरकर सब का अवलोकन किया है । मैंने तो इस भारत देश में ही अपना जीवन सफल कर लिया है ।२०। मैंने भारत देश के सार स्वरूप उस परम पुण्य स्थल वृन्दावन के निकुञ्ज वन को अवलोकन किया है । ब्रजभूमि में उसका भी सार रूप अत्यन्त सुरम्य रास-मण्डल है जिसको मैंने देखा है ।२१। उसमें सारभूत गौलोक में निवास करने वाली श्रेष्ठ गोपिकाएँ हैं । उनमें भी परम सार स्वरूप रासेश्वरी श्री राधा हैं जिनका मैंने दर्शन प्राप्त किया है ।२२। कदली बन के मध्य में अति निर्जन सुहृद स्थल में पङ्कस्थ चन्दन से अर्चित सजल पङ्कज दल में जो शय्या थी उस पर वह अत्यन्त ही विषाद से युक्त रत्नों के भूषणों से रहित थी । उनका स्वरूप अत्यन्त मलिन था, वह अत्यधिक क्षीण थी और शुक्ल वस्त्र से छादित थी ।२३-२४। वहाँ पर वह राधा सखियों के द्वारा निरन्तर श्वेत चमरों से सेवित हो रही थी । वह कृश उदर वाली, निराहार और क्षण-क्षण में श्वास ले रही थीं ।२५। क्या वह क्षणभर को ही जीवित रहती है अथवा विरह के ज्वर से अत्यन्त उत्पीड़ित थीं ! हे हरे ! क्या जल है अथवा क्या स्थल है, कब दिन होता है और किस समय रात होती है ? वह पशु को भी नहीं जानती है फिर पर बान्धव को तो क्या जान सकती है ? वह राधा ऐसी दशा में है

कि उसको ब्राह्य ज्ञान कुछ भी नहीं हैं। वह तो केवल आपके ही चरण का ध्यान करती रहती है।२६-२७। वह इस त्रिलोकी में यश से प्रकाश-मान हैं। उसकी मृत्यु भी यश से ही हो सकती है। ज्ञान से हीन दस्युगण भी कभी स्त्री की हत्या करना कहीं चाहा करते हैं।२८।

गच्छ शीघ्र जगन्नाथ कदलीवनमीप्सितम्।
बहिर्भूता न जगतां सा राधा त्वत्परायणा।२९
अतीवभक्ता न त्याज्या प्रभुणा रक्षिता सदा।
न हि राधापरा भक्ता न भूता न भविष्यति।३०
मन्मथ शङ्कराद्भीतो भबांश्च तत्पुरः सरः।
भवद्विधं पतिं प्राप्य कामदग्धा च राधिका।३१
तस्मात्सर्वंपरं कर्म तच्च केनापि धार्यते।
मधुर्दहति चन्द्रश्च सततं किरणेन च।३२
शश्वत्सुगन्धिवायुश्चाप्यनाथा सर्वपीडिता।
तप्तकाञ्चनवर्णाभा साधुना कज्जलोपमा।३३
सुवर्णवर्णकेशी च वासोवेशविवर्जिता।
स्वयं विधाता त्वद्भक्तः सुराणां प्रवरो विभुः।३४
त्वद्भक्तः शकरो देवो योगीन्द्राणां गुरोर्गुरुः।
सनत्कुमारस्त्वद्भक्तो गणेशो ज्ञानिनां वरः।३५

हे जगन्नाथ ! उस अभीप्सित कदलीवन में शीघ्र ही जाइए। वह जगतों के बहिर्भूत नहीं है। वह राधा आप में ही परायण है।२९। वह आपकी अतीव भक्ति है अतः उसका त्याग नहीं करना चाहिए। आप प्रभु हैं आपके द्वारा वह सर्वदा रक्षिता रहनी चाहिए। राधा से पर अन्य कोई भी भक्त नहीं है वह तो ऐसी है कि उस जैसी अब तक न कोई हुई है और न भविष्य में ही होगी।३०। मन्मथ शङ्कर से भीत है और आप तो उसके अग्रणी हैं। आप जैसे पति को प्राप्त करके वह राधिका विचारी काम से दग्ध हो रही है—यह बहुत आश्चर्य एवं खेद की बात है।३१। इससे सर्व पर कर्म किसी के भी द्वारा धारण नहीं किया जाता उसे मधु और चन्द्र भी निरन्तर दाह करता है। सुगन्धित वायु भी दाह

करती है। वह इस समय अनाथा है और सब प्रकार से पीड़ित है। तप्तकाञ्चन के वर्ण वाली इस समय कज्जल के समान कृष्ण वर्ण हो रही है।३२। वह राधा सुवर्ण के समान केशों वाली है और सब प्रकार के वसन तथा वेशों से रहित है। स्वयं विधाता भी जो समस्त सुरों में श्रेष्ठतम एवं विभू है आपका भक्त है।३३-३४। योगीन्द्रों के गुरुओं के भी गुरुदेव शङ्कर भी आपके भक्त हैं। सनत्कुमार आपके भक्त हैं तथा ज्ञानियों में श्रेष्ठ गणेश भी आपके भक्त हैं।३५।

मुनीन्द्राश्च कतिविधास्त्वद्भक्ता धरणीतले।
त्वद्भक्ता यद्दशी राधा न भक्तस्ताद्दशोऽपरः।३६
ध्यायते याद्दशी राधा स्वयं लक्ष्मीर्नं ताद्दशो।
हरिरायाति चेत्येव राधाग्रे स्वीकृतंमया।
शीघ्रं गच्छ महाभाग तदेव सार्थकं कुरु।३७
उद्धवस्य वचः श्रुत्वा जहासोवाच माधवः।
वेदोक्तं कथयामास सहितं सत्यसुव्रतम्।३८
स्त्रीषु धर्मविवाहेषु वृत्यर्थं प्राणसंकटे।
गवामर्थे ब्राह्मणार्थे नानृतं स्याज्जुगुप्सितम्।३९
तत्स्वीकारविहीनेन कुतस्त्वं नरकं कुतः।
गोलोकं याति मद्भक्तो नरकं न हि पश्यति।४०
त्वदङ्गीकारसाफल्यै करिष्यामि तथापि च।
यास्यामि स्वप्ने तन्मूलं गोपीनांमातुरेव च।४१
इत्याकर्ण्य ययौ गेहमुद्धवश्च महायशाः।
हरिर्जगाम स्वप्ने च गोकुलं विरहाकुलम्।४२
स्वप्ने राधा समाश्वास्य दत्वा ज्ञानं सुदुर्लभम्।
सन्तोष्य क्रीडया ताञ्च गोपिकाञ्च यथोचितम्।४३
बोधयित्वा यशोदाञ्च स्तनं पीत्वा च निद्रिताम्।
गोपान् गोपिशिशूंश्चैव बोधयित्वा ययौ पुनः।४४

इस धरणी तल में कितने ही मुनीन्द्र आपके भक्त हैं किन्तु जैसी राधा आपकी भक्त है वैसा अन्य दूसरा कोई भी भक्त नहीं है।३६।

जैसी राधा आपका ध्यान किया करती हैं स्वयं लक्ष्मी भी उस प्रकार के ध्यान के करने वाली नहीं है। मैंने तो राधा के आगे हरि आ रहे हैं—इस प्रकार से स्वीकार किया है। हे महाभाग ! अब आप शीघ्र ही वहाँ जाइये और मेरा कथन सफल करिए।३७। उद्धव के इस वचन का श्रवण करके माधव हँस पड़े और बोले—आपने वेदोक्त हित से युक्त, सत्य और सुव्रत ही कहा था।३८। श्री भगवान ने कहा—स्त्रियों के विषय में, धर्म विवाहों में, वृत्ति के लिए प्रयोजन में, प्राणों के संकट होने में, ब्राह्मण के हित में मिथ्या भी निन्दित नहीं हुआ करता है।३९। आपके स्वीकार किए हुएं के रहित होने से नरक होगा, यह नहीं है। कहाँ तो तुम और कहाँ नरक है ? मेरा भक्त गोलोक में जाया करता है ? यह नरक को कभी नहीं देखता है।४०। तथापि आपके द्वारा अङ्गीकार किए हुए की सफलता करूँगा। मैं स्वप्न में उन गोपियों के मूल में तथा माता के भी निकट जाऊँगा।४१। इतना सुनकर महान् यश वाला उद्धव गृह को चला गया था और हरि उस विरह से बेचैन गोकुल में स्वप्न में गए थे।४२। हरि ने स्वप्न में राधा को समाश्वासन दिया था और अति दुर्लभ ज्ञान भी प्रदान किया था। उसको क्रीड़ा के द्वारा पूर्णतया सन्तुष्ट किया और अन्य गोपिकाओं को यथोचित रूप से संतोष प्रदान किया था।४३। फिर अपनी यशोदा को ज्ञान देकर निद्रित अवस्था में ही उस के स्तन का पान भी किया था। गोपों के शिशुओं को भी प्रबोधन देकर पुनः चले गये थे।४४।

९५—भगवदुपनयनवर्णनम्

एतस्मिन्नन्तरे गर्गो वसुदेवाश्रमं ययौ।
दण्डी क्षत्री च जटिलो दीप्तिश्च ब्रह्म तेजसा।१
शुक्लयज्ञोपवीतो च तपस्वी संयतः सदा।
शुक्लदन्तः शुक्लतासा यदोः कुलपुरोहितः।२
तं दृष्ट्वा सहसोत्थाय देवकी प्रणनाम च।
वसुदेवश्च भक्तया च रत्नसिंहासनं ददौ।३

मधुपर्कं कामधेनुं वाह्निशुद्धांशुकं तथा ।
दत्त्वा गन्धं पुष्पमाल्यं पूजयामास भक्तितः ।४
मिष्ठान्नं परमान्नञ्च पिष्टकं मधुरं मधु ।
भोजयामास यत्नेन ताम्बूलं वासितं ददौ ।५
प्रणम्य कृष्णं मनसा सबलञ्च विलोक्य च ।
उवाच वसुदेवं च देवकीं च पतिव्रताम् ।६
वसुदेवं निवोधेदं सबलं पश्य पुत्रकम् ।
उपनीतोचितं शुद्धं वयसा साम्प्रतं वरम् ।७
शुभक्षणं कुरु गुरो यदूनां पूज्यदैवते ।
उपनीतोचितं शुद्धं प्रशस्य च सतामपि ।८

नारायण ने कहा—इसी बीच में गर्ग आचार्य वसुदेव के आश्रम में गये थे । गर्ग का स्वरूप दण्ड धारण करने वाला, क्षत्रधारी, जटिल और ब्रह्म तेज से अत्यन्त दीप्त था ।१। वह शुक्ल यज्ञोपवीत वाले, तपस्वी, सदा संयत, शुक्ल दाँतों वाले और शुक्ल वस्त्र धारण करने वाले थे जोकि यह कुल के पुरोहित थे ।२। उन गर्ग मुनि को आते हुए देखकर देवकी सहसा उठकर खड़ी हो गई थी और उनको प्रणाम किया था । वसुदेव ने बड़ी ही भक्ति-भाव से उनको बैठने के लिए रत्नों का सिंहासन दिया था ।३। इसके अनन्तर वसुदेव ने मधुपर्क, कामधेनु, वह्नि के तुल्य शुद्ध वस्त्र देकर गन्ध पुष्पों की माला के द्वारा भक्ति-भाव से उनका पूजन किया था ।४। इसके उपरान्त मिष्ठान्न, परमान्न, पिष्टक, मधुर मधु का उन्हें भोजन कराया था तथा सुवासित ताम्बूल समर्पित किया था ।५। कृष्ण को प्रणाम करके और उनको सबल देखकर गर्ग मुनि वसुदेव से तथा पतिव्रता पत्नी देवकी से बोले—।६। गर्ग मुनि ने कहा—हे वसुदेव ! आप अब यह समझ लेवें और अपने पुत्रों को सबल देखें । अब यह शुद्ध एवं अवस्था से अति श्रेष्ठ उपनयन संस्कार के योग्य हैं ।७। वसुदेव ने कहा—हे गुरो ! हे यदुओं के कुल देवता ! आप शुभ मुहूर्त्त देखें । उपनीत होने के

योग्य—शुद्ध और सत्पुरुषों के लिए प्रशस्य जो भी हो वही क्षण देखिये ।८।

सर्वेभ्यो बान्धवेभ्योऽपि देह्यामन्त्रणपत्रिकाम् ।
संभारं करु यत्नेन वसुदेव ! वसूपम ! ।९
परश्वः शुभमेवास्ति चोपनेतुमिहार्हसि ।
दिनं सतामपि मतं विशुद्धं चन्द्रतारयोः ।१०

गर्गस्य वचनं श्रुत्वा वसुदेवो वसूपमः ।
प्रस्थापयामास सर्वान् बन्धून्मङ्गलपत्रिकाम् ।११
घृतकुल्यां दुग्धकुल्यां दध्रिकुल्यां मनोहरम् ।
मधुकुल्यां गुडकुल्यां प्रचकार समन्वितः ।१२

राशिं नामोपहाराणां मणिरत्न सुवर्णकम् ।
नानालंकारवस्त्रांच मुक्तामाणिक्यहीरकम् ।१३
श्रीकृष्णो देववर्गांश्च मुनीन्द्रान् सिद्धपुङ्गवान् ।
सस्मारमनसाभक्त्याभक्तांश्चभक्तवत्सलः ।१४

गर्ग मुनि ने कहा—आप अब अपने समस्त बान्धवों के लिये आमन्त्रण पत्रिकाऐं भेज दो । हे वसूपम ! हे वसुदेव ! अब यत्न पूर्वक आप सब सामान एकत्रित करो ।९। परसों का दिन परम शुभ है और यहाँ पर उपनयन संस्कार कराने के लिए तुम योग्य होते हो । यह दिन सत्पुरुषों को भी मान्य है और चन्द्र ताराओं से भी अत्यन्त शुद्ध है।१०। वसूपम वसुदेव ने गर्ग के इस वचन का श्रवण कर अपने सभी बन्धुओं को मङ्गल पत्रिकाओं को भिजवा दिया था ।११। घृत कुल्या, दुग्ध कुल्या दधि कुल्या, मनोहर मधु कुल्या, और समन्वित होकर गुड कुल्या प्रकर्ष रूप से की थी ।१२। नामोपहारों की राशि, मणि रत्न, सुवर्ण, अनेक आभूषण, विविध वस्त्र, मुक्ता, माणिक्य और हीरे वहाँ लाये गये थे ।१३। श्री कृष्ण ने देव वर्गों को, मुनीन्द्रों को, सिद्धों में श्रेष्ठों को और भक्त गण को भक्तवत्सल ने मनसे तथा भक्ति के भाव से स्मरण किया था ।१४।

शुभेदिने च संप्राप्ते तत्र सर्वे समाययुः ।
मुनीन्द्रा बान्धवा देवा राजानो बहुशस्तथा ।१५
देवकन्या नागकन्या राजकन्याश्च सर्वशः ।
विद्याधर्य्यश्च गन्धर्वाश्चाययुर्वाद्यभाण्डकाः ।१६
ब्राह्मणा भिक्षुका भट्टा यतयो ब्रह्मचारिणः ।
सन्न्यासिनश्चावधूता योगिनश्च समाययुः ।१७
स्त्रीबान्धवाःस्वबन्धूनां वर्गा मातामहस्य च ।
बन्धूनां बान्धवाःसर्वे स्वाययुःशुभ कर्मणि ।१८
भीष्मो द्रोणश्चकर्णश्चाप्यश्वत्थामाकृपो द्विजः ।
सपुत्रो धृतराष्ट्रश्चसभार्य्यश्च समाययौ ।१९
कुन्ती सपुत्रा विधवा हर्षशोकसमाप्लुता ।
नानादेशोद्भवा योग्या राजानो राजपुत्रकाः ।२०

शुभ दिन के समाप्त होने पर वे सभी वहाँ पर आ गए थे । उन में मुनीन्द्र थे—बान्धव–देवगण—राजा लोग बहुत से थे ।१५। वहाँ उस श्रीकृष्ण के उपनयन संस्कार के महोत्सव में देवकन्या–नागकन्या–और सब ओर से राजकन्या–विद्याधरी—गन्धर्व और वाद्यभाण्डक आये थे ।१६। ब्राह्मण—भिक्षुक—भट्ट—यतिगण—ब्रह्मचारी–संन्यासी—अवधूत और योगी लोग आये थे ।१७। अपने बन्धुओं की स्त्रियों का समुदाय तथा मातामह (नाना) के बन्धुयों के समस्त बान्धव उस शुभ कर्म में समुपस्थित हुए थे ।१८। उस शुभावसर पर भीष्म–द्रोण–कर्ण–अश्वत्थामा कृपाचार्य द्विज और पुत्रों के सहित धृतराष्ट्र अपनी पत्नि–यों को साथ में लेकर वहां आये थे ।१९। विधवा कुन्ती भी वहाँ अपने पुत्रों के सहित आई थी जो हर्ष एवं शोक से युक्त हो रही थी । इसके अतिरिक्त अन्य बहुत से अनेक देशों में होने वाले योग्य राजा लोग तथा राजपुत्र भी वहाँ आये थे ।२०।

अत्रिर्वशिष्ठश्चच्यवनो भरद्वाजो महातपाः ।
याज्ञवल्क्यश्च भीमश्च गार्ग्यो गर्गो महातपाः ।२१

वत्स: सपुत्रश्च धर्मो जैगीषव्यः पराशरः ।
पुलहश्च पुलस्त्यश्चाप्यगस्त्यश्चापि सोभरिः ।२२
सनकश्च सनन्दश्च तृतीयश्च सनातनः ।
सनत्कुमारो भगवान् वोढः पञ्चशिखस्तथा ।२३
दुर्वासाश्चाङ्गिरा व्यासो व्यासपुत्रः शुकस्तथा ।
कुशिकः कौशिको राम ऋष्यशृङ्गो विभाण्डकः ।२४
शृङ्गी च वामदेवश्च गौतमश्च गुणार्णवः ।
क्रतुर्यतिश्चारुणिश्च शुक्राचार्य्यो बृहस्पतिः ।२५
अष्टावक्रो वामनश्च पारिभद्रश्च वाल्मिकिः ।
पैलो वैशम्पायनश्च प्रचेताः पुरुजित् तथा ।२६
भृगुर्मरीचिर्मधुजित् कश्यपश्च प्रजापतिः ।
अदितिर्देवमाता च दितिर्दैत्यप्रसूस्तथा ।२७
सुमन्तुश्च सुभानुश्च एकः कात्यायनस्तथा ।
मार्कण्डेयो लोमशश्च कपिलश्च पराशरः ।२८
पाणिनिः पारियात्रश्च पारिभद्रश्च पुंगवः ।
संवर्त्तश्चोतथ्यश्च नरोऽहञ्चापि नारद ! ।२९

उस महोत्सव में अत्रि—वशिष्ठ—च्यवन—महान् तपस्वी भरद्वाज याज्ञवल्क्य—भीम—गार्ग्य और महातय गर्ग आये थे ।२१। सपुत्र वत्स—धर्म जैगीषव्य—पराशर—पुलह पुलस्त्य—अगस्त्य—और सोभरि ऋषि वहाँ उपस्थित हुए थे ।२२। सनक—सनन्द और तीसरे सनातन-सनत्कुमार भगवान् वोढु और पञ्चशिख उस शुभ कर्म के उत्सव में आये थे ।२३। दुर्वासा—अङ्गिरा—व्यास—व्यास के पुत्र शुकदेव—कुशिक—कौशिक राम-ऋष्य शृङ्गी-विभाण्डक-शृङ्गी-वामदेव-गुणों के सागर गौतम—क्रतु—यति—अरणि-शुक्राचार्य—बृहस्पति—अष्टावक्र—वामन—पारिभद्र-वाल्मीकि—पैल—वैशम्पायन— प्रचेता—पुरुजित—भृगु—मरीचि—मधुजित—कश्यप प्रजापति—देवों की माता अदिति तथा दैत्यों की जननी दिति—ये सभी वहाँ श्रीकृष्ण के उपनयन संस्कार के शुभ अवसर में

सम्मिलित हुए थे ।२४-२७। सुमन्त-सुमानु-एक-कात्यायन-मार्कण्डेय —लोमश—कपिल—पराशर—पाणिनि—पारियात्र—पारिभद्र—पुलह—सम्वर्त—उतथ्य—नर और हे नारद ! मैं भी (नारायण) उसमें सम्मिलित हुए थे ।२८-२९।

विश्वामित्रः शतानन्दो जाबालिस्तैतिलस्तथा ।
सान्दीपनिश्च ब्रह्मांशो, योगिनां ज्ञानिनां गुरुः ।३०
उपमन्युर्गौरमुखो मैत्रेयश्च श्रुतश्रवाः ।
कठः कचश्च करखो भरद्वाजश्च धर्मवित् ।३१
सशिष्या मुनयः सर्वे वसुदेवाश्रमं ययुः ।
वसुदेवश्च तान् दृष्ट्वा ववन्दे दण्डवद्भुवि ।३२
अथास्मिन्नन्तरे ब्रह्मा सस्मितो हंसवाहनः ।
रत्ननिर्माणयानेन पार्वत्या सह शङ्करः ।३३
नन्दी स्वयं महाकालो वीरभद्रः सुभद्रकः ।
मणिभद्रः पारिभद्रः कार्तिकेयो गुणेश्वरः ।३४
गजेन्द्रेण महेन्द्रश्च धर्मश्चन्द्रो रविस्तथा ।
कुबेरो वरुणश्चैव पवनो वह्निरेव च ।३५

विश्वामित्र—जाबालि—शतानन्द—तैत्तिल सान्दीपनि जो ब्रह्मा का ही अंश है और योगियों का तथा ज्ञानियों का गुरु है ।३०। उपमन्यु—गौर—मुख—श्रुतश्रवा—कठ—कच—करख—धर्म के विद्वान भरद्वाज भी वहाँ आये थे, ये समस्त मुनिगण अपने-२ शिष्यों को साथ लेकर वसुदेव के आश्रम में गये थे । वसुदेव ने जिस समय में इन महानुभावों का दर्शन प्राप्त किया तो उसने सबको भूतल में दण्ड की भाँति पड़कर प्रणाम किया था ।३१-३२। इसी अनन्तर में हंस पर समारूढ़ होकर ब्रह्माजी मुस्कराते हुए वहाँ आये थे । रत्नों के निर्माण वाले एक अति दिव्य यान के द्वारा पार्वती के साथ भगवान् शङ्कर वहाँ पर पधारे ।३३। नन्दी—स्वयं महाकाल वीरभद्र—सुभद्रक—मणिभद्र—स्वामी कार्तिकेय गणेश्वर वहाँ आकर सम्मिलित हुए थे ।३४। गजेन्द्र के

द्वारा महेन्द्र, धर्म, चन्द्र, रवि, कुबेर, वरुण, पवन, अग्नि देवता भी वहाँ शुभोत्सव में आये थे।३५।

यमः संयमिनीनाथो जयन्तो नलकूबरः।
सर्वे ग्रहाश्च वसवो रुद्राश्च सगणस्तथा।३६
आदित्याश्च तथा शेषो नानादेवाः समाययुः।
वसुदेवश्च भक्त्या च ववन्दे शिरसा भुवि।३७
तुष्टाव परया भक्त्या देवेन्द्रांश्च तथा सुरान्।
भक्तिनम्रात्ममूर्ध्नो च पुलकाञ्चितविग्रहः।३८
परं ब्रह्म परं धाम परमेशः परात्परः।
स्वयं विधाता मद्गेहे जगतां परिपालकः।३९
वेदानां जनकः स्रष्टा सृष्टिहेतुः सनातनः।
सुराणाञ्च मुनीन्द्राणां सिद्धेन्द्राणांगुरोगुरुः।४०
स्वप्ने यत्पादपद्मञ्च क्षणं द्रष्टुं सुदुर्लभम्।
शिवस्मरणमात्रेण सर्वानिष्टाः पलायिताः।४१
सर्वसङ्कटमुत्तीर्य्य कल्याणं लभते नरः।
सर्वाग्रे पूजनं यस्य देवानामग्रणीः परः।४२
घटेषु मङ्गलं मन्त्रैर्भक्त्या चावाहनेन च।
स्वयं गणेशो भगवान् स साक्षाद्विघ्ननायकः।४३

संयमिनी के स्वामी यमराज, जयन्त, नलकूबर, समस्त ग्रह, समग्र वसुगण सम्पूर्ण रुद्र अपने गणों के सहित वहाँ वसुदेव के आश्रम में आये थे।३६। आदित्य, शेष भगवान, तथा अनेक देवगण वहाँ सम्मिलित हुए थे, वसुदेव अत्यन्त भक्ति की भावना से भूमि में अपना मस्तक टेक कर सबकी वन्दना की थी।३७। वसुदेव ने उन समस्त देवेन्द्र, सुरों का परम भक्तिसे भक्ति के कारण नम्र अपना सिर करके रोमाञ्चित अंग वाला होते हुए स्तुति की थी।३८। वसुदेव ने कहा—पर ब्रह्म, परम धाम, परमेश और पर से भी पर जगतों के पूर्णतया परि-पालन करने वाले विधाता स्वयं मेरे घर पर आज पधारे हैं।३९। जो सम्पूर्ण वेदों को जन्म देने वाले पिता हैं, संसार का सृजन करने वाले, सृष्टि के हेतु

और सनातन हैं। जो समस्त सुरों और सम्पूर्ण मुनीन्द्रों तथा सिद्धेन्द्रों के गुरु के भी गुरु हैं।४०। स्वप्न में भी जिनके चरण कमल का दर्शन प्राप्त करना एक क्षण भर के लिये भी अत्यन्त दुर्लभ है। शिव के तो शुभ नाम एवं स्वरूप के स्मरण मात्र से ही सब अनिष्ट भाग जाया करते हैं और सम्पूर्ण सङ्कटों से पार होकर मनुष्य कल्याण की प्राप्ति किया करते हैं। जिनका पूजन सबसे प्रथम हुआ करता है और जो सब देवों के अग्रणी हैं तथा पर हैं। जिनको घटों में मंगल भक्तिसे, मन्त्रों से और आवाहन के द्वारा किया जाता है वह भगवान् गणेश स्वयं साक्षात् विघ्नों के विनायक यहाँ मेरे घर पर पधारे हैं।४१-४२।

वाद्य नानाविधं रम्यं वादयाममास कौतुकात्।
मंगलं कारयामास भोजयामस ब्राह्मणान्।४४
भैरवीं पूजयामास मथुराग्रामदेवताम्।
उपचारैः षोडशैश्च षष्ठ्यां मंगलचण्डिकाम्।४५
पुण्यं स्वस्त्ययनं शुद्धं कारयामास मंगलम्।
वेदांश्च पाठयामास वसुदेवस्य बल्लभाः।४६
स्वर्गङ्गासुजलेनैव सुवर्णकलशेन च।
स्नापयामास सबलं श्रीकृष्णं पुत्रवत्सला।४७
वस्त्रचन्दनमाल्यैश्च तयोर्वेशञ्चकार सा।
रत्नेन्द्रसारनिर्माणभूषणैश्च मनोहरैः।४८
मातृभूषणभूषाढ्यः सबलः कृष्ण एव च।
माययौ च सभां देवमुनीन्द्राणाञ्च नारद !।४९

इस प्रकार से वसुदेव ने सबका स्तवन करके और पूजनार्चन करके फिर नाना भाँति के वाद्यों को जो कि अत्यन्त रम्य थे कौतुक से बजवाया था। मंगल कृत्य कराया तथा ब्राह्मणों को भोजन कराया था।४४। मथुरापुरी की ग्राम देवता भैरवी का पूजन किया था। षष्ठी में मंगल चण्डिका का षोडश उपचारों के द्वारा यजन किया था।४५। पुण्य स्वस्त्ययन, शुद्ध मङ्गल कराया था। वेदों का पाठ करवाया था फिर वसुदेव के वल्लवों ने स्वर्गङ्गा के सुन्दर जलसे सुवर्ण के कलशोंके द्वारा

पुत्रों पर प्यार करने वालों ने श्रीकृष्ण और बलराम को स्नान कराया था ।४६-४७। पुत्र वत्सला माता देवकी ने इसके अनन्तर वस्त्र, चन्दन, माल्य आदि मे उन दोनों भाइयों की वेश रचना की थी। उसने उन कृष्ण तथा बलराम को रत्नोंके परम सार स्वरूप दिव्यातिदिव्य रत्नोंके द्वारा विशेष रूप से निर्मित आभूपणों से जोकि अत्यन्त ही मनोहर थे समलंकृत किया था ।४८। माता के द्वारा भूषणों एवं भूषा से युक्त हो कर बलराम और कृष्ण हे नारद ! देवों और मुनीन्द्रोंकी सभा में आगे थे ।४९।

दृष्ट्वा तं जगतांनाथमुत्तस्थौ प्रजवेन च ।
स्वयं विधाता शम्भुश्च शेषो धर्मश्च भास्करः ।५०
देवाश्च मुनयश्चैव कार्त्तिकेयो गणेश्वरः ।
पृथक् पृथक् क्रमेणैव तुष्टाव परमेश्वरम् ।५१
नाथानिर्वचनीयोऽसि भक्तानुग्रह-विग्रह ।
वेदानिर्वचनीयञ्च कस्त्वां स्तोतुमिहेश्वरः ।५२
देहेषुदेहिनंशश्वत् स्थितं निर्लिप्तमेव च ।
कर्मिणां कर्मणां शुद्धं साक्षिणं साक्षतं विभुम् ।
किं स्तौमि रूपशून्यञ्च गुणशून्यञ्च निर्गुणम् ।५३
त्वामनन्तं यदि स्तोतुं देवोऽनन्तो न हीश्वरः ।
न हि स्वयं विधाता च न हि ज्ञानात्मकः शिवः ।५४
सरस्वती जडीभूता किं कुर्मः स्तवनं वयम् ।५५
वेदा न शक्ता स्तोतुञ्चैवज्ञातुमीश्वरम् ।
वयं वेदविदः सन्तः किं कुर्मः स्तवनं तव ।५६
इदं स्तोत्रं महापुण्यं देवैश्च मुनिभिःकृतम् ।
यः पठेत्संयतः शुद्धः पूजा काले च भक्तितः ।५७
इहलोके सुखं भुक्त्वा लब्ध्वा ज्ञानं निरञ्जनम् ।
रत्नयानं समारुह्य गोलोकं स च गच्छति ।५८

जैसे ही आते हुए उन जगतोंके स्वामीको देखा था वैसे ही बड़े ही वेगसे सब खड़े हो गए थे । स्वयं विधाता, शम्भु, शेष भगवान्, धर्म और

भुवन भास्कर देवगण, सम्पूर्ण मुनि वर्ग, स्वामि कार्त्तिकेय, गणेश ये सभी उस समय अपने-अपने स्थानों पर खड़े हो गये थे और नाम्रा-स्थान, द्वारा, स्वागत सत्कार करके फिर क्रम से सबने पृथक्-पृथक् उन परमेश्वर का स्तवन किया था ।५०-५१। ब्रह्माने कहा—हे नाथ आप तो अनिर्वचनीय हैं अर्थात् आपके स्वरूप तथा गुणों को वचनों के द्वारा कहा ही नहीं जा सकता है। आप अपने भक्तों पर अनुग्रह करके ही विग्रह धारण करने वाले हैं। आपको वेद भी नहीं बतला सकते हैं तो ईश्वर आपका यहाँ कौन स्तवन करने में समर्थ हो सकता है। महादेव ने कहा—देहों में देहीको निरन्तर स्थित रखते हुए भी आप निर्लिप्त ही रहते हैं। आप कर्म करने वालों के कर्मों के शुद्ध, साक्षी, साक्षात् विभु हैं। ऐसे रूप से तथा गुण से शून्य निराकर निर्गुण आपकी मैं स्तुति करूँ तो क्या करूँ ! ।५२-५३। देवों ने कहा—हे भगवान् ! जब अनन्त आपका स्तवन करने में अनन्त देव ही समर्थ नहीं हैं और स्वयं विधाता भी स्तवन करने की सामर्थ्य से हीन हैं एवं ज्ञान के स्वरूप साक्षात् भगवान् शङ्कर भी शक्ति हीन हैं और वाग्देवता वाणी और बुद्धि की अधिष्ठात्री सरस्वती भी असमर्थ हैं तो हम लोग आपकी स्तुति क्या कर सकते हैं ? ।५४-५५। मुनीन्द्रों ने कहा—हे भगवन् ! यदि वेद स्वयं आपका स्तवन करने में अशक्त हैं और आप के ईश्वर स्वरूप को जानने में उनको भी सामर्थ्य नही हैं तो हम उसी वेद को जानने वाले ही हैं। ऐसे हम विचारे आपका क्या स्तवन कर सकते हैं? ।५६। यह स्तोत्र महान् पुण्य है जो देवों ने तथा मुनियों ने किया है जो इसका संयत और शुचि होकर पूजा के समय में भक्तिभाव से पाठ करता है वह इस लोक में सुख-सौभाग्य का उपभोग करके तथा निरंजन ज्ञान का लाभ लेकर रत्नों के विमान में समारूढ़ होकर अन्त समय में नित्य गोलोक धाम में चला जाता है।५७-५८।

संस्तूय देवा मनयो विरेमुश्चैव मानसे ।
ददृशुः प्राङ्गणे कृष्णं शोभितं पीतवाससा ।५९

यथा सौदामिनीयुक्तं नवीनजलदं मुने ! ।
वकपङ्क्तियुतं चैव मालती मालया तथा ।६०
कपाले मण्डलाकारकस्तूरीयुक्तचन्दनम् ।
सकलङ्कं मृगांकं च शोभितं जलदे तथा ।६१
द्विभुजं श्यामलं कान्तं राधाकान्तं मनोहरम् ।
ईषद्धास्यप्रसन्नास्यं भक्तानुग्रहविग्रहम् ।६२
चकार वसुदेवश्चाप्याज्ञयासुरविप्रयोः ।
दत्वा सुवर्णशतकं ब्राह्मणाय च सादरम् ।६३

इस प्रकार से देवगण और मुनिमण्डल ने उनका स्तवन करके फिर वे सब मानस में ही विरत हो गये थे। फिर उन सबने पीत वस्त्र से शोभित कृष्णको वसुदेव के प्राङ्गण में देखा था ।५९। हे मुने ! वह ऐसे प्रतीत हो रहे थे जैसे कोई नूतन मेघ विद्युत् से युक्त है। मालती के पुष्पों की माला ऐसी दिखलाई दे रही थी जैसे बगुलों की पंक्ति उस मेघ से संयुत हो। ।६०। उनके कपाल में कस्तूरी से युक्त चन्दन का बिन्दु मण्डल के आकार वाला लगा हुआ था ऐसा शोभित हो रहा था मानों जल्द में कलंक से युक्त मृगांक हो ।६१। श्रीकृष्णका स्वरूप दो भुजाओं वाला, श्याम वर्णसे युक्त था जो परम कान्त और राधा के मनोहर कान्त थे। मन्द मुस्कान से युक्त परम प्रसन्न मुख वाले और वह भक्तों पर अनुग्रह के लिये विग्रह धारण करन वाले थे। इसप्रकार की शोभा से संयुत कृष्ण का सबने दर्शन किया था ।६२। फिर वसुदेव ने सुरगण और विप्रों की आज्ञा से शुभ कर्म का समारम्भ किया था। ब्राह्मणों को सुवर्ण की सौ मुद्राऐं आदर के साथ समर्पित की थी ।६३।

देवेन्द्रांश्च मुनीन्द्रांश्च नमस्कृत्य पुरोहितम् ।
गणेशं च दिनेशं च वह्निं च शंकरं शिवाम् ।६४
सम्पूज्य देवषट्कं च साक्षतैर्देव संसदि ।
उपचारैः षोडशभिः संयतो भक्तिपूर्वकम् ।६५
पुत्राधिवासनं चक्रे वेदमन्त्रेण संसदि ।
सम्पूज्य नानादेवांश्च दिक्पालांश्च नवग्रहान् ।६६

दत्त्वा पंचोपचारांश्च भक्त्या षोडशमातृकाः ।
दत्त्वा च वसुधारांञ्च सप्तवारान् घृतेन च ।६७
चेदिराजं वसुं नत्वा सम्पूज्य प्रययौ पुनः ।
वृद्धिश्राद्धं सुनिर्वाप्य यत्किंचिद्दैविकं तथा ।६८
कृत्वा तु वेदोक्तं यज्ञसूत्रं ददौ मुदा ।
वलदेवाग्रजायैव कृष्णय परमात्मने ।६९
गायत्रींच ददौ ताभ्यां मुनिः सांदीपिनिस्तथा ।७०
भिक्षां ददौ च प्रथमं पार्वती परमादरात् ।७१

देवेन्द्रों,मुनीन्द्रों और पुरोहित को नमस्कार करके गणेश, दिनेश वह्नि, शंकर, शिवा और छैं देवों का भली भाँति पूजन करके देवों की संसद में अक्षतों के सहित सोलह उपचारों के द्वारा अर्चन किया था और फिर भक्ति-भाव-पूर्वक संयत हो गये थे ।६४-६५। इसके उपरान्त वसुदेव ने अनेक देवों की, दिक्पालों की और नव ग्रहों की अर्चा करके संसद् में वेद के मन्त्रों के द्वारा पुत्र का अधिवासन किया था ।६६। भक्ति से षोडश मातृकाओं को पंच उपचार देकर और सप्तवार घृत से वसुधारा देकर चेदिराज वसुको नमस्कार करके और भलीभाँति पूजन करके फिर गये थे । वृद्धिश्राद्ध अर्थात् नान्दी मुख श्राद्ध को अच्छी तरह सम्पन्न करके तथा जो कुछ दैविक कर्म था उसको पूर्ण करके वसुदेव ने यज्ञ करके प्रसन्नता से वेदोक्त यज्ञ सूत्र दिया । जो पहिले अग्रज बल-देव को दिया गया और फिर परमात्मा कृष्ण को दिया था ।६७-६९। सान्दीपिनि मुनि ने उन दोनों को गायत्री मन्त्र की दीक्षा तथा उपदेश दिया था । पार्वती देवी ने सर्व प्रथम आदर के साथ उनको भिक्षा दी थी ।७०-७१।

प्रत्येकं प्रददौ भिक्षां रत्नभूषणभूषिताम् ।
भिक्षां गृहीत्वा भगवान् सबलो भक्तिपूर्वकम् ।७२
किंचिद्ददौ च गर्गाय किंचिद् स्वगुरवे तथा ।
वैदिकं कर्म निर्वाप्य गर्गाय दक्षिणां ददौ ।७३

देवांश्च भोजयामास ब्राह्मणांश्चापि सादरम् ।
ये ये समाययुर्यज्ञे ते च दत्वा शुभाशिषम् ।७४
कृष्णाय वलदेवाय प्रहृष्टाः प्रययुर्गृहम् ।
नन्दः सभार्य्यो निर्वाप्य शुभकर्म सुतस्य वै ।७५
क्रोडे कृत्वा वलं कृष्णं चुचुम्ब वदनं तयोः ।
उच्चै रुरोद नन्दश्च यशोदा च पतिव्रता ।
श्रीकृष्णस्तं समाश्वास्य बोधयामस यत्नतः ।७६

प्रत्येक को रत्नों के भूषणों से भूषित भिक्षा दी थी। बलराम के सहित भगवान् कृष्ण ने भक्ति पूर्वक वह भिक्षा ग्रहण की थी ।७२। उस भिक्षामें से कुछ तो गर्ग मुनि को दी थी। आचार्य एवं उनके पुरोहित थे और कुछ अपने गुरु सान्दीपिनी को दी थी। इस प्रकार से इस दैविक कर्म को निर्वापित करके गर्गाचार्य को दक्षिणा दी थी ।७३। देव गण और ब्राह्मणों को आदर के सहित भोजन कराया था। इस उत्सव में जो भी यहाँ आये थे वे सब इस यज्ञ में कृष्ण और बलदेव के लिये शुभ आशीर्वाद देकर परम प्रसन्न होते हुए अपने-अपने घर चले गये थे। नन्द ने भार्या के सहित अपने पुत्र का शुभ कर्म सम्पन्न करके कृष्ण और वलराम को अपनी गोद में बिठाकर उन दोनोंके मुख का चुम्बन किया था। फिर नन्द और पतिव्रता यशोदा बहुत ऊँचे स्वर से रुदन करने लगे थे। श्रीकृष्ण ने उनको समाश्वासन देकर यत्न पूर्वक समझाया था ।७४-७६।

सानन्दं गच्छ हे मातर्यशोदे तात ! सत्वरम् ।
त्वमेव माता पोष्ट्री त्वं पिता च परमार्थतः ।७७
अवन्तिनगरं तात ! यास्यामि सबलोऽधुना ।
मुनेः सांदीपिनेः स्थानं वेदपाठार्थमीप्सितम् ।७८
तत आगत्य सुचिरं काले भवति दर्शनम् ।
कालः करोति कलनं स च भेदं करोति च ।७९
सर्वं कालकृतं मातर्भेदं समीलनं नृणाम् ।
सुखं दुःखञ्च हर्षञ्च शोकंच मंगलालयम् ।८०

मया दत्तंच तत्त्वंच योगिनामपि दुर्लभम् ।
सर्वं नन्दश्च सानन्दं त्वामेव कथयिष्यति ।८१
इत्युक्त्वा जगतां नाथो वसुदेवसभां ययौ ।
तदाज्ञया क्षणं प्राप्य ययौ सांदीपिनेर्गृहम् ।८२
वसुदेवं देवकीञ्च सम्भाष्य विनयेन च ।
नन्दः सभार्य्यः प्रययौ हृदयेन विदूयता ।८३
मुक्तामणिं सुवर्णञ्च माणिक्यहीरकं तथा ।
वह्निशुद्धांशुकं रत्नं नन्दाय देवकी ददौ ।८४

श्रीकृष्ण ने कहा—हे माता यशोदा ! हे तात ! आप दोनों आनन्द के साथ शीघ्र जाइये । आप ही मेरे पोषण करने वाली माता है और हे नन्द ! आप ही मेरे परमार्थ से पिता हैं ।७७। हे तात ! अब मैं भाई बलरामके सहित अवन्ति नगर में जाऊंगा और वहां पर सान्दीपिनि मुनिके स्थान पर अभीप्सित वेदों के अध्ययन के लिये जाना आवश्यक है ।७८। वहाँ से आकर बहुत अधिक काल में दर्शन होता है यह काल ही कलन किया करता है और यही भेद भी कर देता है ।७९।हे माता! मनुष्यों का भेद और संमीलन यह सभी काल के द्वारा ही कृत होता है। सुख, दुःख हर्ष, शोक और मङ्गलालय सभी काल कृत है यह योगियोंका भी अति दुर्लभ तत्व सब मैंने नन्द को दे दिया है । वह नन्द सब तुमको आनन्द के साथ कह देंगे ।८०-८१। इतना कह कर जगतों के नाथकृष्ण वसुदेवकी सभामें चले गये थे फिर उनकी आज्ञा से शुभ समय पाकर सान्दीपिनि गुरु के घर को चले गये थे ।८२। इसके उपरान्त अपनी भार्याके साथ नन्द विनय पूर्वक वसुदेव और देवकी से सम्भाषण करके विद्रूयमान हृदय के साथ वहाँ से प्रस्थान कर गये थे ।८३। देवकी ने प्रस्थान करने के समय में नन्द को मुक्तामणि, सुवर्ण, माणिक्य, हीरक और वह्नि के समान शुद्ध वस्त्र विदाई में दिये थे ।८४।

श्वेताश्वंच गजेन्द्रंच सुवर्णरथमुत्तमम् ।
नन्दाय कृष्णः प्रददौ वसुदेवश्च सादरम् ।८५

तयोरनुव्रजम् विप्रा देवकीप्रमुखाः स्त्रियः ।
वसुदेवस्तथाक्रूरोऽप्युद्धवश्च ययौ मुदा ।८६
कालिन्दीनिकटं गत्वा ते सर्वे रुरुदुः शुचा ।
परस्परं च सम्भाष्य ते सर्वे स्वालयं ययुः ।८७
कुन्ती सपुत्रा विधवा वसुदेवाज्ञया मुने ।
नानारत्नमणिं प्राप्या प्रयय स्वालयं मुदा ।८८
वसुदेवो देवकी च पुत्रकल्याणहेतवे ।
नानारत्नमणिं वस्त्रं सुवर्णं रजतं तथा ।८९
मुक्तामाणिक्यहारंञ्च मिष्टान्न च सुधोपमम् ।
भट्टेभ्यो ब्राह्मणेभ्यश्च प्रददौ सादरं मुदा ।९०
महोत्सवं वेदपाठं हरेर्नामैकमङ्गलम् ।
विप्राणां भोजनं चैव कारयामास यत्नतः ।९१
ज्ञातीनां वान्धवानांच पुरस्कारं यथोचितम् ।
चकार मणिमाणिक्यमुक्तावस्त्रैर्मनोहरैः ।९२

वसुदेव और कृष्णद ने नन्द के लिये श्वेत अश्व,गजेन्द्र, सुवर्ण,उत्तम रथ बहुत आदर के साथ प्रदान किये थे ।८५। जिस समय नन्द और यशोदा वहाँ से जाने लगे तो उन दोनों को विदा करने के लिये विप्र, देवकी प्रमुख जिनमें थी ऐसी अनेक स्त्रियाँ, वसुदेव, अक्रूर और उद्धव भी प्रसन्नता के साथ गये थे ।८६। यमुना के निकट पहुँचकर वे सभी शोक से रुदन करने लगे थे और परस्पर में सम्भापण करके वे सब अपने घरों को चले गये थे।८७। विधवा कुन्ती वसुदेव की आज्ञा से अनेक रत्न और मणियाँ प्राप्त करके पुत्रों सहित अपने घर गयी । वसुदेव और देवकी ने अपने पुत्र के कल्याण के लिये अनेक रत्न मणियाँ, वस्त्र,सुवर्ण, रजत, मुक्ता माणिक्य के हार और अमृत के तुल्य मिष्टान्न भट्टों के लिये तथा ब्राह्मणों के लिये आदर और हर्ष के साथ दिये थे ।८८-९०। महोत्सव वेदों का पाठ, हरि के नाम मङ्गल पाठ, विप्रों को भोजन यत्नपूर्वक कराया था ।९१। जो अपनी ज्ञाति के लोग थे तथा जो वान्धव-गण थे उन सबको वसुदेव, देवकी ने यथोचित मणि, माणिक्य, मुक्ता और मनोहर वस्त्रों के द्वारा पुरस्कार दिया था ।९२।

६६--सान्दी पिनि गुरु समीपे श्रीकृष्णस्य रामनभ

कृष्णः सान्दीपिनेर्गेहं गत्वा च सबलो मुदा ।
नमश्चकार स्वगुरुं गुरुपत्नीं पतिव्रताम् ।1
शुभाशिषं गृहीत्वा च दत्त्वा रत्नं मणिं हरिम् ।
गुरवे तस्य भार्य्यायै तमुवाच यथोचितम् ।२
त्वत्तो विद्यां लभिष्यामि वांछितां वांछितं मम ।
कृत्वा शुभक्षणं विप्र मां पाठय यथोचितम् ।३
ओमित्युक्त्वा मूनिश्रेष्ठः पूजयामास तं मुदा ।
मधुपर्कप्राशनेन गवा वस्त्रेण चन्दनैः ।४
मिष्टान्नं भोजयामास ताम्बूलञ्च सुवासितम् ।
सुप्रियं कथयामास तुष्टाव परमेश्वरम् ।५
परं ब्रह्म परं धाम हरिमीशं परात्परम् ।
स्वेच्छामकं स्वयं ज्योतिर्निर्लिप्तैको निरंकुशः ।६
भक्तैकनाथ भक्तेष्ट भक्तानुग्रह विग्रह ।
भक्तवाञ्छाकल्पतरो भक्तानां प्राणवल्लभ ।७

नारायण ने कहा—बलराम के साथ कृष्ण ने सान्दीपिनि के घर में पहुँचकर बड़े हर्ष के साथ अपने गुरु को और परम पतिव्रता गुरुपत्नी को नमस्कार किया ।१। रत्न तथा मणि गुरु को समर्पित करके उनसे हरि ने शुद्ध आशीर्वाद प्राप्त किया था । इसके अनन्तर श्रीकृष्ण ने उनकी भार्या से यथोचित कहा था । श्री कृष्ण ने कहा--हे विप्र ! मैं आप से अपनी इच्छित विद्या को प्राप्त करूँगा । आप शुभ क्षण में वाच्छित करने की कृपा करें और मुझे यथोचित पाठन करे ।२-३। मुनि ने 'ओम्' यह कह कर अर्थात् स्वीकार करके कृष्ण को प्रसन्नता से पूजित किया था । उनका मुनिश्रेष्ठ सान्दीपिनि ने मधुपर्क के प्राशन, गौ, वस्त्र और चन्दन के द्वारा सत्कार किया था तथा मिष्टान्न का भोजन कराया था एवं सुवासित ताम्बूल, समर्पित किया था । सुप्रिय वचन

कहे और परमेश्वर का स्तवन किया था ।४-५। सान्दीपिनि ने कहा—आप तो साक्षात् परब्रह्म है—आप परम धाम—परमीश और पर से भी पर हैं । आप अपनी ही इच्छा से परिपूर्ण—स्वयं ज्योति स्वरूप—एक और निरङ्कुश हैं ।६। आप अपने भक्तों के एक मात्र स्वामी हैं—भक्तों के इष्टदेव और भक्तों के ऊपर ही अनुग्रह करने के लिये शरीर धारण करने वाले हैं । हे भगवन् ! आप भक्तों की वाञ्छा को पूर्ण करने के लिये कल्प वृक्ष के समान हैं और भक्तों के प्राणों के वल्लभ हैं ।७।

मायया बालरूपोऽसि ब्रह्मेशशेषवन्दितः ।
मायया भुवि भूप लो भुवो भारक्षयाय च ।८
योगिनो यं विदन्त्येवं ब्रह्मज्योतिः सनातनम् ।
ध्यायन्ते भक्तिनिवहा ज्योतिरभ्यन्तरे मुदा ।९
द्विभुजं मुरलीहस्तं सुन्दरं श्यामरूपकम् ।
चन्दनोक्षितसर्वांगं सस्मितं भक्तवत्सलम् ।१०
पीताम्बरधरं देवं वनमालाविभूपितम् ।
लीलापांगतरंगैश्च निन्दितानंगमूर्छितम् ।११
अलक्तभवनं तद्वत्पदपद्मं सुशोभनम् ।
कौस्तुभोद्भासितांगञ्च दिव्यमूर्ति मनोहरम् ।१२
ईषद्धास्प्रसन्नञ्च सुवेशं प्रस्तुतं सुरैः ।
देवदेवं जगन्नाथं त्रैलोक्यमोहनं परम् ।१३
कोटिकन्दर्पलीलाभं कमनीयमनीश्वरम् ।
अमूल्यरत्ननिर्माणभूषणौघे न भूषितम् ।
वरं वरेण्यं वरदं वरदानामभीप्सितम् ।१४

आप ब्रह्मा—शेष—ईष के द्वारा वन्द्य होते हुए भी अपनी माया से ही इस बाल रूप में विद्यमान हैं । मायासे ही इस भूतलमें भूपाल हैं और इस वसुन्धराके बढ़े हुए भारका क्षय करने के लिये ही अवतीर्ण हुए हैं ।८। जिस आपको योगी लोग ब्रह्म ज्योति एवं सनातन जानते हैं ।

और हृदयस्थ ज्योति में आपका ध्यान करते हैं।९। आपके भक्तगण आपका ध्यान दो भुजाओं से युक्त, हाथ में मुरलिका लिये हुए सुन्दर श्याम रूप वाला किया करते हैं। उनके ध्यान में आपका स्वरूप चन्दन से उक्षित समस्त अंगों वाला, स्मित से अन्वित, भक्तों पर प्यार करने वाला, पीताम्बर धारण करने वाला और वनमाला से विभूषित है। आपका स्वरूप लीला से अपाँगों की तरंगों द्वारा अनंग के मूर्च्छित को भी पराजित करने वाला है।१०-११। आपके चरण कमल अलक्त के भवन एवं अत्यन्त शोभा से युक्त हैं। कौस्तुभ मणि से आपका अंग उद्भासित है, आपकी परम सुन्दर दिव्य मूर्त्ति है।१२। मन्द हास्य से आपका मुख अत्यन्त प्रसन्न रहता है। आप सुन्दर वेश से युक्त तथा देवों के द्वारा स्तुत हैं। आप देवों के भी देव हैं, समस्त जगतों के नाथ हैं और त्रिलोकी को मोहित करते हैं।१३। आपका स्वरूप करोड़ों काम देवों की लीला की आभा वाला है, अनीश्वर तथा परम कमनीय है। आपका स्वरूप अमूल्य रत्नों के द्वारा निर्माण वाले भूषणों के समूह से भूषित है आपका स्वरूप वर, वरेण्य, वर दान प्रदान करने वाला और वरदों का भी अभीप्सित है।१४।

चतुर्णामपि वेदानां कारणानाञ्च कारणम्।
पाठार्थमतिप्रयस्थानमागतोऽसि च मायया।१५
पाठं ते लोकशिक्षार्थं रमणं गमनं रणम्।
स्वात्मारामस्य च विभोः परिपूर्णतमस्य च।१६
अद्य मे सफलं जन्म सफलं जीवितं मम।
पातिव्रत्यञ्च सफलं सफलञ्च तपोवनम्।१७
मद्दक्षहस्तः सफलो दत्तं येनान्नमोप्सितम्।
मादाश्रमं तीर्थं परं तीर्थं पादपदांकितम्।
तत्पादरजसा पूता गृहाः प्रांगणमुत्तमम्।१८
यस्य त्वत्पादपद्मभञ्चं वावयोर्जन्मखण्डनम्।
तावद् दुःखञ्च शोकश्च तावद्भोगश्च रोगकः।१९
तावज्जन्मानि कर्माणि क्षुत्पिपासादिकानि च।
यावत्त्वपादपद्मस्य भजनं नास्ति दर्शनम्।२०

हे कालकाल भगवन् स्रष्टुः संहर्तुरीश्वर।
कृपां कुरु कृपानाथ मायामोहनिकृन्तन ।२१
इत्युक्त्वा साश्रुनेत्रा सा क्रोडे कृत्वा हरिं पुनः।
स्वस्तनं पाययामास प्रेम्णाच देवकी यथा ।२२

हे भगवन् ! आप चारों वेदों के तथा कारणों के भी कारण हैं। आप जो वेदों का अध्ययन करने के लिए मेरे प्रिय स्थान पर पधारे हैं, यह भी सबकी एक माया ही है। स्वात्माराम, परिपूर्णतम और विभु आपका यह पाठ, रमण गमन और रण सभी लोक की शिक्षा के लिये ही हैं ।१५-१६। गुरु पत्नी ने कहा हे भगवन् ! आज मेरा जन्म और जीवन दोनों सफल एवं कृतार्थ हो गये हैं। मेरा यह पतिव्रत धर्म और तपोवन भी आज ही सफल हुआ है। मेरा यह दाहिना हाथ जिसमें मैंने अभीप्सित अन्न दिया है। अब सफल हो गया है तीर्थ के तुल्य आपके चरणोंके चिह्न से अङ्कित यह आश्रम अब तीर्थ से भी कहीं अधिक पुण्य प्रद एवं पवित्र है आपके पादों की धूलि से मेरे गृह और यह प्रांगण उत्तम एवं परम पूत हो गया है ।१७ १८। आपके यह चरण कमल हम दोनों पति-पत्नी के जन्म के खण्डन करने वाले हैं। अर्थात् जन्म, मरण के भय, बन्धन से मुक्त कर देने वाले हैं। इस मानव के दुःख, शोक, भोग और रोग, जन्म, कर्म, क्षुधा, पिपासा आदि सभी तभी तक रहा करते हैं और इसे सताया करते हैं जब तक आपके चरणोंके दर्शन नहीं होते हैं और आपका भजन नहीं होता है ।१९-२०। हे भगवन् ! आपतो इस महा बलवान् कालके भी काल हैं और सृजन करने वाले तथा संहार करने वाले के भी ईश्वर हैं। हे कृपानाथ ! अब हमारे ऊपर आप कृपा करिये आप इस सांसारिक माया मोह का छेदन कर देने वाले हैं ।२१। इस प्रकार से यह गुरु पत्नी ने श्रीकृष्ण से कहकर फिर उन्हें अपनी गोद में बिठा लिया था और बहुत ही प्रेमोद्रेक के साथ देवकी की भाँति अपना स्तन पिलाया था ।२२।

मातेस्त्वं मां कथं स्तौषि बालं दुग्धमुखं सुतम्।
गच्छ गोलोकमिष्टञ्च स्वामिना सह साम्प्रतम् ।२३

त्यक्त्वा प्राकृतिकं मिथ्या नश्वरञ्च कलेवरम् ।
विधाय निर्मलं देहं जन्ममृत्युजराहरम् ।२४
इत्युक्त्वा चतुरो वेदान् पठित्वा मुनिपुंगवात् ।
मासेन परया भक्त्या दत्त्वा पुत्रं मृतं पुरा ।२५
रत्नानाञ्च त्रिलक्षञ्च मणीनां पञ्चलक्षकम् ।
हीरकाणां चतुर्लक्षं मुक्तानां पञ्चलक्षकम् ।२६
माणिक्यानां द्विलक्षञ्च वस्त्रं त्रैलोक्यदुर्लभम् ।
हारञ्च दुर्गया दत्तं हस्तरत्नांगुलीयकम् ।२७

श्रीकृष्ण ने कहा–हे माता ! आप दुध मुझ गृहे पुत्र की क्यों इस प्रकार से स्तुति कर रही हैं ? अब आप अपने स्वामी के साथ अभीष्ट गो लोक नित्य धाम में जाइये ।२३। अब आप इस मिथ्या, प्राकृतिक और नश्वर शरीर का त्याग करके जरा, मृत्यु और जन्म के अपहरण करने वाले निर्मल दिव्य देह धारण करिये । इतना कह कर श्रीकृष्ण ने एक ही मास में परम भक्ति के भाव से उस मुनियों में परम श्रेष्ठ सान्दीपिनि से चारों वेदों को पढ़ लिया था और इसके पूर्व मरे हुए उसके पुत्र को वापिस लाकर दे दिया था ।२४-२५। श्रीकृष्ण ने अध्ययन समाप्त कर गुरु की सेवा में परम पुष्कल दक्षिणा के रूप में तीन लाख रत्न, पांच लाख मणि, चार लाख हीरे, पाँच लाख मुक्ता, दो लाख माणिक्य, तीनों लोकों में दुर्लभ वस्त्र, दुर्गा देवी के द्वारा दिया हुआ हार और हाथों को रत्नों की अंगूठी और दश लाख सुवर्ण की मुद्राएं दी थी ।२६-२७।

दशकोटि सुवर्णानां गुरवे दक्षिणां ददौ ।
अमूल्यरत्ननिर्माणं नारीसर्वांगभूषणम् ।२८
गुरुप्रियायै प्रददौ वह्निशुद्धांशुकं वरम् ।
मुनिर्दत्त्वा च पुत्राय तत्सर्वं प्रियया सह ।२९
सद्रत्नरथमारुह्य ययौ गोलोकमुत्तमम् ।
नमद्भुतं हरिं दृष्ट्वा प्रययौ स्वालयं मुदा ।३०

एवं ब्रह्मण्यदेवस्य चरित्रं शृणु सादरम् ।
इदं स्तोत्रं महापुण्यं यः पठेद्भक्तिपूर्वकम् ।३१
श्रीकृष्णे निश्चलां भक्तिं लभते नात्र संशयः ।
अस्पष्टकीर्त्तिः सुयशा मूर्खो भवति पण्डितः ।३२
इह लोके सुखं प्राप्य यात्यन्ते श्रीहरेः पदम् ।
तत्र नित्यं हरेर्दास्यं लभते नात्र संशयः ।३३

अपने गुरु की पत्नी को अमूल्य रत्नों के द्वारा निर्मित नारी के समस्त अङ्गोंके सम्पूर्ण आभूषण, वह्निके तुल्य परम शुद्ध एवं श्रेष्ठ वस्त्र दक्षिणा में श्रीकृष्ण ने दिये थे। मुनि ने यह सम्पूर्ण धन राशि अपने पुत्रको सौंप दी और अपनी प्रिय पत्नी के साथ सद्रत्नों से निर्मित रथ में समारूढ़ होकर हरि के अद्भुत दर्शन प्राप्त कर बहुत ही हर्ष के साथ उस अपने धाम उत्तम गो लोक में वह चले गये थे ।२८-३०। हे नारद ! इस प्रकार से तुम ब्रह्मण्य देव के चरित्र को सुनो। यह स्तोत्र महान् पुण्य प्रद एवं पवित्र है। इसका जो भी कोई भक्ति-पूर्वक पाठ किया करता है वह श्रीकृष्ण में निश्चल भक्ति की प्राप्ति किया करता है, इसमें तनिक भी संशय नहीं है। जो अस्पष्ट कीर्त्ति वाला है वह सुन्दर यश वाला हो जाता है और मूर्ख इसके पाठ से महान् पण्डित हो जाता है। इस स्तोत्र का पाठक इस लोक में सुख प्राप्त करके अन्त समय में श्री हरि के पद की प्राप्ति करता है और वहाँ पर नित्य हरि की दासता का लाभ करता है इसमें कुछ भी संशय नहीं है ।३१-३३।

९७—द्वारिकानिर्माणवर्णनम्

अथागत्य मधुपुरीं प्रणम्य पितरं विभुः ।
सबलो वटमूले च सस्मार गरुडं हरिः ।१
सादरं लवणोदञ्च विश्वकर्माणमीप्सितम् ।
तत्याज गोपवेशञ्च नृपवेशं दधार सः ।२
एतस्मिन्नन्तरे चक्रमाजगाम हरिं स्वयम् ।
परं सुदर्शनं नाम सूर्य्यकोटिसमप्रभम् ।३

तेजसा हरिणा तुल्यं परं वैरिविमर्दनम् ।
अव्यर्थमस्त्रशस्त्राणां प्रवरं परमं परम् ।४
रत्नयानं परः कृत्वा गरुडो हरिसन्निधिम् ।
विश्वकर्मा सशिष्यश्च जलधिः कम्पितस्तथा ।५
हरिं प्रणेमुस्ते सर्वे मूर्ध्ना च भक्तिपूर्वकम् ।
सस्मितं सादरं यत्नात्तानुवाच क्रमाद्विभुः ।६

श्रीनारायण ने कहा—इसके अनन्तर विभु श्रीकृष्ण ने मधुपुरी में आकर अपने पिता वसुदेव को प्रणाम किया था और फिर बलराम के सहित वट के मूल में हरि ने गरुड़ को स्मरण किया था ।१। आदर के सहित लवण सागर और ईप्सित विश्वकर्मा का स्मरण भी किया था। उसने फिर अपना वह गोप वेश त्याग दिया था और एक राजा का वेश धारण कर लिया था ।२। इसी बीच में सुदर्शन चक्र स्वयं ही हरि के समीप आ गया था जिसकी प्रभा करोड़ों सूर्यों के समान थी और शुभ नाम सुदर्शन था ।३। वह चक्र तेज से बिल्कुल हरि के समान था और वैरियोंके मर्दन करने में परम प्रधान था । समस्त अस्त्र और शस्त्रों में वह अव्यर्थ था और सभी से परम श्रेष्ठ एवं सुन्दर था ।४। रत्नों के यान को आगे करके हरि की सन्निधि में गरुड़ उपस्थित हुआ था तथा अपने शिष्य वर्ग को साथ लेकर विश्वकर्मा वहाँ उपस्थित हुआ था एवं कम्पित होता हुआ जलधि वहाँ आकर उपस्थित हो गया था ।५। उन सबने हरि को भक्ति भाव के साथ मस्तक के द्वारा प्रणाम किया था। फिर विभु हरि स्मित के सहित तथा आदर पूर्वक यत्न से उन सब से बोले । ६ ।

हे समुद्र महाभाग स्थलञ्च शतयोजनम् ।
देहि मे नगरार्थञ्च पश्चाद्दास्यामि निश्चितम् ।७
नगरं कुरु हे कारो त्रिषु लोकेषु दुर्लभम् ।
रमणीयञ्च सर्वेषां कमनीयञ्च योषिताम् ।८

वाञ्छितं चापि भक्तानां वैकुण्ठसदृशं परम् ।६
सर्वेषामपि स्वर्गाणां पारम्परमभीप्सितम् ।
दिवानिशं स्वर्गश्रेष्ठ सन्निधौ विश्वकर्मणः ।
स्थितिं कुरु महाभाग यावन्निर्माति द्वारकाम् ।१०
दिवानिशं च मत्पार्श्वे चक्रश्रेष्ठ स्थितिं कुरु ।
ओमित्युक्त्वा तु प्रययुः सर्वे चक्रं विना मुने ।११
कंसस्य पितरं भद्रमुग्रसेनं महाबलम् ।
नृपं चकार नगरे क्षत्रियाणां सतामपि ।१२
विजित्य च जरासन्धं निहत्य यवनं तथा ।
उपायेन महाभाग निर्माणक्रममीश्वरः ।१३

श्रीकृष्ण ने कहा—हे महान् भाग वाले समुद्र देव ! इस समय मुझे एक नगर का निर्माण करने के लिए एक सौ योजन स्थल तुम देदो । इसके पीछे मैं निश्चित दूंगा । ७ । हे कारो ! मेरे लिए तुम एक ऐसे सुन्दर एवं दिव्य नगर का निर्माण करो जो कि तीनों लोकों में दुर्लभ हो । वह नगर सबसे अधिक रमणीय होना चाहिए और नारियों के लिये बहुत ही कमनीय उसका निर्माण आवश्यक है ।८। मेरे भक्तों के लिए भी वह वाञ्छित होना चाहिए । यह नगर परम वैकुण्ठ के सदृश होवे । समस्त स्वर्गों की परम्परा में भी अभीप्सित इसकी रचना होनी चाहिए ।६। हे श्रेष्ठ स्वर्ग ! एक दिवानिश तुम विश्वकर्मा की सन्निधि में अपनी स्थिति करो । हे महाभाग ! जब तक कि यह विश्वकर्मा द्वारका नगर का निर्माण करता है ।१०। हे श्रेष्ठचक्र ! तुम भी एक अहोरात्र पर्यन्त मेरे ही समीप में रहो । हे मुने ! सबने "ओम्"—अर्थात स्वीकार है—ऐसा कहकर चक्र के अतिरिक्त वहाँ से प्रस्थान कर दिया था ।११। कंस के पिता महान् बलवान् एवं परम भद्र उग्रसेन को समस्त क्षत्रियों के रहते हुए नगर में श्रीकृष्ण ने नृप बना दिया था । १२ । जरासन्ध को पराजित करके और यवन का हनन करके हे महाभाग ! उपाय के द्वारा निर्माण क्रम में ईश्वर ने सबका ध्वस्त कर दिया था ।१३।

शतयोजनपर्यन्तं नगरं सुमनोहरम् ।
पद्मरागैर्मरकतैरिन्द्रनीलैरनुत्तमैः ।१४
दिवानिशं करिष्यन्ति यावन्निर्माणपूर्वकम् ।
यक्षैश्च सप्तभिर्लक्षैः कुवेरप्रेरितैरपि ।१५
वेताललक्षैः कूष्माण्डलक्षैः शंकरयोजितैः ।
दानवैर्ब्रह्मरक्षोभिः शैलकन्यानियोजितैः ।१६
तत्र दिव्यं च पत्नीनां सहस्राणांच्च षोडश ।
अन्यपत्नीजनस्यापि चाष्टाधिकशतस्य च ।१७
शिविरं परिखायुक्तमुच्चैः प्राकारवेष्टितम् ।
युक्तद्वादशशालं च सिंहद्वारपरिष्कृतम् ।१८
युक्तत्रविचित्रै कृत्रिमैश्च कपाटकैः ।
निषिद्धवृक्षरहितं प्रसिद्धैश्च परिष्कृतम् ।१९
सुलक्षणं चन्द्रवेधं प्रांगणंच्च तथैव च ।
यदूनामाश्रमं दिव्यं किंकराणां तथैव च ।२०
सर्वप्रसिद्धं निलयमुग्रसेनस्य भूभृतः ।
शाश्रमं सर्वतोभद्रं वसुदेवस्य मत्पितुः ।२१

जब तक अहोरात्र तक नगर का निर्माण करेंगे तब तक जरासन्ध आदि के पराजय का कार्य समाप्त कर दिया था। श्रीकृष्ण ने आदेश दिया था कि कुबेर के द्वारा भेजे हुए सात लाख यक्षों—एक लाख वेताल—एक लाख कूष्माण्ड—शङ्कर के द्वारा योजित दानव—ब्रह्म राक्षस जो शैल कन्याके द्वारा प्रेरित किये गये थे। इनके द्वारा नगर का सुन्दर निर्माण करो।१४-१६। उस द्वारका नगरी में सोलह सहस्र पत्नियों तथ अन्य एक सौ आठ पत्नियों के लिये दिव्य शिविर होने चाहिए। जो परिखाओं से युक्त हों और ऊंचे प्रकारों से वेष्टित हों। इसके सिंह द्वार में द्वादश शालायें होवें और वहुत ही परिष्कृत होनी चाहिए।१७-१८। इन सबमें चित्र-विचित्र और कृत्रिम कपाट रहने चाहिए। इनमें कोई भी निषिद्ध वृक्ष नहीं होंवे और जो प्रसिद्ध एवं उत्तम वृक्ष होते हैं उनकी शोभा से ये परिष्कृत बनाये जावें।१९। सुन्दर लक्षण वाले

चन्द्रवेध प्राङ्गण की रचना करो। यदुओं तथा सेवकों के साथ भी अत्यन्त दिव्य निर्मित किये जावे।२०। राजा उग्रसेन का जो आवास स्थान है वह इस नगरी में सबसे प्रसिद्ध एवं सुन्दर निर्मित होना चाहिये। मेरे पिता वसुदेव का आश्रम तो सर्व प्रकार से परम भद्र विरचित किया जावे।२१।

के ते वृक्षाः प्रशस्ताश्च निषिद्धाश्चापि केचन।
भद्राभद्रप्रदाश्चापि तान् वदस्व जगद्गुरो।२२
केषामस्थिनियुक्तञ्च शिविरञ्च शुभाशुभम्।
दिशि कुत्र जलं भद्रमभद्रञ्च वद प्रभो।२३
भद्रप्रदश्च को वृक्षो दिशि कुत्र प्रवर्त्तते।
किं प्रमाणं गृहणाञ्च प्रागणानां सुरेश्वर।२४
मंगल कुसुमोद्यानं दिशि कुत्र तरोस्तथा।
प्राकाराणां किं प्रमाणं परिखानां सुरेश्वर।२५
द्वाराणाञ्च गृहाणाञ्च प्राकाराणां प्रमाणकम्।
कस्य कस्य तरोः काष्ठं प्रशस्तं शिविरे प्रभो।
अमंगलं वा केषाञ्च सर्वं मां वक्तुमर्हसि।२६

विश्वकर्मा ने कहा—हे जगद्गुरो! प्रसिद्ध वृक्ष कौन-कौन से कहे जाते हैं और निषिद्ध वृक्ष कौन-कौन से होते हैं। इनमें भद्र एवं अभद्रके प्रदान करने वाले जो भी हों उन्हें कृपा करके बताइये।२२। हे प्रभो! किनकी अस्थियाँ युक्त हैं और किस प्रकार का शिविर शुभ एवं अशुभ होता है? किस दिशा में जल अच्छा होता है और किस दिशा में वह जल का रहना अभद्र होता है।२३। कौनसा वृक्ष भद्रता के प्रदान करने वाला है और वह किस दिशा में रहना चाहिए। हे सुरेश्वर! गृहों का क्या प्रमाण होना चाहिये और प्राङ्गण कितने लम्बे-चौड़े होने चाहिये —यह भी बताने की कृपा करें।२४। किस वृक्षका किस दिशा में कुसुमोद्यान होना चाहिये? प्राकारों (चहार दिवारी) का कितना प्रमाण होना चाहिए और प्राङ्गण का भी क्या प्रमाण भद्र होता है?।२५। हे

प्रभो ! आप कृपा करके यह बताइए कि द्वारोंका गृहोंका और प्राकारों का प्रमाण कितना और क्या होना चाहिए जो शुभ और उत्तम होता है। शिविर में किस किस वृक्ष का काष्ठ शुभ एवं प्रशस्त होता है तथा किन वृक्षों का काष्ठ अमङ्गल-कारक होता है यह सब मुझे बताने को आप योग्य हैं।२६।

आश्रमे नारिकेलश्च गृहिणांच धनप्रद: ।
शिविरस्य यदीशाने पूर्वे पुत्रप्रदस्तरु: ।२७
सर्वत्र मगलार्हश्च तरुराजो मनोहर: ।
रसालवृक्ष: पूर्वस्मिन् नृणां सम्पत्प्रदस्तथा ।२८
शुभप्रदश्च सर्वत्र सूरकारो निशामय ।
विल्वश्च पनसश्चैव जम्बीरो बदरी तथा ।२९
प्रजाप्रदश्च पूर्वस्मिन् दक्षिणे धनदस्तथा ।
सम्पत्प्रदश्च सर्वत्र यतो हि वर्द्धते गृही ।३०
जम्बूवृक्षश्च दाडिम्ब: कदल्याम्रातकस्तथा ।
बन्धुप्रदश्च पूर्वस्मिन् दक्षिणे मित्रदस्तथा ।३१
सर्वत्र शुभदश्चैव धनपुत्रशुभप्रद: ।
हर्षप्रदो सुवाकश्च दक्षिणे पश्चिमे तथा ।३२
ईशाने सुखदश्चैव सवत्रैव निशामय ।
सर्वत्र चम्पक: शुद्धो भुवि भद्रप्रदस्तथा ।३३
अलाम्बुश्चापि कूष्माण्डमायाम्बुश्च सकिंशुक: ।
वर्जुरी कर्कटी चापि शिवरे मंगलप्रदा: ।३४
वास्तूककारविल्वश्च वार्त्ताकुश्च शुभप्रद: ।३५

श्री भगवान् ने कहा—गृहियों के आश्रमों में नारियल का वृक्ष धन प्रदान करने वाला है यह शिविर के ईशान दिशा में होना चाहिए, यदि पूर्व दिशा में होता है तो यह वृक्ष पुत्र प्रदान करने वाला है। २७। वृक्षों का राजा आम्र का वृक्ष परम मनोहर और सभी जगह मङ्गल प्रद होता है। यह मनुष्यों को सम्पत्ति के प्रदान करने वाला है।२८। इसी तरह से सूरकार, विल्व, पनस, जम्बीर और बदरी

का वृक्ष सर्वत्र शुभ प्रद होते हैं।२९। पूर्व में प्रजा का दाता, दक्षिण में धन के प्रदान करने वाला और सभी जगह सम्पत्ति का प्रदाता होता है। इससे गृही की वृद्धि होती है।३०। जम्बू वृक्ष, दाड़िम वृक्ष, कदली और आम्र तरु पूर्व दिशामें बन्धु प्रदाता और दक्षिण में मित्रदाता होते हैं।३१। सर्वत्र शुभ प्रद है और धन, पुत्र और शुभ का प्रदान करने वाला है। दक्षिण और पश्चिम में हर्षप्रद और सुवाक होता है।३२। ईशान में सुखदाता और सर्वत्र ही है यह श्रवण करो। चम्पक का तरु सर्वत्र शुद्ध और भूतल में भद्रप्रद होता है ।३३! अलाम्बु, कूष्माण्ड मायाम्बु तथा किंशुक, खर्जूरी, कर्कटी के वृक्ष भी शिविर में मंगल के प्रदान करने वाले होते हैं ।३४। वास्तूक, कारविल्व और वार्न्ताकु वृक्ष भी शुभप्रद होते हैं।३५।

लताफलं च शुभदं सर्वं सर्वत्र निश्चितम्।
प्रशस्तं कथितं कारो निषिद्धं च निशामय।
अन्यवृक्षो निषिद्धश्च शिविरे नगरेऽपि च।३६
वटो निषिद्धः शिविरे नित्यं चोरभयं यतः।
नगरेषु प्रसिद्धश्च दर्शनात् पुण्यदस्तथा।३७
निषिद्धः शाल्मलिश्चैव शिविरे नगरे पुरे।
दुःखप्रदश्च सततं भूमिपानां सदापि च।३८
न निषिद्धः प्रसिद्धश्च ग्रामेषु नगरेषु च।
विद्यामतिनिषिद्धश्च सततं दुःखदस्तथा।३९
हे कारो तिन्तिड़ीवृक्षो यत्नात्तत्परिवर्जयेत्।
शतेन धनहानिः स्यात्ः प्रजाहानिर्भवेद् ध्रुवम्।४०
शिविरेऽतिनिषिद्धश्च नगरे किंचिदेव च।
न निषिद्धः प्रसिद्धश्च नगरे किञ्चिन्नेव च।
न निषिद्धः प्रसिद्धश्च ग्रामेषु नगरेषु च।४१
विद्यामतिनिषिद्धश्च प्रशस्तं परिवजयेत्।
खर्जूरश्च गहुश्चैव निषिद्धः शिविरे तथा।४२

हे कारो! लता फल सभी सर्वत्र निश्चित रूपसे शुभ देने वाले हुआ करते हैं। अब तक मैंने जो वृक्ष प्रशस्त होते हैं उनका वर्णन कर दिया

है। अब जो निषिद्ध है उनका श्रवण करो।३६। शिविर और नगर में भी जो जंगली वृक्ष होते हैं वे निषिद्ध माने जाते हैं। वटका वृक्ष शिविर में निषिद्ध होता है क्यों कि उसमे नित्य ही चोरों का भय रहा करता है। नगर में यही वट का वृक्ष प्रसिद्ध है क्योंकि इसके दर्शन से पुण्य होता है।३७। शाल्मलीका वृक्ष शिविर, नगर और पुर सर्वत्र निषिद्ध कहा जाता है. यह सर्वदा राजाओं को दुःख प्रदान करने वाला होता है।३८। ग्रामोंमें और नगरों में यह निषिद्ध नहीं होता है और न प्रसिद्ध ही है। यह विद्या, मति को निषिद्ध है और निरन्तर दुःख देता है।३९। हे कारो ! तिन्तड़ीक के वृक्ष का ये यत्न पूर्वक परिवर्तन कर देना चाहिए। इस से सैकड़ों के धनकी हानि होती है और निश्चय ही प्रजा की हानि भी इससे हुआ करती है।४०। इस वृक्ष का शिविर में होना तो अत्यन्त ही निषिद्ध होता है और नगरमें भी यह कुछ ही निषेध होता है। ग्रामों में और नगरों में तिन्तडीक तरु का निषेध नहीं होता है और न वहाँ यह प्रसिद्ध ही होता है।४१। यह विद्यामति निषिद्ध है। अतः प्राज्ञ पुरुष को इसका परिवर्जन ही कर देना चाहिए। खजूँर और गड्डु के वृक्षों का शिविर में निषेध होता है।४२।

गजानामस्थिशुभदमश्वानांच तथैवच ।
कल्याणमुच्चैः श्रवसां वास्तो स्थापनकारिणाम् ।४३
न शुभप्रदमन्येषामुच्छिन्नकारणं परम् ।
वानराणां नराणांच गर्दभाणां गवामपि ।४४
कुक्कुटानां शृगालानां मार्जाराणामभद्रकम् ।
भेटकानां शूकराणां सर्वेषांच शुभप्रदम् ।४५
ईशाने चापि पूर्वस्मिन् पश्चिमे च तथोत्तमे ।
शिविरस्य जलं भद्रमन्यत्राशुभमेव च ।४६
दीर्घे प्रस्थे समानं च न कुर्यान्मन्दिरं बुधः ।
चतुरस्रे गृहे कारो गृहिणां धननाशनम् ।४७
दीर्घः प्रस्थः परिमितो नेत्रांकेनापि संहृतम् ।
शून्येम रहितं भद्रं शून्यं शून्यप्रदं नृणाम् ।४८

प्रस्थे हस्तद्वयात् पूर्व दीर्घे हस्तत्रयं तथा।
गृहाणां शुभदं द्वारं प्राकारस्य गृहस्य च ।४६

जाम्ववती देवी स्वयं भल्लक की पुत्री दुर्गा का अंश है उसकी तपस्या के कारण से ही भारत में हरि ने उसके पाणि का ग्रहण किया है ।७८। कुन्ती के तो केवल भर्त्ता की आज्ञा से क्षेत्रज पुत्र थे । यद्यपि कलियुग में निषिद्ध है किन्तु अन्य तीनों युगों में यह पल पैतृक प्रसिद्ध है ।७९। युधिष्ठिर धर्म का पुत्र था—भीम वायु का पुत्र था—भूमण्डल में विजयी परम धर्मिष्ठ फाल्गुन (अर्जुन) महेन्द्र का पुत्र था—जिसको शम्भुने स्वयं पहिले पाशुपात अस्त्र दियाथा । अश्वमेध—गोका आलभन संन्यास—पल पैतृक और देवर द्वारा सुत की उत्पत्ति ये पांच कार्य कलियुगमें परिवर्सित होने चाहिए । द्रौपदीके पांच भर्त्ताजो थे वे शंकर के वरदान से ही हुए थे ।८०-८२। बलदेव परम पुनीत—पुष्पमधु का नित्य पान किया करते हैं । परम धार्मिक एवं शुचि ने स्नान करने के

लिये ही यमुना का आह्वान किया था ।८३। कृष्ण ने स्वयं ही महान् आत्मा वाले अर्जुन के लिये सुभद्रा को दिया था । दक्षिणात्य लोग मातुलों की कन्या का परिग्रह किया करतेहैं उनके यहाँ यह अवैद्य नहीं है ।८४। अन्य देशों में मातुली कन्या का परिग्रह करना दोष होता हैं–ऐसा कमलोद्भव ब्रह्माजी ने कहा है ।८५।

१०५--बाणानिरुद्धयुद्धवर्णनम्

एतस्मिन्नन्तरे तत्र सुभद्रश्च महाबलः ।
कुम्भाण्डभ्राता बलवान् बाणसेनापतीश्वरः ॥१
निर्भर्त्स्यं वाणसंग्रामे शस्त्रपाणिर्महारथः ।
श्रीकृष्णपौत्रं शूलञ्च चिक्षेप प्रलयाग्निवत् ॥२
अर्धचन्द्रेण तच्छूल चिच्छेद कामपुत्रकः ।
शक्ति चिक्षेप भद्रश्च शतसूर्य्यसमप्रभास् ॥३
वैष्णवास्त्रेण चिच्छेद तां शक्ति कामपुत्रकः ।
नारायणास्त्रं चिक्षेप सुभद्रो रणमूर्धनि ॥४
प्रणम्य शेते निर्भीतो मदनस्य सुतो बली ।
ऊर्ध्वमस्त्रं च बभ्राम शतसूर्य्यसमप्रभम् ॥५
प्रलीनमस्त्रमाकाशे विश्वसंहारकारणम् ।
अस्त्रे गते सोऽनिरुद्धो गृहीत्वा महानसिम् ॥६
प्रवभंज भद्ररथं जघानाश्वांश्च सारथिम् ।
जघान तं सुभद्रं च लीलया रणमूर्धनि ॥७
हते सुभद्रे बाणश्च महाबलपराक्रमः ।
बाणानां शतकं चापि चिक्षेप रणमूर्धनि ॥८

इसी अन्तर में वहाँ पर महान् बलवान् कुम्भाण्ड का भाई और अति बलवान् सुभद्र जो बाण की सेना के अधिपतियों का भी अधिपति था वहाँ आ गया था और इस महारथ ने हाथ में अस्त्र ग्रहण में करके वाणके युद्ध में अनिरुद्ध को वड़ी जोर से भर्त्सना दी थी और प्रलय

को अग्नि के समान श्रीकृष्णके पौत्र पर शूल का प्रक्षेप किया था ।१-२। काम पुत्र ने उस शूल को अर्ध चन्द्रके द्वारा छिन्न कर दिया था । और भद्र ने सी सूर्यो के समान प्रभा वाली शक्ति का प्रक्षेप किया था ।३। कामदेव के पुत्र ने वैष्णव अस्त्र के द्वारा उस शक्ति का छेदन कर दिया था । रणभूमि में सुभद्र ने नारायणास्त्र का प्रक्षेप किया था ।४। मदन के पुत्र ने नारायणास्त्रको प्रणाम किया था और निर्भीक होकर वह वली सो गया था और वह सौ सूर्योकी प्रभाके समान प्रभा वाला अस्त्र ऊपर की ओर भ्रमण करने लगा था ।५। विश्व के संहार करने का कारण स्वरूप वह नारायणास्त्र कुछ ही समय में आकाश में प्रलीन हो गया था । जब वह नारायणशास्त्र चला गया तो फिर अनिरुद्धने अपनी महान् असि को ग्रहण किया था ।६। उस रणक्षेत्र के मध्य में भद्ररथका भंजन कर दिया था । अश्वों को और उसके सारथि को मार दियाथा तथा लीला से ही सुभद्र को मार डाला था ।७। सुभद्र के हत हो जाने पर महान् बल और पराक्रम वाले बाण ने उस रणक्षेत्र के मध्य में सौ बाण एक साथ अनिरुद्ध पर प्रक्षिप्त किये थे ।८।

कामात्मजोऽग्निबाणेन बाणौघं प्रददाह सः ।
बाणश्चिक्षेप ब्रह्मास्त्रं सृष्टिसंहारकारणम् ॥९
दृष्ट्वा कामात्मजः शीघ्रं सबीजं मन्त्रपूर्वकम् ।
ब्रह्मास्त्रेणैव सहसा संजहारावलीलया ॥१०
बाणः पाशुपतं क्षेप्तुं समारेभे च कोपतः ।
निषिद्धश्च गणेशेन स्कन्देन शम्भुना तथा ॥११
तद् दृष्ट्वा सोऽनिरुद्धस्तं मनुर्बाणौघसंयुतम् ।
मुमोच जृम्भणं युद्धे शीघ्रं तच्च महारथम् ॥१२
जड़ो बभूव बाणश्च निश्चेष्टो रणमूर्धनि ।
पुनश्चिक्षेप निद्रास्त्रं निद्रितं तं चकार सः ॥१३
बाणं तं निद्रितं दृष्ट्वा गृहीत्वा खड्गमुत्तमम् ।
बाणं हन्तुं समुद्यन्तं वारयामास कार्त्तिकः ॥१४

उस कामात्मज ने अपने अग्नि वाण से उन बाण के द्वारा प्रक्षिप्त बाणों के समूह को जला दिया था। फिर वाण ने ब्रह्मास्त्र के द्वारा प्रहार किया था जो कि सृष्टिके संहार का कारण स्वरूप था।९। फिर कामदेव के पुत्र ने यह देखकर शीघ्र बीज के सहित मन्त्र पूर्वक सहसा ब्रह्मास्त्र के द्वारा ही अवलीला से उसका संहार कर दिया था।१०। बाण ने कोप करके पाशुपत अस्त्र का क्षेप करने के लिए आरम्भ किया था। गणेश ने उस समय में निषेध किया था स्कन्द तथा शम्भुने भी पाशुपत अस्त्र को प्रक्षिप्त करने में पूर्णतया निषेध किया था।११। यह देखकर उस अनिरुद्ध ने उस धनुष के समूह से संयुक्त जृम्भाण अस्त्र को शीघ्र युद्ध में उस महारथ पर प्रक्षिप्त कर दिया था।१२। उस अस्त्र का यह प्रभाव हुआ कि वाण वहीं पर युद्ध क्षेत्र में जड़ होकर चेष्टाहीन हो गया था। इसके पश्चात उस अनिरुद्ध ने निद्रास्त्र छोड़ दिया था और इससे उस वाणासुर को उसने निद्रितकर दिया था।१३ उस वाण को निद्रित देखकर अनिरुद्ध ने अपना उत्तम खड्ग ग्रहण कर लिया था कि उससे उसका हनन कर दिया जावे किन्तु वाण का हनन करने को समुद्यत अनिरुद्ध को स्वामी कार्त्तिकेय ने वारण कर दिया था।१४।

स्कन्दश्च शतवाणैश्च वारयामास लीलया।
अनिरुद्धं महाभागं वलवन्तं धनुर्धरम् ॥१५
अनिरुद्धश्च सहसा तया शक्त्या दुरन्तया।
बभंज कार्त्तिकरथं रत्नेन्द्रसारनिर्मितम् ॥१६
गदया कार्त्तिकः क्रुद्धोऽप्यनिरुद्धरथं मुदा।
बभंज लीलया तत्र क्षणेन रणमूर्धनि ॥१७
अनिरुद्धोऽर्धचन्द्रेण क्षुरधारेण लीलाया।
चिच्छेद वार्त्तिकधनुर्भल्लास्त्रेण नियोजितम् ॥१८
जघान कार्तिकस्तं च गदया च दुरन्तया।
गदां जग्राह तद्धस्ताज्जवेन मदनात्मजः ॥१९

शूलं गृहीत्वा स्कन्दं च तमेव हन्तुमुद्यतम् ।
अनिरुद्धश्च कोपेन प्रेरयामास दूरतः ॥२०
कार्त्तिकः पुनरागत्य गृहीत्वा कामपुत्रकम् ।
गृहीत्वा च करेणैव पातयामास भूतले ॥२१
शनिरुद्धौ गृहीत्वासिं समुत्तस्थौ महाबला ।
तयोर्विरोधं दूरञ्च प्रचकार गणेश्वरः ॥२२
कार्तिकः प्रययौ गेहमुषागेहं स्मरात्मजः ।
सर्वं निवेदितुं शम्भुं प्रययौ स गणेश्वरः ॥२३

स्कन्द ने सौ बाणों के द्वारा लीला ही अनिरुद्ध का वारण कर दिया वह अनिरुद्ध भी महान् भाग वाले अत्यन्त बलवान् और धनुर्धारी थे ।१५। अनिरुद्ध ने भी सहसा उस शक्ति जो जो कि तुरन्त थी, उत्तम रत्नों के द्वारा निर्मित स्वामी कार्त्तिकेय के रथ का भंजन कर दिया था ।१६। कार्त्तिकेय ने क्रुद्ध होकर गदा से हर्ष के साथ अनिरुद्ध कें रथ का एक ही क्षण में लीलासे ही वहाँ रणक्षेत्रमें भंजन कर दिया था ।१७। अनिरुद्ध ने क्षुर के समान धारा वाले अपने अर्ध चन्द्र अस्त्र से लीला से ही भल्लास्त्र से नियोजित स्वामी कार्त्तिकेय के धनुष का छेदन कर दिया था ।१८। स्वामी कार्त्तिकेय ने अपनी दुरस्त गदा के द्वारा उसका भीं छेदन कर दिया था फिर तो मदन के पुत्र ने वेग के साथ उस कार्त्तिकेय के हाथ से वह गदा ग्रहण करली थी ।तह। स्कन्द ने शूल ग्रहण करके वह फिर उसको ही मारने को उद्यत हुए थे । अनिरुद्ध ने दूर से ही कोप करके प्रेरित कर दिया ।१९। कार्त्तिक ने फिर वहाँ आकर काम पुत्र को पकड़ लिया था और हाथसे ही पकड़ कर अनिरुद्ध को भूतल में गिरा दिया था ।२१। महान् बलवान् अनिरुद्ध भी अपनी तलवार लेकर सामने खड़ा हो गया । उस समय में गणेश ने यहाँ आकर उन दोनों के विरोध को दूर कर दिया था ।२२ कार्त्तिक तो फिर अपने गृह को चले थे और अनिरुद्ध उपा के भवन चले गये थे । यह सब घटित युद्ध की घटना को निवेदित करने के लिए गणेश भगवान् शम्भु के समीप में चले गए थे ।२३।

गणेशस्तु शिवस्थानं गत्वा नत्वा महेश्वरम् ।
सर्वं विज्ञापयामास क्रमेण च पृथक् पृथक् ॥२४
बाणानिरुद्धयोर्युद्धं सुभद्रोनिधनं तथा ।
स्कन्दानिरुद्धयोर्युद्धमनिरुद्धस्य विक्रमम् ॥२५
गणेशवचनं श्रुत्वा प्रहस्य भगवान् भवः ।
उवाच श्लक्ष्णया वाचा सुगुप्तं वेदसम्मतम् ॥२६
गणेश्वर महाभागं श्रूयता वचनं मम ।
हितं तथ्यं नीतिसारं परिणाम सुखावहम् ॥२७

गणेश जब भगवान् शिव के आवास स्थल में पहुंच सके तो उन्होंने वहाँ जाकर महेश्वर को प्रणाम किया । फिर गणेश ने क्रम से पृथक्-२ समस्त वृत भगवान शिव को वता दिया ।२४। बाण और अनिरुद्ध का युद्ध सुभद्र की मृत्यु—और स्कन्ध तथा अनिरुद्ध का प्रबल विक्रम का हाल भी भगवान् शंकर को वता दिया था ।२५। गणेश के वचन का श्रवण करके भगवान् शम्भु हंस पढ़े थे और परम गुप्त वेद से सम्मत बात को अपनी अति श्लक्ष्ण वाणी से कहने लगे ।२६। श्री महादेव ने कहा —हे महाभाग ! हे गणेश्वर ! तुम मैरे वचन का श्रवण करो जो कि परम हितकर-सत्य-नीति का सार रूप और परिणाम में सुख देनें वाला है ।२७।

असंख्यविश्वसङ्घश्च सर्वं कृष्णात्मजं सुतम् ।
कृष्णं जानीहि यत् कारणानाञ्च कारणम् ॥२८
ब्रह्मादितृणपर्य्यन्तं जगत् सर्वं गणेश्वर ।
निबोध सत्यं कृष्णञ्च भगवन्तं सनातनम् ॥२९
परिपूर्णतमो रामो ब्रह्मशापात् स्वविस्मृतः ।
तस्य पुत्रोऽनिरुद्धश्च महाबलपराक्रमः ॥३०
मया प्रस्थापितः स्कन्दो महायुद्धे सुदारुणो ।
मृतो वाणश्च संग्रामे तेन स्कन्देनरक्षितः ॥३१
स्कन्दानिरुद्धयोर्युद्धे समत्वं तु गणेश्वर ।
अष्टौ च भैरवाः सर्वे रुद्रांश्चैकादशैव ते ॥३२

अष्टौ च वसवश्चैते देवाः शक्रादयस्तथा ।
तथैव द्वादशादित्याः सर्वे दैत्येश्वरास्तथा ॥३३
देवानामग्रणीः स्कन्दो बाणश्च सगणस्तथा ।
सर्वे ते चानिरुद्धस्य संग्रामे जेतुमक्षमाः ॥३४
अनिरुद्धः स्वयं ब्रह्मा प्रद्युम्नः काम एव च ।
बलदेवः स्वयं शेषः कृष्णश्च प्रकृतेः परः ॥३५
एतत्ते कथितं सर्वं बाणं रक्ष गणेश्वरः ।
भवान् शुभस्वरूपश्च विघ्नखण्डनकारकः ॥३६
आरादयास्यति हरिर्गृहीत्वा च सुदर्शनम् ।
अव्यर्थमस्त्रप्रवरं सूर्यकोटिसमप्रभम् ॥३७

असंख्य विश्वोंके समुदाय रूप श्रीकृष्ण का पुत्रहै। वे कृष्ण कारणों के भी कारण हैं। ब्रह्मादिसे तृण पर्यन्त जो जगत है, उसे हे गणेश्वर ! सत्य, सनातन रूप कृष्ण ही समझो। वह परिपूर्णतम प्रभु ब्रह्मशाप के वशीभूत होकर अपने को भूल गये हैं। उनका पुत्र अनिरुद्ध महाबली और पराक्रमी है। मेरे द्वारा स्थापित जो स्कन्द का सुदारुण महायुद्ध है उसमें मरता हुआ बाण स्कन्द के द्वारा रक्षित हुआ है। हे गणेश्वर! स्कन्द और अनिरुद्ध का युद्ध समान है आठों भैरव, एकादश रुद्र, अष्ट, वसु, इन्द्रादि देवता, द्वादश आदित्य और सब दैत्यों में जो देवताओं के अग्रणी स्कन्द हैं, वे और बाण तथा सभी गण—ये सभी अनिरुद्ध को जीतने में असमर्थ हैं। क्योंकि अनिरुद्ध स्वयं ब्रह्मा और प्रद्युम्न कामदेव है। बलदेव शेषावतार और कृष्ण तो प्रकृति से भी परे हैं। हे गणेश्वर ! तुम शुभ स्वरूप और सब विघ्नों को नष्ट करने वाले हो, बाणकी रक्षा करो। इसी बीच, श्रीकृष्णने अपने करोड़ों सूर्योंके समान प्रभा वाले, अव्यर्थ महास्त्र सुदर्शन को—हाथ में ले लिया।२८-३७।

——

१०५--वाणासुर-कृष्ण-युद्ध-वर्णनम्

अथ कृष्णश्च भगवानुद्धवेन बलेन च ।
दूतं प्रस्थापयामास विधाय मन्त्रिणं शुभम् ॥१
शिवो गणपतिर्यत्र दुर्गा दुर्गतिनाशिनी ।
कार्तिकेयो भद्रकाली चोग्रचण्डा च कोटरी ॥२
आगत्य नत्वा दूतश्चगणेशश्चशिवं शिवाम् ।
मानवांश्चापि पूज्यांश्च समुवाचयथोचितम् ॥३
वाणमाह्वयते कृष्णः संग्रामार्थं महेश्वर ।
किंवानिरुद्धमूषाञ्च गृहीत्वा शरण व्रज ॥४
रणे निमन्त्रितो यो हि न याति भयकातरः ।
परत्र नरकं याति सप्तभिः पितृभिः सह ॥५
दूतस्य वचनं श्रुत्वा सभामध्ये यथोचितम् ।
उवाच पार्वती देवी स्वयं शङ्करसन्निधौ ॥६

नारायण ने कहा-इसके अनन्तर भगवान कृष्णने उद्धव और बलदेव के साथ मन्त्रणा करके दूत को प्रेषित किया।१। जहाँ पर साक्षात शिव-गणपति-दुर्गतिके नाश करने वाली जगदम्बा दुर्गा-स्वामी कार्तिकेय-भद्रकाली उग्रचण्डा और कोटरी थी वहाँ दूत को भगवान् ने भेजा था।२। दूत ने वहाँ पहुँचकर शिव-शिवा-गणेश और जो भी पूज्य मानव थे उन सबको प्रणाम यथोचित उसने कहा—।३। दूत बोला-हे महेश्वर ! भगवान् कृष्ण संग्र म करने के लिए वाण का आह्वान करते हैं अथवा अनिरुद्ध और उषा को लेकर वह उनकी शरणागति में प्राप्त हो जावें।४। रणक्षेत्र में निमन्त्रित होता हुआ भी जो क्षत्रिय युद्ध भूमि में भय से कातर होकर नहीं जाया करता है वह अपने सात पितृगणके सहित परलोकमें नरक में जाया करता है।५। उन सभा के मध्य में दूत के वचन को श्रवण कर जो कि यथोचित कहा गया था शंकर भगवान् की सन्निधि में देवी पार्वती स्वयं बोली थी।६।

गच्छ बाण महाभाग गृहीत्वा वद कन्यकाम् ।
सर्वस्वं यौतुकं दत्वा श्रीकृष्णं शरणं ब्रज ।।७
सर्वेषामीश्वरं वीजं दातारं सर्वसम्पदाम् ।
वरं वरेण्यं शरणं कृपालुं भक्तवत्सलम् ।।८
पार्वतीवचनं श्रुत्वा तमूचुस्ते सुरेश्वराः ।
प्रशशंसुः सभामध्ये धन्यधन्येति सर्वदा ।।९
कोपाविष्टश्चा वाणोऽयमुत्तस्था सहसौऽसुरः ।
सान्नाहिकोधनुष्पाणिः प्रणम्य शंकरं ययौ ।।१०
सर्वैर्निषिध्यमानश्च कम्पितो रक्तलोचनः ।
सान्नाहिकश्च दैत्यानां त्रिकोट्या च महाबलः ।।११
कुम्भाण्डूकूपकर्णश्च निकुम्भः कुम्भः एव च ।
सेनापतीश्वराश्चैते ययुः सान्नाहिकास्तथा ।।१२
उन्मत्त भैरवश्चैव संहारभैरवस्तथा ।
असिताङ्गो भैरवश्च रुरुभैरव एव च ।।१३
महाभैरवसंज्ञश्च कालभैरव एव च ।
प्रचाण्ड भैरवश्चैव क्रोधभैरव एव च ।।१४

पार्वतीजी ने कहा—हे महाभाग ! हे वाण ! तुम जाकर बोली और कन्या उषाको साथ लेकर चले जाओ । अपना सर्वस्व यौतुक (दहेज)के रूप में समर्पित कर श्री कृष्ण भगवान की शरण में पहुँच जाओ ।७। भगवान् कृष्ण सभीके ईश्वर हैं-सबके बीज स्वरूप हैं-सम्पूर्ण सम्पदाओंके प्रदान करने वाले हैं—श्रेष्ठ हैं-वरेण्य हैं-रक्षक कृपालुहैं और अपने भक्तों पर प्यार करने वाले हैं ।८। पार्वती के इस वचन का श्रवणकर समस्त सुरेश्वर जो वहाँ उपस्थित थे उन्होंने भी उससे यही कहा था । उस सभा के मध्य में सर्वदा धन्य हैं इस तरह से सब ने पार्वती की बहुत प्रशंसा की थी ।९। कोप में आविष्ट वाणासुर सहसा उठकर खड़ा हो गया था और सान्नाहिक (युद्ध करने के लिए उद्यत) होता धनुष हाथ में लेकर शंकर को प्रणाम करके चल दिया था ।१०। सबके द्वारा निषेध भी किया था किन्तु कम्पित होते हुए उस वाणासुर के नेत्ररक्त

वर्ण के हो गए थे। सान्नाहिक होकर उसने तीन करोड़ दैत्यों की बड़ी भारी सेना साथ में लेली ।११। कुम्भांड-कूपकर्ण-निकुम्भ और कुम्भ ये सब सेनापति एवं सेनाके अध्यक्ष थे। ये सब सान्नाहिक होकर वहाँ रण भूमि में गए थे।१२। उसकी सेना के साथ में उन्मत्त भैरव-संहार भैरव-असिताभैरव-रुरुभैरव-कालभैरव और क्रोधभैरव थे।१३-१४।

प्रययुः शक्तिभिः सार्द्धं सर्वे सान्नाहिकाश्च ते।
कालाग्निरुद्रो भगवान् रुद्रैः सान्नाहिको ययौ ॥१५
उग्रचण्डा प्रचण्डा च चण्डिका चण्डनायिका।
चण्डेश्वरी चामुण्डा चण्डी चण्डकपालिका ॥१६
अष्टौ न नायिकाः सर्वाः प्रययुः खर्परान्विताः।
कोटरीरत्नयानस्था शोणितग्रामदेवता ॥१७
प्रययौ सा प्रफुल्लास्या खड्गखर्परधारिणी।
चन्द्राणीवैष्णवी शान्ता ब्रह्माणी ब्रह्मवादिनी ॥१८
कौमारी नारसिंही च वाराही विकटाकृतिः।
माहेश्वरी महामाया भैरवी भीमरूपिणी ॥१९
अष्टौ च शक्तयः सर्वा रथस्थाः प्रययुर्मुदा।
रत्नेन्द्रसारयानस्थाः प्रययुर्भद्रकालिका ॥२०
रक्तवर्णा त्रियनयना जिह्वाललनभीषणा।
शूलशक्तिगदाहस्ता खड्गखर्परधारिणी ॥२१
प्रययौ शूलहस्तश्च वृषभस्थो महेश्वरः।
स्कन्दश्च शिखियानस्थः शस्त्रपाणिर्धनुर्धरः।
एवञ्च प्रययुः सर्वे गणेशं पार्वती विना ॥२२

ये सब भैरव गण सान्नाहिक होते हुए अपनी २ शक्तियों के साथ प्रस्थित हुए थे। रुद्रों के साथ भगवान् कालाग्नि रुद्र भी सान्नहिक होकर वहाँ रणक्षेत्र में गये थे।१५। उग्र चन्डा-प्रचन्डा-चन्डिका-चन्ड नायिका-चण्डेश्वरी चामुन्डा-चन्डी-चन्ड-कपालिका ये आठों नायिकायें भी सब खर्परों से संयुत होकर गई थीं। रत्नों के यानमें स्थित कोटरी

और शोणित ग्राम देवता गई थी।१६-१७। वह खड्ग और खर्पर को धारण करने वाली प्रफुल्ल मुखसे युक्त होकर गईथी। इन्द्राणी वैष्णवी शान्ता-ब्रह्माणी-ब्रह्मवादिनी-कौमारी-नारसिंही वाराँही-विकटाकृती-माहेश्वरी-महामाया-भैरवी-भीम-रूपिणी ये आठों शक्तियाँ सब रथों में अब स्थित होकर बड़े हर्ष से गई थीं। भद्र कालिका रत्नों के निमित्त यान समारूढ़ होकर गई थीं।१८-२२। रक्तवर्ण वाली-तीन नेत्रों वाली-जिह्वा ललन से अत्यन्त भीषण स्वरूप वाली-शूल, शक्ति और गदा हाथों में धारण करने वाली तथा खड्ग और खर्परको धारण करने वाली वह रणक्षेत्र में पहुंच गई थीं।२१। महेश्वर भी साक्षात वृषभ पर समा होकर तथा हाथ में त्रिशूल ग्रहण करके गये थे। अपने शिखीके यानपर संस्थित होकर,शस्त्र हाथमें लेकर तथा धनुष धारण करके स्वामी कार्तिकेय भी गये थे। इस प्रकार से वहाँ युद्ध स्थल में सभी गये थे। केवल पार्वमी और गणेश नहीं गये थे।२२।

एभिर्युक्तं महादेवं दृष्ट्वा च भद्रकालिकाम्।
प्रचक्रे चक्रपाणिश्च सम्भाषाञ्च यथोचिताम् ॥२३
बाणः शङ्खध्वनिं कृत्वा प्रणम्य पार्वतीश्वरम्।
धनुर्दधार सगुणं दिव्यास्त्रेणानियोजितम् ॥२४
वाणं समुद्यतं दृष्ट्वा सात्यकिः परवीरहा।
निषिध्यमानस्तैः सर्वैः सन्नाही प्रययौ मुदा ॥२५
बाणश्चिक्षेपदिव्यास्त्रमाञ्छलं नामनारद।
अव्यर्थं ग्रीष्ममध्याह्नमार्तण्डाभसुतीक्ष्णकम् ॥२६
दृष्ट्वाऽस्त्रं सात्यकिः साक्षात् किञ्चिन्नम्रो बभूव ह।
किंवा न दग्धः प्रययौ नभोमध्यं सुदारुणम् ॥२७
वह्निं चिक्षेप बाणश्च सात्यकिर्वारुणेन च।
प्रज्वलन्तं तालमानं निर्वाणञ्चकारसः ॥२८

इन सबसे युक्त महादेव को और भद्र कालिका को देखकर चक्रपाणि से यथोचित सम्भाषा की थी।२३। वाणासुर ने शंख की ध्वनि

का श्रवण करके पार्वतीश्वर को प्रणाम किया था और दिव्यास्त्र से नियोजित सगुण धनुष को उसने धारण किया था।२४। जब वाण को युद्ध करने को समुद्यत देखा तो पर वीरों के हनन करने वाले सात्यकि भीयुद्ध के लिए प्रस्तुत हो गये थे। यद्यपि उन सब के द्वारा वह निषिद्ध किया गया था तो भी वह सात्यकि सन्नाही होकर वहाँ रण भूमि में हर्ष पूर्वक चला गया था।२५। हे नारद! बाण ने आंछल दिव्यास्त्र आ प्रक्षप किया था। असस्त्र अव्यर्थ था। और ग्रीष्मकाल के मार्त्तन्ड की आभा वाला एवं सुतीक्ष्ण था।२६। सात्यकि इस अस्त्र को प्रक्षिप्त हुआ देखकर साक्षात कुछ नम्र हो गया था अथवा दग्ध न होकर सुदारुण नभोमन्डल के मध्य में चला गया था।२७। फिर वह्नि वाण का क्षेप किया गया था फिर सात्यकि ने वारुणास्त्रके द्वारा प्रज्वलित तालमान को उसने निर्वाण कर दिया था।२८।

चिक्षेप पावनं बाणः प्रचण्डघोरमुल्बणम्।
चिच्छेदसात्यकिश्चैव पार्वतास्त्रेण लीलया ॥२९
नारायणास्त्रं चिक्षेप बाणाश्च रणमूर्धनि।
सात्यकिर्दण्डवद् भूमौ पपातार्जुनशिक्षया ॥३०
माहेश्वरं प्रचिक्षेप बाणः शस्त्रविदां वरः।
सात्यकिर्वैष्णवास्त्रेण प्रचिच्छेदावलीलया ॥३१
ब्रह्मास्त्रञ्चापि चिक्षेप ब्राणश्च रणमूर्धनि।
क्षणंचकार निर्वाणं ब्रह्मास्त्रेण च सात्यकिः ॥३२
नागास्त्रञ्चापि चिक्षेप बाणो रणविशारदः।
सात्यकिर्गरुडेनैव सञ्जहार क्षणेन च ॥३३
जग्राह शूलमव्यर्थं शङ्करस्य सुदारुणम्।
तुष्टाव सात्यकिर्दुर्गां गले माल्यं बभूव ह ॥३४
जग्राह धनुषा बाणो बाणं पाशुपतं तथा।
बाणं स बाणं जृम्भञ्छ सात्यिकिञ्च चकार ह ॥३५
बाणं तं जृम्भितं दृष्ट्वा कार्तिकेयो महाबलः।
अर्धचन्द्रञ्च चिक्षेप कामश्चिच्छेदलीलया ॥३६

फिर वाण ने पावन का प्रक्षेप किया था जो प्रचन्ड घोर और अत्यन्त उल्वण था। सात्यकि ने उसका पार्वतास्त्र के द्वारा लीला से ही छेदन करा दिया।२९। फिर वाण ने रणभूमि में नारायणास्त्र का प्रक्षेप किया था सात्यकि ने अर्जुन की शिक्षा प्राप्त की थी अतएव वह नारायणास्त्र को प्रक्षिप्त होता हुआ देखकर भूमि में एक दण्ड की भाँति लेट गया था।३०। इसके उपरान्त शास्त्रों के ज्ञाताओं में परम कुशल वाण ने माहेश्वर का प्रक्षेप किया था उसका छेदन लीला ही से सात्यकि ने वैष्णवाशास्त्र के द्वारा कर दिया था।३१। वाण ने ब्रह्मास्त्र का भी प्रक्षेप किया उसका निर्वाण एक ही क्षणमें सात्यकिने ब्रह्मास्त्र के द्वारा ही करा दिया था।३२। रण विद्या के महान पण्डित वाणासुर ने फिर नागास्त्र का प्रक्षेप सात्यकि के ऊपर किया उसका संहरण सात्यकिने गरुडास्त्र के द्वारा क्षणमात्र में ही कर दिया था।३३ इसके अनन्तर जब सभी अस्त्र वाणासुर के विफल होगये तो फिर उसने शंकर सुदारुण एवं अव्यर्थ शूलका ग्रहण कियाथा। उस समय सात्यकि ने दुर्गा का स्तवन किया था कि उसके प्रभाव से वह गले में माला के समान हो गया।३४। फिर वाण ने पाशुपत वाण को ग्रहण किया था। जिसको धनुष के द्वारा छोड़ा था। सात्यकि ने उस बाण को और वाणासुर को जृम्भास्त्र द्वारा प्रभावहीन किया था। जृम्भास्त्र से बाणासुर निद्रित हो गया था। स्वामी कार्तिकेय ने जब यह देखा तो उसने अर्ध चन्द्र का प्रक्षेप किया जिसको कामने लीला से ही छिन्न-भिन्न कर दिया।३५-३६।

गदांचिक्षेप च स्कन्दः प्रातः सूर्यसमप्रभाम्।
वैष्णवास्त्रेणकामश्च निर्वाणञ्च चकार सः ॥३७
नारायणास्त्रं स्कन्दश्च प्राक्षिपच्च त्वरान्वितः।
पपातदण्डवद्भूमौ प्रद्युम्नःकृष्णशिक्षया ॥३८
स्कन्दः शक्तिञ्च चिक्षेप प्रलयाग्निसमप्रभाम्।
कामो नारायणास्त्रेण निर्वाणश्च चकार ताम् ॥३९
ब्रह्मास्त्रञ्च प्रचिक्षेप कार्तिको रणमूर्धनि।
ब्रह्मास्त्रेणापि कामश्च निर्वाणंच चकार सः ॥४०

जग्राह कार्तिकः कोपाद्दिव्यं पाशुपतं तथा ।
निद्रास्त्रेणापि मदनो निद्रितञ्च चकार तम् ॥४१
कार्तिकंनिद्रितं दृष्ट्वा बाणं च जृम्भितं तथा ।
कोपात्कामं च सरथं जग्राह भद्रकालिका ॥४२
क्रोडे कृत्वा च बाणं च स्कन्दं च जगतां प्रसूः ।
रणस्थलां च प्रययौ यत्रैव पार्वतीसती ॥४३

प्रातः काल के सूर्य की प्रभा के तुल्य प्रभा वाली गदा का स्कन्दने प्रक्षेप किया था उनका निर्माण कामदेव ने वैष्णव अस्त्र के द्वारा कर दिया ।३७। फिर स्कन्द ने त्वरान्वित होकर नारायणास्त्र का प्रक्षेप प्रद्युम्न पर किया । कृष्ण की शिक्षा से प्रद्युम्न नारायणाशास्त्र को प्रक्षिप्त देखकर भूमि में दन्ड की भाँति गिर गया था ।३८। इसके उपरान्त स्कन्द ने प्रलयकालीन अग्नि के समान प्रभावती शक्ति का प्रक्षेप किया उसका निर्वाण काम ने नारायणास्त्र के द्वारा ही कर दिया ।३९ कार्तिक ने रण भूमि में ब्रह्मास्त्र का प्रयोग किया था काम ने उसका निर्वाण ब्रह्मास्त्र के द्वारा ही कर दिया ।४०। फिर कोप से कार्तिक ने दिव्य पाशुपतास्त्र को ग्रहण किया था । मदनने निद्रास्त्रके द्वारा उसको निद्रित कर दिया ।४१। कार्तिक को निद्रित और वाण को जृम्भित देख कर भद्रकायिका ने कोप से रथ के सहित काम को और अपनी गोदमें बाणसुर को तथा स्कन्द को जगतों की जननी ने करके वह उस रणस्थल से जहाँ पर सती पार्वती भी वहाँ चली गई थी ।४२-४३।

कार्तिकं बोधयामास बाणं सुस्थं चकार सा ।
सहसा वदेथः कामो नासारन्ध्रेण वर्त्मना ॥४४
बर्हिर्बभूव सन्त्रस्तो प्रययौ च रणस्थलम् ।
दृष्ट्वा कामं च सरथं जहुसुर्यादवास्तदा ॥४५
सर्वे शैवाश्च तत्रस्थाः शुष्ककण्ठा भयाकुलाः ।
अथ वाणः पुनः क्रुद्धो रथमारुह्य कोपतः ॥४६
कार्तिकेयश्च भगवान् युद्धाय पुनरागतः ।
बाणः पंचशरांश्चैव चिक्षेप रणमूर्धनि ॥४७

अर्धचन्द्रेण चिच्छेद बलदेवो महाबलः ।
रथं बभंज बाणस्य लांगलेन च लांगली ॥४८
जघान सूतमश्वांश्च मुषलेनावलीलया ।
छेत्तुमुद्यमं कुर्वन्तं हलिनं च महावलम् ॥४९
कालाग्निरुद्रो भगवान् वारयामास लीलया ।
रथं कालाग्निरुद्रस्य बभंज लांगली रुषा ॥५०

उस पार्वतीदेवी ने कार्तिक को प्रयुद्ध किया और वाण को भी सुस्थ कर दिया था । रथ में काम नासा के छिद्र के मार्ग से सहसा गया था और मन्त्रस्त होता हुआ रण स्थल में चला गया । जब यादवों ने रथ के सहित प्रद्युम्न को देखा तो मब हँसने लगे थे ।४४-४५। वहाँ पर स्थित सभी शैव अर्थात जिव के भक्त सूखे हुए कण्ठ वाले और भय से बेचैन हो गये । इसके उपरान्त बाण ने पुनः क्रुद्ध होकर कोणसे रथ में आरोहण किया ।६६। भगवान् कार्तिकेय भी युद्ध करने के लिए फिर आ गये थे । वाण ने क्षेत्रमें पाँच शरों का प्रक्षेप किया था ।४७। महान् बलवान बलदेव ने अर्धचन्द्र के द्वारा उसका छेदन किया और लाङ्गली बलदेव ने अपने हलसे वाणासुर के रथका भञ्जक करदिया ।४८। बलदेव ने अपने मुषल से उसके रथके अश्वों और सारथि का लीला से ही हनन कर दिया । फिर महान बलवान हाथी को छिन्न करने को उद्यम करने वाले को भगवान् कालाग्नि रुद्र ने लीला से ही वारण किया । फिर लाङ्गली ने कालाग्नि रुद्र का रथ भग्न कर दिया ।४९-५०।

हलेन सूतमश्वांश्च जघान रणमूर्धनि ।
कालाग्निरुद्रः कोपेन चिक्षेप ज्वरमुल्वणम् ॥५१
वभूवुर्यादवः सर्वे ज्वराक्रान्ता हरिं विना ।
तं दृष्ट्वा भगवान् कृष्णः ससर्ज वैष्णवं ज्वरम् ॥५२
तं चिक्षेप ज्वरं हन्तुं माहेशंष्टरणमूर्धनि ।
बभूव ज्वरयोर्युद्धं मुहूर्तमतिदारुणम् ॥५३
वैष्णवज्वरनिष्क्रान्तो रणमूर्ध्नि पपात सः ।

पर बभूव निश्चेष्टस्तुष्टाव माधवं पुनः ॥५४
प्राणान् रक्ष जगन्नाथ भक्तानुग्रविग्रह ।
त्वमात्मा पुरुषः पूर्णः सर्वत्र समता तव ॥५५
ज्वरस्य वचनं श्रुत्वा संजहार स्वकं ज्वरम् ।
माहेश्वरो ज्वरो भीतो रणादेव हि निर्ययौ ॥५६

बलदेव ने जब रणक्षेत्र में हल के द्वारा सूत और अश्वों को मार दिया था तो कालग्निरुद्र ने उल्वण ज्वर नानक अस्त्र का प्रक्षेप किया ।५१। हरि को छोड़ कर सभी यादव ज्वर से आक्रान्स हो गये थे । इसको देखकर भगवान कृष्ण ने वैष्णव ज्वर को छोड़ दिया था और माहेश ज्वर के हनन करने को इस वैष्णव ज्वर का सृजन उस रण स्थल में किया था । फिर उन दोनों वैष्णव और माहेश ज्वरों का अति दारुण युद्ध मुहूर्त्त मात्र तक होता रहा था ।५२-५३। वैष्णव ज्वर से निष्क्रान्त होकर वह माहेश ज्वर रणक्षेत्र में गिर गया था । वह अति नश्चेष्ट हो गया था और फिर उसने माधव का स्तवन किया ।५४। ज्वर ने कहा—हे जगतों के नाथ ! मेरे प्राणों की रक्षा करो । आप तो अपने भक्तों पर अनुग्रह करने के लिये ही शरीर धारण करने वाले हैं । आप सबकी आत्मा हैं—आप पूर्ण पुरुष हैं और आपको तो सर्वत्र समता का ही भाव रहता है ।५५। ज्वर की इज प्रार्थनाके वचन का श्रवणकर माधव भगवान् ने अपने ज्वर का संहरण कर लिया । माहेश्वर ज्वर डरा हुआ उस रणक्षेत्र से ही निकल कर चला गया था ।५६।

वाणश्च पुनरागत्य वाणनां च सहस्रकम् ।
चिक्षेप मन्त्रपूतं च प्रलयाग्निशिखोपमम् ॥५७
फाल्गुनः शरजालेन वारयामास लीलया ।
चिक्षेप शक्तिबाणश्चा ग्रीष्मसूर्यसमप्रभाम् ॥५८
चिच्छेद लीलया तांच सव्यसाची महाबलः ।
स जग्राह पाशुपतं शतसूर्य समप्रभम् ।५९
अत्यर्थमतिघोरं च विश्वसंहारकारकम् ।
तद्दृष्ट्वा चक्रपाणिश्चा चक्रं चिक्षेप दारुणम् ॥६०

हस्तानां च सहस्रं च स पाशुपतमुल्वणम् ।
चिच्छेद रणमध्ये च पपाताचलसिंहवत् ॥६१
शस्त्रं पाशुपतं चैव ययौ पशुपतेः करम् ।
अव्यर्थं दारुणं लोके प्रलयाग्निशिखोपमम् ॥६२
वाणरक्तसमूहेन बभूव च महानदः ।
वाणः पपात निश्चेष्टो व्यथितो हतचेतनः ॥६३

वाणासुर ने वहाँ पुनः आकर के एक सहस्र वाणों का प्रक्षेप किया जो कि मन्त्रों से पूत किये हुये थे और प्रलय काल की अत्यन्त उल्वण अग्नि की शिखा के समान दाह करने वाले थे ।५७। अर्जुन ने अपनी शरों के जाल से लीला ही से उन वाणों का वारण किया । फिर वाण ने शक्ति को छोड़ा था जो ग्रीष्मकाल के सूर्य के तुल्य तीव्रतम प्रभा वाली थी और अत्यन्त दाहक थी ।५८। महान् वलवान् सव्यसाची ने पाशुपत अस्त्र को ग्रहण किया जोकि सौ सूर्यों के समान प्रभाववाला था । यह अस्त्र अत्यन्त घोर अव्यर्थ और विश्व के संहार करने का कारण था । यह देखकर चक्रपणि भगवान् हरि ने अपना परम दारुण चक्र का प्रक्षेप किया ।५९-६०। इस भगवान् के चक्र में सहस्र हस्त थे । उस चक्र ने उस अत्यन्त उल्वण पाशुपत अस्त्र का छेदन कर दिया था और रण के मध्य में अचल सिंह भी भाँति गिर पड़ा था । वह पाशुपत शस्त्र फिर पशुपति के हाथ में चला गया । वह इस लोक में अत्यन्त दारुण–अव्यर्थ और प्रलयकाल की अग्नि के तुल्य था ।६१-६२। वाणासुर के रक्त के समूह से वहाँ पर एक महान् नद बन गया था । वाणासुर चेष्टाहीन होकर अत्यन्त व्यथा युक्त एवं चेतनासे रहित हो गया ।६३।

तत्राजगाम भगवान् महादेवो जगद्गुरुः ।
रुरोदागत्य मोहेन वाणं कृत्वा स्ववक्षसि ॥६४
शिवाश्रुपतनेनैव संबभूव सरोवरम् ।
चेतनं कारयामास करुणासागरः प्रभुः ॥६५

बाण गृहीत्वा प्रययौ यत्र देवो जनार्दनः ।
चक्रे पद्मार्चिते पादपद्मे वाणसमर्पणम् ।।६६
तुष्टाव जगतां नाथं शक्तीशं चन्द्रशेखरम् ।
वलिना च स्तुतं येन वेदोक्तेन च तेन च ।।६७
हरिर्मृत्युञ्जयं ज्ञानं ददौ वाणाय धीमते ।
करपद्मं ददौ गात्रे तं चकाराजरामरम् ।।६८
वाणस्तोत्रेण तुष्टाव भक्त्या वलिकृतेन च ।
वरां कन्यां समानीय रत्नभूषणभूषिताम् ।।६९
प्रददौ हरये भक्त्या तत्रैव देवसंसदि ।
गजेन्द्राणां पञ्चलक्षमश्वानांच चतुर्गुणम् ।।७०
दासीनाञ्च सहस्रञ्च रत्नभूषणभूषितम् ।
सहस्रं कामधेनूनां वत्सयुक्तं च सर्वदम् ।।७१

वहाँ पर जगत्के गुरु भगवान् महादेव आये थे । वहाँ आकर अपने भक्त वाणासुर को अपने वक्षःस्थल में लगाकर मोह से रुदन करने लगे थे ।६४। शिव के अश्रुओं के पतन से ही एक सरोवर-सा बन गया । करुणा के सागर प्रभु ने उसको चेतन कराया था ।६५। फिर शिव वाण को लेकर वहां गये थे जहाँ पर भगवान् जनार्दन विराजमान थे । भगवान् श्रीकृष्ण के पद्मों से चर्चित पाद पद्म में शिवने वाणासुर का समर्पण किया ।६६। जगतों के साथ—शक्ति के ईश और चन्द्रशेखर की स्तुति की थी । जिस वेद में उक्त स्तुति से बलि राजा ने स्तुति की थी उसी से स्तवन किया ।६७। हरि ने बुद्धिमान् बाण के लिए मृत्यु को जीत लेने वाला ज्ञान दिया और कमलोपमहाथ उस बाण के शरीर पर रख कर उसका स्पर्श किया इससे उसे अजर एवं अमर बना दिया ।६८। वाण ने बलि के द्वारा किये हुये स्तोत्र से और भक्ति से हरि का स्तवन किया तथा अपनी श्रेष्ठ कन्या उषा रत्नों के आभूषणों से भूषित करके उसी देवी की संसदमें वहाँ पर ही भक्ति से हरिको दे दी थी । पाँच लाख हाथी—हाथियों से चौगुने अश्व-एक सहस्र दासियाँ जो रत्नों के भूषणों से भूषित थी—एक सहस्र कामधेनु जो कि वत्सों से

युक्त और सब कुछ प्रदान करने वाली थी वाण ने दहेजमें दी थी।६९-७१।

माणिक्यानां च मुक्तानां रत्नानां शतलक्षकम्।
मणीन्द्राणां हीरकाणां शतलक्षं मनोहरम् ॥७२
जलभाजनपात्राणि सुवर्णनिर्मितानि च।
सहस्राणि ददौ तस्मै भक्तिनम्रात्मकन्धरः ॥७३
वराणि सूक्ष्मवस्त्राणि वह्निशुद्धांशुकानि च।
ददौ वाणश्च सर्वाणि स्वभक्त्या शङ्कराज्ञया ॥७४
ताम्बूलनांच चूर्णानां पूर्णपात्राणि नारद।
सहस्राणि ददौ भक्त्या वराणि विविधानि च ॥७५
कन्यां समर्पयामास पादपद्मे हरेरपि।
रुरोदोच्चैः स्वभक्त्या च परिहारं चकार सः ॥७६
कृष्णस्तस्मै वरं दत्वा वेदोक्तं च सुभाषितम्।
शङ्करानुमतेनैव प्रययौ द्वारकापुरीम् ॥७७
मत्वा कन्यां नवोढां तां वाणस्यापि महात्मनः।
रुक्मिण्यै प्रददौ शीघ्रं देवक्यै च हरिः स्वयम् ॥७८
महोत्सवं मंगलं च कारयामास यत्नतः।
ब्राह्मणान् भोजयामास ब्राह्मणेभ्यो धनं ददौ ॥७९

माटिक्य—मुक्ता और रत्न सौ–सौ–लक्ष तथा श्रेष्ठ मणि-हीरे सौ लक्ष दिये थे जो बहुत ही मूल्यवान् और मनोहर थे।७२। सुवर्ण के बने हुए जलके पात्र सहस्रों भक्तिभावसे विनम्र कन्धरा वाला होकर उसने दहेज में दिये थे। श्रेष्ठ सूक्ष्म वस्त्र जो वह्नि के समान शुद्ध थे। वाण ने शङ्कर भगवान् की आज्ञा से अपनी भक्ति-भाव के कारण सभी भगवान् को दिये।७३-७४। हे नारद ! ताम्बूलों के चूर्णों के पात्र जो परम श्रेष्ठ एव विविध भाँति के थे सहस्रों की संख्या में भक्ति-भाव से प्रदान किये।७५। हरि के चरण कमलों में वाण ने स्वयं लाकर अपनी कन्या उषा को समर्पित किया और अपने भक्तिके भाव का उद्रेक होने के कारण वह बड़े ऊँचे स्वरसे रुदन करने लगा था। उसने रुदन करके

अपने अपराधोंका परिहार कर लिया।७६। भगवान् कृष्णने उसे वेदोक्त सुभाषित वरदान प्रदान किया था और फिर शङ्करकी अनुमति से वह अपनी द्वारकापुरी को चले गये।७७। महात्मा वाकी उस नवविवाहिता कन्या को हरि ने स्वयं देवकी और रुक्मणीको ले जाकर दे दिया।७८। इसके उपरान्त वहाँ द्वारकापुरी में हरि ने बहुत बड़ा महोत्सव एवं मङ्गल कराया था तथा ब्राह्मणों को भोजन कराया था और बहुत सा धन ब्राह्मणों का दान दिया ।७९।

१०६--शृङ्गालोपाख्यानम्

अथ कृष्णः सुधर्मायां निवसन् सगणस्तथा ।
तत्राजगाम विप्रश्च प्रज्वलन् ब्रह्मतेजसा ॥१
आगत्य दृष्ट्वा तुष्टाव भक्त्या च पुरुषोत्तमम् ।
उवाच मधुरं शान्तो भीतो विनयपूर्वकम् ॥२
शृङ्गालो वासुदेवश्च राजेशो मण्डलेश्वरः ।
तमुवाच स यद्वाक्यं सावधानं निशामय ॥३
वैकुण्ठे वासुदेवोऽहं देवेशश्च चतुर्भुजः ।
लक्ष्मीपतिश्च जगतां धाता धातुश्च पालकः ॥४
ब्रह्मणा प्रार्थितोऽहं च भारावतारणाय च ।
भुवो भारतवर्गं च तदर्थं गमने मम ॥५
वसुदेवसुतः कृष्णः क्षत्रियश्चाप्यहङ्कृतः ।
जनं जनेन निर्जित्य दुर्बलं बलिना सह ।
बोधयित्वा महाधूर्तो घातयामास भूपतीन् ॥६

श्रीनारायणने कहा-इसके अनन्तर श्रीकृष्णअपने गणोंके साथ सधर्मा में निवास कर रहे थे कि वहाँ पर एक विप्र जो कि अपने ब्रह्मतेज से प्रज्वलित हो रहा था, आया ।१। उसने वहाँ आकर भक्ति-भावके साथ भगवान् पुरुषोत्तम का स्तवन किया और भीत होते हुगे विनीत होकर एवं शांत होकरवह मधुर वचन विनय पूर्वक बोला।२।ब्राह्मण ने कहा-

मण्डलेश्वर राजेश शृङ्गाल और वासुदेवने उससे जोकुछ कहाथा उसका अब आप श्रवट करें ।३। शृङ्गाल ने कहा था—मैं ही वैकुन्ठ में वासु-देव हूँ । देवों का स्वामी एवं चार भुजाओं वाला—लक्ष्मी का पति—जगतों का धाता और धाता (ब्रह्मा) का भी पालकमैं ही हूँ।४। ब्रह्मा ने इस वसुन्धरा के भार को दूर करने के लिए मेरी ही प्रार्थना की थी अतएव भूतल में इसके लिये भारतवर्ष देश में मेरा ही गमन हुआ है ।५। वसुदेव का पुत्र कृष्ण तो क्षत्रिय और अहङ्कारी हैं । बलीजनों के द्वारा दुर्बल मनुष्यों को जीतकर वह महान धूर्त्त अपने आपको ईश्वर बताकर भूपतियों को मार देता था ।६।

दुर्योधनं जरासन्धं भूपमन्यं च दुर्बलम् ।
भीमेन घातयामास बलिनाल्पेन भूतले ।।७
द्रोणं भीष्मं च कर्णं च यं यमन्यं च भूतले ।
बलीयासार्जुनेनैव घातयामास लीलया ।।८
यं यमन्यं दुर्बलं च प्रसिद्धमप्रसिद्धकम् ।
प्रसिद्धेन बलवता घातयामास लीलया ।।९
शिशुपालं दन्तवक्रं कसं च चिररोगिणम् ।
मत्पुत्रं नरकं चैव दुर्बलं नरकं मुरम् ।।१०
स्वयं जघान संकेताच्छलेन सहसावत ।
न धर्मयुद्धेकपटी स च बालो ह्यधार्मिकः ।।११
जघान पूतनां कुब्जां स्त्रीघाती वस्त्रहेतुना ।
जघान रजकं शिष्टमशिष्टश्च प्रतारकः ।।१२
हिरण्यकशिपुं दैत्यं हिरण्याक्षं महाबलम् ।
मधुं च कैटभञ्चैव हत्वाऽहं सृष्टिरक्षकः ।।१३

इस भूतलमें उस अल्पबल वाले ने भीमके द्वारा दुर्योधन, जरासन्ध तथा अन्य दुर्बल राजाओं को मरवा दिया ।७। द्रोट–भीष्म—कर्ण और अन्य राजाओं तथा बलवान् वीरों को अत्यन्त बल वाले अर्जुनके द्वारा ही लीला से मरवा दिया ।८। शिशुपाल—दन्तवक्र और कंस को तथा चिररोगी मेरे पुत्र नरकको एवं दुर्बलनरक और मुरको स्वयं

संकेत से छलके द्वारा सहसा मार दिया। बड़ा ही खेद होता है कि धर्म युद्ध में इनको नहीं मारा। यह कपटी—बालक और अधार्मिक है ।९-११। इसने पूतना और कुब्जा को मार दिया। यह स्त्रियों का घात करने वाला है। केवल वस्त्रों के लिए ही बेचारे धोबी को मार डाला यह बिल्कुल अशिष्ट है और शिष्ट पुरुषों का प्रतारक है अर्थात् धोखा देने वाला है ।१२। हिरण्यकशिपु दैत्य और महान् बलवान् हिरण्याक्ष को-मधु और कैटभ दैत्यों को मैंने ही हनन करके सृष्टि की रक्षा की है ।१३।

अहमेव स्वयंब्रह्मा ह्यहमेव स्वयं शिवः ।
अहं विष्णुश्च जगतां पाता दुष्टावहारकः ॥१४
अंशेन कलया सर्वे मनवो मुनयस्तथा ।
स्वयं नारायणोऽहञ्च निर्गुणः प्रकृतेः परः ॥१५
लज्जयाकृपयाचैव मित्रबुद्ध्या क्षमाकृता ।
यद्गतं तद्गतं भद्र युद्धं कुरु मया सह ॥१६
शृणोमि दूतद्वारेण ह्यतीवोच्चैरहङ्कृतम् ।
उचितं दमनं तस्याप्युन्नतानां निपातनम् ॥१७
राज्ञश्च परमो धर्मोऽप्यहं शास्ता भुवोधुना ।
शङ्खं चक्रं गदां पद्मं गृहीत्वाऽहं चतुर्भुजः ॥१८
द्वारकां तां गमिष्यामि युद्धाय सगणः स्वयम् ।
युद्धं कुरु यदीच्छास्ति सा मांच शरणं व्रज ॥१९
यदि मा यास्यति मम शरणं शरणागतः ।
भस्मीभूतं करिष्यामि द्वारकांच क्षणेन च ॥२०
सबलञ्च सपुत्रं त्वां सगणञ्च सबान्धवम् ।
क्षणेन दग्धुं शक्तोऽहमसहायश्च लीलया ॥२१
तपस्विनञ्च वृद्धञ्च जित्वा युद्धे च शङ्करम् ।
शक्रं भग्नाशं जित्वा च रोगिणं ब्रह्मशापतः ॥२२

मैं ही स्वयं ब्रह्मा हूँ, मैं ही स्वयं शिव हूँ और मैं ही जगतों का पालन एवं रक्षण करने वाला दुष्टों का अपहारक विष्णु हूँ ।१४। मेरे

ही अंश से तथा कला से सब मनु और मुनि होतेहैं। मैं स्वयं नारायण हूँ जो कि निर्गुण और प्रकृति से पर हैं।१५। लज्जा–कृपा अथवा मित्र की बुद्धि से क्षमा कर देने वाले मेरे साथ हे भद्र ! अब युद्ध कर लो। जो हो गया है सो तो हो गया हैं।१६। मैं दूतों के द्वारा सुनता हूँ कि वह बहुत ही अधिक अहङ्कारी है। अतएव उसका दमन करना भी उचित ही है। जो ऊँचा सिर करके किसी को भी कुछ नहीं मानतेहैं उनका निपात करना आवश्यक है।१७। यह राजा का परम धर्म है क्योंकि इस समय में इस भूतलका मैं ही शस्ता हूँ। शङ्खचक्र-गदा-और पद्म धारण करके मैं चार भुजा वालाहूँ।१८। मैं स्वयं उस द्वारकापुरी में अपने गणों के साथ स्वयं युद्ध के लिए जाऊँगा यदि इच्छा हो तो मेरे साथ युद्ध करो और ऐसा नहीं है तो मेरे शरण में आ जाओ।१९। यदि शरणागत होकर मेरी शरण में नहीं आता है तो एक ही क्षण में द्वारकापुरी को भस्मीभूत कर डालूँगा।२०। बलराम के सहित तथा पुत्रों के सहित एवं गणों के साथ और बन्धु बान्धवों के सहित तुमको क्षण भर में दग्ध कर देने में समर्थ हूँ और लीलासे ही बिना किसी की सहायता के कर दूँगा।२१। मैं युद्ध में तपस्वी और वृद्ध शङ्कर को जीतकर इन्द्रको भग्न आशा वाला करके और ब्रह्माके शाप वाले रोगी को जीतकर परास्त कर दूँगा।२२।

१०७–राधाम्प्रतिगणेशोक्तिः

राधा सपूज्य विधिना स्तुत्वा लम्बोदरं सती।
अमूल्यरत्ननिर्माणं सर्वाङ्गभूषणं ददौ ॥१
राधायाः स्तवनं श्रुत्वा पूजां दृष्ट्वा च वस्तु च।
उवाच मधुरं शान्तः शान्तां त्रैलोक्यमातरम् ॥२
तव पूजा जगन्मातर्लोकशिक्षाकरी शुभे।
ब्रह्मस्वरूपा भवती कृष्णवक्षःस्थलस्थिता ॥३
यत्पादपद्ममतुलं ध्यायन्ते ते सुदुर्लभम्।
सुरा ब्रह्मेशशेषाद्या मुनीन्द्राः सनकादयः ॥४

जीवन्मुक्ताश्च भक्ताश्च सिद्धेन्द्राः कपिलादयः।
तस्य प्राणाधिदेवी त्वं प्रिया प्राणाधिका परा ॥५
वामाङ्गनिर्मिता राधा दक्षिणाङ्गश्च माधवः।
महालक्ष्मीर्जगन्माता तव वामाङ्गनिर्मिता ॥६
वसोः सर्वनिवासस्य प्रसूस्त्वं परमेश्वरी।
वेदानां जगतामेव मूलप्रकृतिरीश्वरी ॥७

श्री नारायण ने कहा—राधा ने लम्बोधर की विधि के साथ पूजा करके तथा उनका स्तवन करके अमूल्य रत्नोंसे निर्मित समस्त अङ्गों के भूषण दिये ।१। राधा की स्तुति का श्रवण करके और राधा की पूजा तथा समर्पित वस्तुओंको देखकर परमशान्त स्वरूप वाली त्रिलोकी की माता से स्वयं शान्त होकर गणेश ने मधुर स्वर में कहा ।२। श्री गणेश बोले—हे शुभे ! आप तो जगतों की माता हैं आपकी जो यह पूजा है वह लोक की शिक्षा के करने वालीहै । आप तो स्वयं ब्रह्म के स्वरूप वाली और कृष्ण के वक्षःस्थलमें स्थित रहने वालीहैं । समस्त देवगण—ब्रह्मा—ईश और शेष आदि—मुनीन्द्रगण तथा सनक प्रभृति सब जिसके चरण कमल का ध्यान किया करते हैं ।३-४। जीवन्मुक्त-भक्त-कपिल आदि सिद्धेन्द्र जिनके पाद पद्म का ध्यान करतेहैं उसकी आप प्राणों से भी अधिक-परा और प्राणों की अधिदेवी है ।५। वाम अङ्ग से निर्मित राधा का स्वरूप हैं और दक्षिणाग माधव का स्वरूप है । इस तरह से दोनों ही स्वरूप एक ही अङ्ग हैं । जगत की माता महालक्ष्मी आपके ही वामांगसे निर्मित हुई हैं । आपही परमेश्वरी सर्व-निवास वसु की जनयित्री हैं । वेदों की और समस्त जगतोंको भी आप मूल प्रकृति ईश्वरी हैं ।६-७।

सर्वाः प्रकृतिका मातः सृष्ट्याञ्चेत्वद्विभूतयः।
विश्वानि कार्यरूपाणि त्वं च कारणरूपिणी ॥८
प्रलये ब्रह्मणः पाते तन्निमेषो हरेरपि।
आदौ राधां समुच्चार्य पश्चात् कृष्णं परात्परम् ॥९

स एव पण्डितो योगी गोलोकं याति लीलया ।
व्यतिक्रमेमहापापीब्रह्महत्यांलभेद्ध्रुवम् ॥१०
जगतां भवती माता परमात्मा पिता हरिः ।
पितुरेव गुरुर्माता पूज्या वन्द्या परात्परा ॥११
भजते देवमन्यं वा कृष्णं वा सर्वकारणम् ।
पुण्यक्षेत्रे महामूढो यदि निन्दति राधिकाम् ॥१२
वंशहानिर्भवेत्तस्य दुःखशोकमिहैव च ।
पच्यते निरये घोरे यावच्चन्द्रदिवाकरौ ॥१३
गुरुश्च ज्ञानोद्गिरणाज्ज्ञानं स्यान्मन्त्रतन्त्रयोः ।
स च मन्त्रश्च तत्तन्त्रं भक्तिः स्याद् युवयोर्यतः ॥१४

हे माता ! इस सृष्टिमें सभी प्राकृतिकहैं जो कि आपकी विभूतियाँ हैं। ये समस्त विश्व कार्य स्वरूप वालेहैं और आपही एक इनके कारण स्वरूप वाली है ।८। प्रलय काल में ब्रह्मा के पात होने पर जो कि हरि भगवन् का एक निमेष ही समय होताहै वह ब्रह्मा सबसे पहिले आदिमें राधा के नामका उच्चारथ करके उसके पश्चात् परात्पर कृष्णका नाम लेकर वह ही परम पण्डित और योगी लीला से ही गोलोक को चला जाता है। इन दोनों राधा और कृष्णके नामका व्यत्ति क्रम होने पर महान् पापी हो जाया करता है और उसे निश्चय ही ब्रह्महत्या का पाप लगता है ।९-१०। हे देवि ! आप तो माता हैं और हरि पिता हैं। पिता से भी अधिक माता होती है। वह पिता से अधिक पूज्य, वन्दनीय और पर से भी परा हुआ करती है ।११। यदि कोई किसी अन्य देव का भजन करता है अथवा सबके कारण स्वरूप कृष्ण का भजन करता है वह इस पुण्य क्षेत्र में महान् मूढ़ है यदि वह राधिकाकी निन्दा किया करता है ।१२। उस पुरुष के वंश की हानि होती है और यहां पर ही उसे दुःख तथा शोक हुआ करते हैं। अन्तमें वह घोर नरक में जब तक चन्द्र और सूर्य रहते हैं उग्र यातनाएँ भोगता है ।१३। ज्ञान के उद्गिरण होने से गुरुहै। मन्त्र और तन्त्रमें ज्ञान होता है। वही मंत्र है और वही तन्त्र है जिसमें आप दोनों की भक्ति होती है ।१४।

निषेव्य मन्त्रं देबानां जीवो जन्मनि जन्मनि ।
भक्तिर्भवति दुर्गायाः पादपद्मे सुदुर्लभे ॥१५
निषेव्यमन्त्रं शम्भोश्च जगतां कारणस्य च ।
तदा प्राप्नोतियुवयोः पादपद्मं सुदुर्लभम् ॥१६
युवयोः पादपद्मञ्च दुर्लभं प्राप्य पुण्यवान् ।
क्षणार्द्धं षोडशांशञ्च न हि मुञ्चति दैवता ॥१७
भक्त्या च युवयोर्मन्त्रं गृहीत्वा वैष्णवादपि ।
स्तवं वा कवचं वापि कर्ममूलनिकृन्तनम् ॥१८
यो जपेत् परया भक्त्या पुण्यक्षेत्रे च भारते ।
पुरुषाणां सहस्रञ्च स्वात्मनासार्द्धमुद्धरेत् ॥१९
गुरुमभ्यर्च्य विधिवद्वस्त्रालङ्कारचन्दनैः ।
कवचं धायेद् योहि विष्णुतुल्योभवेद्ध्रुवम् ॥२०
यद्दत्तं वस्तु मे मातस्तत् सर्वं सार्थकं कुरु ।
देहि प्रियाय मत्प्रीत्या तदा भोक्ष्यामि साम्प्रतम् ॥२१

देवों के मन्त्र को सेवन करके जन्म-जन्म में जीवन विताने वाला जो पुरुष है उसको दुर्गा के पाद पद्म में भक्ति हुआ करती है ।१५। इस जगत् के कारण-स्वरूप शम्भुके मन्त्रकी उपासना करके तब मनुष्य आप दोनों के सुदुर्लभ चरण कमल की प्राप्ति किया करता है ।१६। पुण्यवान् पुरुष आपके परम—दुर्लभ चरण कमल को प्राप्तकर वह देवता आधे क्षण भी षोडशांश को नहीं त्यागता है ।१७। आप दोनों (राधा और कृष्ण) की भक्ति के भाव से किसी वैष्णव से भी मन्त्र की दीक्षा प्राप्त कर स्तव अथवा कवच को ग्रहण करके जो कि कर्म के मूल का निकृन्तन कर देने वालाहै जो पराभक्तिसे इस पुण्यक्षेत्र भारतमें जपता है वह अपने ही साथ अपने पूर्व सहस्र पुरुषों का उद्धार कर देता है ।१८-१९। वस्त्र अलंकार और चन्दन के द्वारा श्रीगुरुचरणकी अभ्यर्चना करके और विधि-विधानके साथ यजन करके जो पुरुष कवचको धारण करता है वह निश्चय ही विष्णु के समान ही हो जाता है ।२०। हे माता ! जो वस्तु मुझे दी है उसे आप सार्थक सब को कर दीजिए मेरी

प्रीति के लिये आप विप्र को प्रदान करिये तब मैं इस समय भक्षण करूँगा ।२१।

देवे देयानि दानानि देवे देया च दक्षिणा ।
तत् सर्वं ब्राह्मणे दद्यात्तदानन्त्याय कल्पते ॥२२
ब्राह्मणानां मुखं राधे देवानां मुखमुख्यकम् ।
विप्रभुक्तञ्च यद्द्रव्यं प्राप्नुवन्त्येव देवताः ॥२३
विप्रांश्च भोजयामास तत् सर्वं राधिका सती ।
बभूव तत्क्षणादेव प्रीतोलम्बीदरो मुने ॥२४
एतस्मिन्नतरे देवा ब्रह्मे शशेषसंज्ञकाः ।
आययुर्वटमूलञ्च देवपूजार्थमेव च ॥२५
तत्र गत्वा शिवचरो देवान् देवीरुवाच सः ।
श्रीकृष्णं शुष्ककण्ठश्च भयभीतश्च रक्षकः ॥२६

देवताके लिये दिये जाने वालेदान और देवोंको दी जाने वाली जो दक्षिणा हैं वह सभी ब्राह्मणको ही देनी चाहिए । ऐसा करने से असंख्य फल हुआ करता है ।२२। हे राधे ! ब्राह्मणों का जो मुख होता हैं वही देवों का मुख्य मुख हुआ करता है । विप्रों के द्वारा जिस द्रव्य का भोग किया जाता है वह देवों को ही प्राप्त होता है ।२३। तब तो सती राधिका ने वह सभी कुछ विप्रों को भोजन करा दिया । हे मुने ! तब तो लम्बे उदर वाले गणेश अत्यन्त प्रसन्न हो गये ।२४। इसी बीच में ब्रह्मा—ईश और शेष देवगण भी वहाँ पर वट के मूल के समीप अभ्यर्चन करने के लिए आ गये ।२५। वहाँ जाकर शिव दूत का देवों से और देवियों से बोला । यह रक्षक श्रीकृष्ण से भी कहने लगा जिसको बड़ा भारी भय हो रहा था और जिसका कन्ठ सूख गया था ।२६।

गणेशं पूजयामास सर्वादौ च शुभक्षणे ।
बृषभानुसुता राधा प्रकृत्य स्वस्तिवाचनम् ॥२७
सहितासा बलवती गोपीत्रिशत्कोटिभिः ।
वारितोऽहं बलिष्ठाभिर्युष्मांश्च कथायामित् ॥२८

सर्वादौ पूजयेद् यो हि सोऽनन्त फलमालभेत् ।
मध्ये मध्यविधं पुण्यं शेषे स्वल्पमिति स्मृतम् ॥२९
देवेन्द्रेषु मुनीन्द्रेषु देवस्त्रीषु स्थितासु च ।
गोपीभिश्च सह तया राधया पूजितः परः ॥३०
दूतवाक्यं समाकर्ण्यं जहसुः सर्वदेवताः ।
मुनयो मनवश्चैव राजानो देवयोषितः ॥३१
रुक्मिण्याद्या रमण्यश्च या देव्यो बिस्मयं ययुः ।
सरस्वतीचसावित्री पार्वतीपरमेश्वरी ॥३२
रोहिणी च सतीसंज्ञा स्वाहाद्या देवयोषितः ।
मुदिताः प्रययुः सर्वा मुनिपत्न्यः पतिव्रताः ॥३३
मुनयो मनवः सर्वे देवाश्चापि नरास्तथा ।
श्रीकृष्णः सगणैः सार्द्धं ये चान्ये प्रययुर्मुदा ॥३४
ते सर्वे विविधैर्द्रव्यैः पूजां चक्रुः शुभक्षणे ।
बलिष्ठा दुर्बलश्चैव च पृथक् पृथक् ॥३५

रक्षक ने कहा—वृषभानु की पुत्री राधाने स्वस्ति वाचन करके इस शुभ क्षण में सबके पहिले आदि में गणेश की ही पूजा की ।२७। तीन सौ करोड़ गोपियों के साथ वह अत्यन्त बलवती हो गई है । अत्यन्त बलवती गोपियों के द्वारा मुझे वारित कर दिया गया है—यही निवेदन मैं आप सबसे कर रहा हूँ ।२८। सबके आदि में जो इसी प्रकार से अभ्यर्चना किया करता है वह अनन्त फल का लाभ किया करता है । मध्य में जो पूजन करता है उसे मध्यम श्रेणी का पुण्य होता है और अन्त में जो करता है उसको तो अत्यन्त स्वरूप फल एवं पुण्य ही होता है । ऐसा कहा है ।२९। सम्पूर्ण देवेन्द्र और मुनीन्द्र तथा देवों की स्त्रियों के स्थित रहते हुए भी गोपियों के सहित उस राधाके द्वारा पर की ही पूजा पहिले की गई है।३०। दूत के इन वचनोंका श्रवण करके समस्त देवगण—मुनिमंडल—मनु—राजा और देवों की अङ्गनायें हँस पड़ी थीं ।३१। रुक्मिणी आदि जो रमणियाँ और जो देवियाँ थीं उन सयको अत्यन्त विस्मय हुआ था । सरस्वती और सावित्री परमेश्वरी पार्वती-

रोहिणी तथा संज्ञा वाली एवं स्वाहा आदि देवों की स्त्रियाँ और समस्त पतिव्रता मुनियों की पत्नियाँ परम प्रहर्षित होती हुई वहाँ पर गई थी।३२-३३। मुनिगण मनुगण-समस्त देवगण और मनुष्य गणों के साथ श्रीकृष्ण और अन्य लोग, सभी परम प्रसन्नता के साथ वहाँ गये थे।३४। उन सभी ने विविध प्रकारसे द्रव्यों के द्वारा शुभ क्षण में पूजा की थी और दुर्बल तथा बलिष्ठ सभी ने क्रम से पृथक् पूजन किया था।३५।

लड्डुकानांच राशीनां शतकोटिर्बभूव ह।
शर्कराणां तदर्द्धञ्च स्वस्तिकाना तथैव च ॥३६
अन्नानां भव्यवस्तूनां शतकोटिर्बभूव ह।
असंख्यानि फलान्येव स्वादूनि मधुराणि च ॥३७
मधुकुल्या दुग्धकुल्या दधिकुल्या घृतस्य च।
बभूवुः शतसंख्यांच त्रैलोक्यानांच पूजने ॥३८
पूजां कृत्वा तु ते सर्वे समूषुश्च सुखासने।
पार्वती परमा प्रीत्य: राधास्थानं समाययौ ॥३९
सा राधा पार्वतीं दृष्ट्वा समुत्थाय जवेन च।
यथा योग्यांच सम्भाषां चकार सादरं मुदा ॥४०
आश्लेषणं चुम्बनंच बभूव च परस्परम्।
उवाच मधुरं दुर्गा राधां कृत्वा स्ववक्षसि ॥४१

वहाँ पर लड्डूओ की सैकड़ों राशियाँ हो गई थीं और अगणित फलों के ढेर हो गये थे जो कि फल अत्यन्त मधुर एवं स्वादु थे।३६। मधुकुल्या, दुग्धकुल्य, दधिकुल्या और धृतकुल्या थी। ये सब त्रैलोक्य के पूजन में सैकड़ों की संख्या में थीं। शर्कराओं के डेढ़ करोड़ सौ ढेर थे स्वस्तिकों के भी उतने ही ढेर लगे हुए थे। अन्नों के तथा अन्य भव्य पदार्थों की राशियाँ भी शतकोटि थी।३७-३८। वे सब पूजा करके सुखासनों पर संस्थित हो गये थे। इसके अनन्तर पार्वती देवी परमाधिक प्रीति के साथ राधा के स्थान पर आ गई थी।३९। उस राधा देवी ने जगदम्बा पार्वती को देखकर गात्रोत्थान बड़े ही वेग से

दिया था और फिर पार्वती से यथोचित सम्भाषण परम प्रीति के साथ किया था ।४०। दोनों का परस्पर में आश्लेषण और चुम्बन बड़े ही प्रेम के साथ हुआ । दुर्गा देवी राधा को अपने वक्षःस्थल में लगा कर उनसे मधुर वचन कहने लगी थीं ।४१।

किंवा प्रश्नं करिष्यामि त्वां राधां मङ्गलालयाम् ।
गता ते विरहज्वाला श्रीदाम्नः शापमोक्षणे ॥४२
सततं मन्मनः प्राणास्त्वय्येव मयि ते तथा ।
नह्येवमावयोर्भेदः शक्तिपुरुषयोस्तथा ॥४३
येत्वां निन्दति मद्भक्तास्त्वद्भक्ताश्चापिमामपि ।
कुम्भीपाकेचपच्यन्तेयावच्चतेद्रदिवाकरौ ॥४४
राधामाधवयोर्भेदं ये कुर्वन्ति नराधमाः ।
वंशहानिर्भवेत्तेषां पच्यन्ते नरके चिरम् ॥४५
यान्ति शूकरयोनिं च पितृभिः शतकैः सह ।
षष्टिवर्षसहस्राणि विष्ठायां कृमयस्तथा ॥४६
त्वयैव पूजितः पुत्रो न मया च गणेश्वरः ।
सर्वादौ सर्वपूज्योऽयं यथा तव तथामम ॥४७
यावज्जीवनपर्य्यन्तं न विच्छेदो भविष्यति ।
राधामाधवयोर्देवि दुग्धधावल्ययोर्यथा ॥४८

पार्वती ने कहा—हे राधा ! आप तो मङ्गलों की आधार ही हैं अतएव कुशल-मंगल के विषय में तो आपसे प्रश्न ही क्या करूं ? अर्थात राधा ! आपसे मङ्गल के विषय में कुछ भी पूछना तो व्यर्थ ही है । श्री दामा के शाप को मुक्ति हो जाने पर अब आपको जो विराहाग्नि की ज्वालायें उत्पीड़ित कर रहीं थीं वे समाप्त हो गई हैं ।४२। मेरे प्राण निरन्तर तथा सर्वदा मेरा मन तुममें ही रहता है वैसा ही तुम्हारा मन भी मुझमें सदा रहा करता है । इस प्रकार से हम दोनोंमें शक्ति और पुरुष की भाँति को भी भेद नहीं है ।४३। जो भी भक्त होकर तुम्हारी निन्दा किया करतेहैं या तुम्हारे भक्त मेरी बुराई करते वे सब कुम्भी पाक नामक नरक में जाकर गिरा करते हैं और वहाँ वे

जब तक सूर्य एवं चन्द्र की स्थिति रहती है तब तक बराबर नारकीय असह्य यातनायें भोगा करते हैं ।४४। वे मनुष्यों में महान् अधम श्रेणी के मनुष्य हैं जो राधा माधव में कुछ भी भेद-भाव की कल्पना किया करते हैं । ऐसे पुरुषोंके वंश की हानि हो जाया करती है और वे चिर-काल नरक में अति दुस्सह यातनायें भोगते रहते हैं ।४५। ऐसे महान् पापी अपने पितरों के साथ जो कि सैकड़ों ही होते हैं, शूकर की योनि में जाकर जन्म ग्रहण किया करते है तथा साठ हजारवर्ष तक निष्ठा के अन्दर रहने वाली कृमियों की योनियोंमें जन्म ग्रहण कर निवास किया करते हैं ।४६। तुमने ही मेरे पुत्र गणेश का सर्व प्रथम पूजन किया है। अभी तक मैंने तो नहीं किया है । यह सब के प्रथम यदि तुम्हारा पूज्य हैं तो मेरा सबके पहले पूजने के योग्य है क्योंकि तुम और हम से कोई कोई अन्तर है ही नहीं ।४७। हे देवि ! अब जीवन पर्यन्त कभी राधा और माधव का विच्छेद नहीं होगा जिस तरह से दुग्ध और उसमें रहने वाली धवलता कभी भी अलग नहीं होती है उसी भाँति आप दोनों में भी वैसा ही गुण द्रव्य का सा नित्य सम्बन्ध स्थित है ।४८।

सिद्धाश्रमे महातीर्थे पुण्यक्षेत्रे च भारते ।
निर्विघ्नं लभ गोविन्दं सम्पूज्यविघ्नखण्डनम् ।।४९
रासेश्वरी त्वं रसिका श्रीकृष्णोरसिकेश्वरः ।
विदग्धायाविदग्धेनसङ्गमो गुणवान् भवेत् ।।५०
श्रीदाम्नः शापनिर्मुक्ता शतवर्षान्तरे सती ।
कुरुष्व मद्वरेणाद्य कृष्णेन सह सङ्गमः ।।५१
ममाज्ञया दुर्लभया सुवेशं कुरु सुन्दरि ।
सुदुर्लभः कामिनीनां सत्पुंसा सह सङ्गमः ।।५२
चक्रुः सुवेशं राधयाः ग्रियाल्यश्च शिवाज्ञया ।
रत्नसिंहासने रम्ये वासयामासुरीश्वरीम् ।।५३
पुरतो रत्नमाला सा रत्नमालां गले ददौ ।
राधाया दक्षिणे हस्ते क्रीडापद्मं मनोहरम् ।।५४

ददौ पद्ममुखी पादपद्मयुग्मेऽप्यलक्तकम् ।
प्रददौ सुन्दरी गोपी सिन्दूरं सुन्दरं वरम् ॥५५
चन्दनेन समायुक्तं सीमन्ताधस्थलोज्ज्वलम् ।
सुचारुकवरीं रम्यां चकार मालती सती ।
मनोहरां मुनीनां च मालतीमाल्य भूषिताम् ॥५६

अब आप भारत जो सिद्धों का आश्रय—महान् तीर्थ और पुण्य का परम क्षेत्र है में बिना किसी अड़चन एवं विघ्न बाधा के गोविन्द की प्राप्ति करो क्योंकि आपने अब तो विघ्नों के विनाश करने वाले गणेश का पूजन भली भाँति कर हीं लिया है ।४९। हे राधे ! आप तो राम की स्वामिनी हैं और रासलीला की अत्यन्त ही रसिका हैं तथा श्री कृष्ण रास के रसिकी में परम शिरोमणि है । विदग्धा नायिका का रास के लिए अत्यन्त निपुण का विदग्ध नायकके साथ जो सङ्गम होता है वह बहुत ही अधिक गुण वाला हुआ करता है ।५०। हे सति ! अब आप सौ वर्ष के पश्चात् श्री दामा के शाप से निर्मुक्त हो गईहैं । आज मेरा वरदान है कि तुम श्री कृष्ण के साथ सुख पूर्वक सङ्गम करलो ।५१। हे सुन्दरि ! अब मेरी आज्ञा से जो कि परम दुर्लभ हुआ करती है अपनी सुन्दर वेश भूषा धारण करो अर्थात् अत्यन्त सुरम्य शृङ्गार करो क्योंकि कामिनियों का सत्पुरुषके साथ सङ्गम सुदुर्लभ हुआ करता है ।५२। जगदम्बा पार्वती की आज्ञा से श्री राधाको जो परम प्रियसखी थी उन्होंने राधा का सुन्दर वेश किया था और फिर रत्नों द्वारा सुनिर्मित सिंह सन पर उस ईश्वरी को विराजमान किया था ।५३। उनके सामने कण्ठ में रत्नमाला गोपी ने रत्नों की माला पहिनाई थी और राधा के दाहिने हाथ में परम मनोहर क्रीड़ा पद्म समर्पित किया ।५४। पद्ममुखी सेविका सहेली ने श्री राधा के कमलोपम चरणोंमें अलक्तक लगया था । सुन्दरी गोपी ने राधा के मस्तक में परम श्रेष्ठ सिन्दूर लगाया था ।५५। सीमान्त के अधःस्थल को अति समुज्वल चन्दन से समायुक्त किया था । सती मालती ने परम सुन्दर एवं अति रम्य कवरी को सजाया था जो कि मालती लता के पुष्पों से भूषित की

गई थी और मुनि गणों मन को भी हरण करने वाली थी ५६।

कस्तूरीकुंकुमाक्तां च चारुचन्दनपत्रकम् ।
स्तनयुग्मे सुकठिने चकार चन्दनं सती ॥५७
चारुचम्पकपुष्पाणां मालां गन्धमनोहराम् ।
मालावती ददौ तस्यै प्रफुल्लां नवमल्लिकाम् ॥५८
रतीषु रसिका गोपी रत्नभूषणभूषिताम् ।
तां चकारातिरसिकां राधां रतिरसोत्सुकाम् ॥५९
शरत्पद्मदलाभं च लोचनं कज्जलोज्वलम् ।
कृत्वा ददौ सुललितं वस्त्रञ्च ललिता सती ॥६०
महेन्द्रेण प्रदत्तं च पारिजातप्रसूनकम् ।
सुगन्धियुक्तं तस्याश्च पारिजातं करे ददौ ॥६१
सुशीलं मधुरोक्तं च भर्तुः पार्श्वे यथोचितम् ।
शिक्षां चकारनीतिं च सुशीला गोपिकासती ॥६२
स्त्रीणां च षोडशकलां विपत्तौ विस्मृतां तयोः ।
स्मरणं कारयामास राधामाताकलावती ॥६३

